वेदविपाशा

Vol. 09-10 2022-2023

संरक्षकः

प्रो. श्रीनिवासवरखेडी

कुलपतिः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

प्रधानसम्पादकः

प्रो. मदनमोहनपाठकः

निदेशकः केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, बलाहरः (हि. प्र.)

सम्पादक-मण्डलम्

डॉ. विजेन्द्रकुमारशर्मा (ज्योतिषम्)

डॉ. राहुलकुमारझा (वेद-कर्मकाण्डः)

डॉ. सुरेशपाण्डेयः (व्याकरणम्)

डॉ. हरिओमः (शिक्षाशास्त्रम्)

डॉ. संजय कुमार

डॉ. शक्तिशरणशर्मा (साहित्यम्)

पकंज

डॉ. ऋचाविश्वाल (आग्लम्)

संयोजनम् : IQAC वेदव्यासपरिसरः, बलाहरः (हि. प्र.)

Title : **VEDA VIPASHA (वेदविपाशा)**

Vol.: : **9-10**

Year : 2022-2023

Price : Rs. 380/-

© Vedavyas Campus

Copy :

Printed & Published by : **Prof. Madan Mohan Pathak**
Director
Central Sanskrit University, Vedavyas Campus,
Balahar, Himachal Pradesh-177108

Editor : **Prof. Madan Mohan Pathak**

Email : **pub.vvc@gmail.com**

Website : **csu-balahar.edu.in**

Fax / Phone No. : 01970-245409

Printed at : GN Enterprises
Daulatpur Chowk, Distt. Una (HP)
Mob.: 98161 15555

Composed & Designed By : Rajender Rana for GN Enterprises

सूचना :– प्रकाशित लेखों व शोधपत्रों से प्रकाशक का सहमत होना अनिवार्य नहीं है।

प्रस्तावना

नान्यः पन्थाविद्यतेऽयनाय

अखण्डब्रह्माण्डनायकस्य निःश्वासोच्छ्वासभूतः वेदः सकलचराचरजीवानां कल्याणार्थं प्रवृत्तो वर्तते। सायणाचार्यस्य मतानुसारमिष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो वेदयति स वेदः। अर्थात् वेदद्वारा एव जीवानाम् इष्टप्राप्तिः एवं अनिष्टपरिहारः भवितुमर्हति। वेदः सकलज्ञान-विज्ञानानां मूलम् आकरो वा कथ्यते। वेदः न केवलं सकलज्ञान-विज्ञानानां मूलमपितु भगवत्याः धरणिदेव्याः अपि आधारभूतो विद्यते। तद्यथा-

गोभिः विप्रैश्च वेदैश्च सतिभिः सत्यवादिभिः।

अलुब्धैः दानशीलैश्च सप्तभिः धार्यते मही ।

ऊपर्युक्तैः सप्तवस्तूनां पुण्यप्रतापैः एव इयं धरणिः स्वयं सुरक्षिता सति अस्मान् धारयति। किमधिकम्? यावत् कालपर्यन्तम् इह धरा-धाम्नि वेदस्य प्रचारः प्रसारश्च भविष्यति तावत् कालपर्यन्तम् इयं धरणिदेवी अस्मान् धारयिष्यति। इत्थं सर्वं विचिन्त्यैव भारतसर्वकारस्य अधिकारिभिः विशिष्य सकल-कलादक्षैः युगपुरुषैः माननीयैः प्रधानमन्त्रिमहोदयैः राष्ट्रियशिक्षानीतौ आमूलं परिवर्तनं कृतम्। अनेन परिवर्तनकर्मणा भारतीयज्ञान-परम्परायां नूनमेव अभिवृद्धिः भविष्यति। न केवलं भारतीयज्ञानपरम्परायाः अभिवृद्धिः अपितु अनेन वेद-वेदाङ्गादिचतुर्दश-विद्यायाः अध्ययन-अध्यापनादि-अभ्यासेन, आतंक-अनाचार-अराजकता-व्यभिचार-क्षेत्रवादादीनां मूलोच्छेदः नूनमेव भविष्यति।

वेदाः यज्ञार्थमेव प्रवृत्ताः सन्ति। उक्तमेव श्रीलगधमुनिना - वेदा हि यज्ञार्थमभिप्रवृत्ताः..... इति। यज्ञं नाम सकलं सत्कर्म। वेदे एव निर्दिष्टमस्ति यत् अहं (वेदपुरुषः) महान्तं पुरुषं आदित्यवर्णन्तमसः परस्तात् वेद्मि। कोऽपि जीवः तमेव विदित्वा अतिमृत्युं (अमृततत्त्वं मोक्षत्वं) दुःखान् विमुक्तिम् अवाप्नोति। आस्तिकानां नये दुःखात् विमुक्तये अन्यः कश्चिद् उपाय एव नास्ति।

ॐ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात्।

तमेवविदित्वातिमृत्युमेतिनान्यः पन्थाविद्यतेऽयनाय।।

एवमेव सांसारिकानां कल्याणनिमित्तं नैके मन्त्राः वेदे यत्र-तत्र-सर्वत्र द्रष्टुं शक्यते। एतत् सर्वं मनसि निधाय वेदव्यास-परिसरस्य सर्वेऽप्याचार्याः सम्भूय समेषामपि षडङ्ग-वेदोपवेदानां संरक्षण-संवर्धनदृष्ट्या **वेदविपाशा**-नामधेयां विशिष्टां शोध-पत्रिकां प्रकाशयन्तः सन्ति। अनेन प्रकाशनाख्येन यज्ञकर्मणा न केवलं परिसरस्थानां छात्राणां ज्ञानवृद्धिः कल्याणञ्च जायते, अपितु अस्याः ज्ञानालोकेन आभारतं चकास्ति।

अस्मिन् पुण्यकर्मणि अस्माकं केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिवर्याणां श्रीमतामाचार्यश्रीनिवासवरखेडी-महोदयानां योगदानम् अवर्णनीयमेव वर्तते। तेषामेव औदार्येण संयुक्तांक (२०२१-२२ एवं २०२२-२३) रूपेण अस्याः पत्रिकायाः प्रकाशनं भवति। एतस्मिन् शुभावसरे प्रार्थ्यन्ते परिसरस्य अधिष्ठातृदेवः आशुतोषव्यासेश्वरमहादेवः, भगवतीत्रिपुरसुन्दरीदेवी च। अपि च स्मर्यन्ते परिसरस्य सर्वेऽपि पूर्वप्राचार्याः, आचार्याः, अध्यापकाः, कर्मचारिणः। तेषां समेषां शुभकामनया सहयोगेन च नवम-दशममाङ्कद्वयोः संयुक्तांक-प्रकाशनं भवति। सर्वान्ते प्रकाशनकर्मणि टंकणजन्यदोषात् बुद्धिभ्रमदोषाच्च या अशुद्धयस्ताः स्वयमेव संशोध्य व्यवहरन्तु सुधयः इति अभ्यर्थना।

विनयावनतः

प्रो. मदनमोहनपाठकः

निदेशकः

शिवरात्रिः २०७९

१९ फर. २०२३

विषयसूची (संस्कृतम्)

क्र.सं.	विषय:	शोध-लेखकः	पृष्ठ सं.
1.	असंलक्ष्यक्रमध्वने: वैशिष्ट्यम्	डॉ. वी. बालाजी	7-8
2.	अनुबन्धपरिभाषापञ्चतयी	डॉ. वैथी सुब्रमणियन	9-17
3.	द्वितीयमिथ्यात्वलक्षणम्	के. मनोज्ञा	18-21
4.	श्रीमद्भगवद्गीतायां कर्मयोग:	डॉ. मञ्जुनाथ एस्. जी.	22-25
5.	मूल्याङ्कने मापने च प्रश्नानाम् उपादेयता	डॉ. कृष्णानन्द दन्नाना	26-30
6.	वैदिकज्ञानपरम्पराया: सन्दर्भे वेदानां स्वरूपं महत्त्वञ्च	वेदप्रकाशआर्य:	31-33
7.	वत्सापाकरणविचारपरिशीलनम्	डॉ. आर. सुब्रह्मण्यभिडे	34-36
8.	रत्नावल्यां समाहितानाम् अलङ्काराणां विवेचनम्	देवेन्द्रप्रसाद:	37-45
9.	संस्कृतशिक्षणे गृहकार्यस्य स्वरूपम्	डॉ. सत्यदेव:	46-50
10.	भार्गवराघवीये महाकविरामभद्राचार्यस्य स्वाभिनवभाष्यनैपुण्यम्	डॉ. लक्ष्मीकान्त षडङ्गी	51-56
11.	वर्तमानसंस्कृतशिक्षणे भाषणकौशलस्य परिष्कारार्थम् उपकरणानां पाठ्येतरक्रियाकलापानां च योगदानम्	डॉ. हरि ओम	57-61
12.	श्रीभर्तृहरे: नीतिशतके सत्कर्मण: वैशिष्ट्यम् : एका समीक्षा	डॉ. प्रीतिलक्ष्मीस्वाईं	62-65
13.	ऋतुसंहारकाव्ये प्रथमसर्गे प्रतिपादितानां वनस्पतीनां आयुर्वेददृष्ट्या विवेचनम्	डॉ. नीरजतिवारी	66-72
14.	वास्तुशास्त्रे गृहनिर्माणसम्बद्धवनस्पतीनामुपयोगविमर्श:	अनुराग:	73-74
15.	प्राकृतिकजलसरोवराणामौषधीयमहत्त्वम्	सुशान्तकुमार:	75-76
16.	न्यायसिद्धान्तमुक्तावल्या: पदार्थोद्देशवादे दिनकरी-प्रभा- मञ्जूषाटीकानां समीक्षात्मकमध्ययनम्	सुव्रत-गायेन:	77-79
17.	व्युत्पत्तिवादानुसारेण लृङर्थविमर्श:	डॉ. सन्तुसिंह:	80-81
18.	लक्षणाया वृत्तित्ववावृत्तित्वविमर्श:	प्रलयनन्दी	82-85
19.	स्तोत्र लक्षणं, वेदान्तदेशिककृतदशावतारस्तोत्रञ्च	डॉ. बी. केशवप्रपन्नपाण्डे	86-90
20.	महायानसम्प्रदाये पारमितानां महत्त्वम्	डॉ. प्रदीपकुमारद्विवेदी	91-97
21.	ज्योतिषशास्त्रस्कन्धभेदः तत्प्रतिपाद्यविषयविवेचनञ्च	डा. यज्ञदत्तः	98-100
22.	योगवासिष्ठे मनस्तत्त्वम्	डॉ. दर्शना रॉय:	101-103
23.	आत्मबोधप्रकरणग्रन्थस्य समीक्षात्मकमध्ययनम्	डॉ. योगेश पाण्डेयः	104-107
24.	ऋग्वेदे अलङ्कारवर्णनम्	डां. राहुलकुमारझा	108-109
25.	वेदेषु पर्यावरणविज्ञानम् (Environment Sciences)	केशव कुमार पाण्डेयः	110-112
26.	वेदेषु वृष्टिविज्ञानम् (Meteorology Sciences)	कृष्णकुमारपाण्डेयः	113-115
27.	मोक्षतत्त्वत्वेन अतिथिसत्कारस्य विचारविमर्शो महाभारतदिशा	डॉ. श्याम बाबू	116-118
28.	शङ्कराचार्यकृतस्य वाक्यवृत्तिग्रन्थस्य समीक्षात्मकमध्यनम्	डॉ. सन्दीप चटर्जी	119-124
29.	श्रीपतिभट विरचितज्योतिषरत्नमालाया: समीक्षणम्	आनन्द प्रकाशपाठक:	125-127

विषयसूची (हिन्दी)

क्र.सं.	विषय:	शोध-लेखकः	पृष्ठ सं.
1.	वर्तमान भारतीय शिक्षा पद्धति में नई शिक्षा नीति की प्रासंगिकताः आत्मनिर्भर भारत के संदर्भ में	डॉ. निशू कुमार	128-132
2.	कबीर का समाज दर्शन	कविता कुमारी	133-137
3.	भारत मे सतत विकास की आवश्यकता एवं रणनीति	रवीन्द्र कुमार, सुलेमान	138-146
4.	भारतीय-ज्ञान-परम्परा में स्वास्थ्य चेतना की व्यापकता	डॉ. श्रुतिकान्त पाण्डेय	147-151
5.	युवावर्ग में बढ़ती नशावृत्ति ,ग्रहों का प्रभाव और मानवीय मूल्यों का ह्रास	डिम्पल	152-155
6.	वैदिक शिक्षा दर्शन की तात्त्विक विवेचना	रजनीकान्त दीक्षित, प्रो. चन्दना डे	156-161
7.	वर्तमान परिदृश्य और समकालीन हिन्दी कविता में नारी विमर्श	डॉ. महक	162-164
8.	भारतीय वाङ्मय में योगाङ्ग नियम विवेचन	डॉ. रविकुमार	165-173
9.	उपनिषदों में वर्णित योग के उपाङ्गों का विवेचन	वेदप्रकाश आर्य	174-179
10.	चरित्र निर्माण एवं व्यक्तित्व विकास में आहार की भूमिका	अरविन्द अहिरवार	180-185
11.	ग्रन्थालय विज्ञान के पञ्च सूत्र : साम्प्रतिक उपादेयता	सुधांशु सोनी	186-187

विषयसूची (ENGLISH)

S.N.	TOPIC	Researcher	P. No.
1.	Overcoming Skepsis : Kundalini as a Meshach to Salvation	Suriya R, Aiswarya B, Dr. T. S. Ramesh	188-191
2.	Effect of Yogic Practices with Psycho Neurobics on Blood Pressure (Systolic) & Heart Rate Among Adolescentscepital stressed Girls	K. J. Sridevi, Dr. R. Elangovan	192-197
3.	Environmental thinking in the Light of Vedic Literature	Prabir Sarkar	198-200
4.	Spiritual Insights from Vedas, Upanishads, Puranas and Smritis: Towards a More Sustainable Paradigm	Dr. Prashant Dwivedi	201-204
5.	Prelude of Covid-19 On Agribusiness Supply Chain-Evidence From Literature	Kamlendra Kumar Verma, Prof. C.B. Singh	205-208
6.	Improved Sleep Quality and Mood On Fasting Blood Glucose, Acute and Sustained Phases of Insulin Release among Pre-Diabetes : An Observation from A Yoga and Walking Based Rct	Jintu Kurian*[1], Ramesh Mavathur Nanjundaiah[1], Utpala Karanth[2], Venugopal Vijayakumar[3]	209-217

7.	Effects of Yoga on worry, Positive and Negative Affectivity in adolescence girls with visual impairment: A Randomized Controlled Trial	Madhuri paragkelkar 1 , Sowjanya Mallempati 1 *, Soubhagyalaxmi Mohanty 1	218-222
8.	New education policy: challenge and opportunities in 21st century	Dr. Anamika Chauhan	235-225
9.	A Study of Anxiety and Mental Health of Sportspersons	Dr. Sanjay Kumar	226-230
10.	Value of Mistakes in Human Life	Dr. Somnath Das	231-234
11.	The Great Woman Characters in Abhijnanasakuntalam and Kumarasambhavam	Supriya Roy	235-237
12.	Nature and Environment Reflected in Kumarasambhava	Dr. Arnav Patra	238-239
13.	The Role of Public Library Management and Services	Rajdarshini Mekap	240-243
14.	Religion and Moral Values: Special Reference with Indian Tradition	Dr. Nasiruddin Mondal	244-249
15.	INTERPRETATION OF BAL-GRAHA IN AYURVEDA	Dr. Prem Shanker Upadhyay	250-253
16	Study of Anthropometric Parameters in Relation to Prakriti (Somatic Constitution) of Children : A Review	Aanmoul Neidhhii Dr. Prem Shanker Upadhyay	254-257
17.	An Analysis of Financial Inclusion in India	Dhananjay Kumar Jha1 Prof. Arun Kant Gautam2	258-264
18.	Elements of Sanskrit Poetics in John Donne's poem 'The Canonization'	*Dr. Richa Biswal	265-271

1. असंलक्ष्यक्रमध्वनेः वैशिष्ट्यम्

डॉ. वी. बालाजी

सहायकाचार्यः, संस्कृतविभागः,

द्वा. दो. गो. दो. वैष्णवमहाविद्यालयः, अरुंबक्कम्, चेन्नई

''अदोषौ शब्दार्थौ काव्यम्'' इति काव्यस्य सामान्यलक्षणं सर्वसंमतं भवति। कौ तौ शब्दार्थौ इत्याकाङ्क्षायां, तदुक्तं काव्यप्रकाशे –

''स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा[1]''

तत्र वाचक, लक्षक, व्यञ्जक इति शब्दत्रयं भवति। तदाधारीकृत्य वाच्य, लक्ष्य, व्यङ्य इति अर्थत्रयमपि भवति। तेषु व्यङ्ग्यार्थाः उक्तार्थत्रयादाविर्भवति। अर्थात् सर्वेषामप्यर्थानां व्यञ्जकत्वं सम्भवति। तदप्युक्तं तत्रैव –

''सर्वेषां प्रायशोर्थानां व्यञ्जकत्वमपीष्यते[2]''

इति। ततः परं उत्तम, मध्यम, अधम नाम्ना काव्यभेदाः कृताः। तेषु उत्तमकाव्यस्य लक्षणम् एवमुक्तं –

''इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्यात् ध्वनिः इति बुधैः कथितः[3]''

इति। अर्थस्तु–यस्मिन् काव्ये वाच्यात् व्यङ्ग्यप्राधान्यं वरीवर्ति, तत्काव्यम् उत्तमकाव्यमिति। एवं अयमेव विषयःपूर्वमेव ध्वन्यालोके च–

''यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतः स्वार्थौ।

व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः।।[4]''

इत्युक्तं भवति। ततः परं ध्वनेः विभागः कृतः, अविवक्षितवाच्यः, विवक्षितान्यपरवाच्यः इति। ततः परं तयोः अवान्तरभेदाः कृताः। तेषु भेदेषु केषाञ्चन भेदानां लक्षणं सोदाहरणं निरूपितं भवति। तेष्वुदाहरणेषु नाटकीयश्लोकाः उद्धृताः भवन्ति। तेषां विषये किञ्चित् पश्यामः।

तत्र ध्वन्यालोके तृतीये उद्योते असंलक्ष्यक्रमध्वनेः वस्तुद्वारा पारम्पर्येण व्यञ्जकान् वदति –

''सुप्-तिङ्-वचन-संबन्धैः तथा कारकशक्तिभिः।

कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्।।[5]''

अयं भावः–

तत्र सुपः स्वौजसादयः एकविंशतिः, तिङः तिप्तस्झिप्रभृतयः अष्टादश, वचनान्येकवचनप्रमुखानि त्रीणि, सम्बन्धाः स्वस्वामिभावादयः षष्ठ्यर्थाः, तैस्तथा कारकशक्तिभिः कर्तृत्वादिभिः षड्भिः, कृतः – कर्तृकर्मभावादिषु विहिताः धातोः प्रातिपदिकत्वसम्पादकाः प्रत्ययाः, तद्धितस्त्वलादयः, समासाः अव्ययीभावादयः षड्विधाः, चकारात् निपाताः, अद्रव्यार्थाश्चादयः,उपसर्गाः क्रियायुक्ताः प्रादयः, कालाः भूतादयः, आदि शब्दात् प्रकृतयः सर्वनामानि, इत्येतैः क्वचित् अलक्ष्यप्रमव्यङ्यः रसादिध्वनिः द्योत्यो भवति इत्यर्थः।।

इदानीं तेषां सुबादीनां व्यञ्जकत्वं श्लोकेन अनेन उच्यते। हनूमन्नाटके लङ्कायां रामविक्रमेण निर्विण्णस्य रावणस्योक्तिरूपमिदं पद्यं –

''न्यक्कारो ह्ययमेव मे यदरयः तत्राप्यसौ तापसः

सोप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।

धिग्धिक्कृच्छ्रजितं प्रबोधितवता किं कुम्भकर्णेन वा

स्वर्गग्रामटिकाविलुण्ठनवृथोच्छ्रूनैः किमेभिर्भुजैः।।[6]''

अस्यार्थः –

प्रथमतस्तु निर्जिताखिललोकस्य मे अयमेव महाननादरः यत् मे शत्रवः सन्ति इति। तत्र अरयः इत्यनेन बहुसङ्ख्यकाः वानराः सन्ति इति आपाततोर्थः अपि तु एकः रामः तेन भयात् बहुधा दृष्टमिति कारणात् बहुवचनप्रयोगः, अतः बहुसङ्ख्यकाः द्विषः सन्ति मे अपरः न्यक्कारः। अरिष्वपि कश्चिद्धीरो भूपतिः स्यात् तत्प्रधानश्चेत् न तथा अनादरः स्यात्, किन्तु वनेचरः तपस्वी इति मे अपरः तिरस्कारः। सोऽपि दूरे काननादौ स्यात् चेत् न तथा परिभवः, किन्तु सः लङ्कायां मत्समक्षमेव तिष्ठति इति मे अन्यः अनादरः। सोऽपि अत्र केवलं तिष्ठति चेत् न तथा तिरस्कारः भवेत्, किन्तु मां विक्रमयति इति मे अपरः अपमानः। विक्रमेऽपि यदि सः एकं द्वौ वा राक्षसौ निहन्यात् न तथा परिभवः भवेत्, किन्तु राक्षसानां कुलमेव निश्शेषेण हन्तीति मे अन्यस्तिरस्कारः। तथाभूते सत्यपि राक्षसेन्द्रः रावणः जीवतीति महदाश्चर्यं भवति। रणमुखे शक्रमपि जित्वा प्राप्तख्यातिं मेघनादमपि धिक्काराः यो हि तापसमेकं जेतुं न अशकत्। महता प्रयत्नेनोत्थापितः कुम्भकर्णोऽपि न कस्मैचिदपि प्रयोजनाय अभवत्।

अथवा किमन्येषां गर्हणैः फलं, विशालमपि स्वर्गं क्षुद्रग्रामवत् सर्वतो विधूननेन व्यर्थमेव स्फीतैः मे बाहुभिः किं फलं सञ्जातं यैः तापसमेकमपि नैव पराजितं भवति इति श्लोके भूयसा सर्वेषामप्येषां स्फुटमेव व्यञ्जकत्वम्। इतः परं क्रमशः व्यङ्ग्यं दर्शयति।

तत्र ''मे यदरयः'' इत्यनेन सुप्-संबन्धवचनानामभिव्यञ्जकत्वं भवति। तत्र ''मे'' इत्यत्र ङस् विभक्तिः सुप्, अरिभिः सह इति वध्यघातकभावसंबन्धः सूचितः। एवं ''अरयः'' इति बहुवचनं, एवकारश्च सम्भूय न्यक्कारान्तरासम्भवद्वारा स्वपराक्रमातिरेकं, त्रैलोक्याद्वितीयविक्रमेण स्वेन सह एकस्यऽपि वध्यघातकभावानौचित्यं किं पुनः बहूनाम् इति सूचयन्ति।

एवं ''तत्राप्यसौ तापसः'' तद्धितनिपातयोःव्यञ्जकत्वम्। तत्र तद्धितस्तापसशब्दे अण् प्रत्ययः, अपि शब्दो निपातः, एतौ च असौ इति सर्वनाम्नः उपलक्षणम्। ते च अतिविक्रान्तनृपतेः धीरस्य कथञ्चिदभ्युपगन्तव्यं, तपोमात्रसाधनस्य युद्धानभिज्ञस्य तया तदनौचित्यं, मानुष्येण भक्ष्यत्वं च व्यञ्जयन्ति।

एवं ''अत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः'' इत्यत्र ''निहन्ति'', ''जीवति'' इत्यत्र तिङ् निर्देशः कृतः, ''अत्र'' इति अधिकरणत्वस्य, राक्षसकुलमिति कर्मत्वस्य च कारकशक्तेः व्यञ्जकत्वं संभवति। एतच्च एवकारस्य, ''नि'' इत्युपसर्गस्य जीवधातोः, ''अहो'' इत्यव्ययस्य, रावणपदस्य उपलक्षणं भवति। तथा च – मदनधिष्ठिते देशे यदि सः तिष्ठेत्, अत्र स्थितोऽपि यदि तूष्णीं भवेत्, अतूष्णीम्भावेऽपि राक्षसान् यदि न हन्यात्, कस्यचिदेकस्य हननेऽपि तत्कुलमामूलं यदि सम्प्रत्येव न विनाशयेत्, तथाभावेऽपि यदि त्रैलोक्याद्भुतविक्रमो रावणनामाहं प्राणान् न धारयेयं, तदैतत् कथञ्चन संघटेत। न तु तथा तदद्भुतमेवेदं मत्प्राख्यातशौर्यप्रतिकूलमखिलम् आपतितम् इत्यादयोर्थाः व्यञ्जयन्ते।

एवं ''धिक् धिक् शक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा। स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिः भजैः'' इति श्लोकस्योत्तरार्धे कृत्तद्धितसमासोपसर्गाणां व्यञ्जकत्वं सङ्गच्छते। तत्र ''धिक् धिक्'' इत्यव्ययस्य, शक्रशब्दस्य,प्रबोधितः इत्यादौ प्रेरणार्थकणिचः उपयोगः कृतः, स्वर्गे ग्रामटिकात्वारोपस्य, ''भुजैः'' इति बहुवचनस्य च उपलक्षणं भवति। तथा हि – शक्नोत्यरीन् जेतुमिति व्युत्पत्या शक्रस्य दुर्जयत्वं, शक्रं जितवानिति शक्रजिदिति क्विपा तद्विजयस्य कृतपूर्वत्वं, तेन मेघनादस्य शौर्यप्रकर्षेण रामविजयसौकर्यं, तदनाचरणं धिक् धिक् इति वीप्सया तस्य गर्हणीयतमत्वं, णिचा, क्तवतुना ''प्र'' इत्युपसर्गेण च कुम्भकर्णजागरणे फलविशेषाशया बहुलाऽऽयासकरणं, प्रबोधस्य भूतकालकत्वेन सिद्धत्वं, तस्य सर्वथा त्यक्तनिद्रत्वं च द्योत्यते। ततः क्षुद्रतापसस्य झटिति विजेयत्वं, तदनुष्ठाने तत्सर्वनैष्फल्यम्, तेन निन्द्यतातिशयः व्यङ्ग्यः, स्वर्गे ग्रामटिकात्वारोपेण सुजयत्वं, ''वि'' उपसर्गेण लुण्ठनस्य व्यापकतामुखेन स्वर्गस्य स्थूनामात्रावशेषत्वं, बहुत्वेन, उच्छूनत्वेन च भुजानामेकतमेनापि सुकरस्य तज्जयस्य, एवं मिथः सहचरितैः बहुभिरप्यकरणात् वृथायुद्धकण्डूतिवहनाच्च व्यर्थत्वपुष्टत्वद्वारा वचनीयत्वप्रकर्षः समस्तवाक्येन कुत्सिताधिक्येन स्वक्रोधोद्भवौचित्यं, तेन रौद्ररसः, पुनर्युद्धोत्साहः, वीररसश्च व्यज्यते।

एवं पूर्वोक्तवत् अनेकबहुव्यञ्जकरसानुभवश्लोकाः काव्येषु उपलभ्यन्ते। परन्तु सूक्ष्मेक्षिकया एव श्लोके विद्यमान निगूढार्थानां अवगतिः सञ्जायते, अर्थात् व्यङ्ग्यार्थस्य ज्ञानं संप्राप्यते अनुभूयते च इति। सूक्ष्मेक्षिकावलोकनं तु न सामान्यस्य भवति, अत्रोक्तसामान्यपदं केवलशब्दार्थज्ञानविषययुक्तं द्योतयति। तदप्युक्तं ध्वन्यालोके –

''शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।

वेद्यते स तु काव्यार्थतत्वज्ञैरेव केवलम्''।।[7]

इति। तत्र व्यङ्ग्यार्थस्य वेदनं काव्यार्थतत्वज्ञविषयं भवति। तदर्थं सूक्ष्मेक्षिका आपेक्षते, तत्तावत् प्रज्ञानवनवोन्मेषशशालिनीरूपप्रतिभया एव सञ्जायते। तदप्युक्तं तत्रैव ''अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषं'' इति। अतः प्रथमम् आचार्येण श्लोके विद्यमानव्यङ्ग्यार्थाः अवगन्तव्याः, तदर्थं सः प्रतिभामपेक्षते। यदि सः प्रतिभां संपादयेत् (प्रतिभायुक्तः भवेत्),स्वीय प्रतिभया व्यङ्ग्यार्थानपि अवगमयति चेत्, तर्हि तेन व्यङ्ग्यार्थप्रदर्शकश्लोकाः पाठयितव्याः। तदा छात्रावगमने विघ्नाः सञ्जायन्ते। तेषु कक्ष्यायां द्वित्राः छात्राः पूर्वमेव साहित्ये प्रकरणग्रन्थान् संयक् पठित्वा भवन्ति चेत् तस्य किञ्चित् सुलभावगमनाय भवेत्, नास्ति चेत् सर्वछात्रावगमनाय आचार्येण प्रयत्नः विधेयः।

पादटिप्पणी

1. का .प्र 1 उद्योतः।
2. का. प्र 1 उद्योतः ।
3. का. प्र 1 उद्योतः ।
4. ध्वनि 1 उद्योतः ।
5. ध्वनि 3 उद्योतः ।
6. हनुमन्नाटकम्
7. ध्वन्यालोकः 1 उद्योतः

****

2. अनुबन्धपरिभाषापञ्चतयी

डॉ. वैथी सुब्रमणियन्

सहायकाचार्यः, संस्कृतविभागः

हिमाचलप्रदेशकेन्द्रियविश्वविद्यालयः, धर्मशालाः

पाणिनिः संस्कृतभाषायै व्याकरणं व्यरीरचत् अष्टाध्यायी नाम्ना ग्रन्थेन। तत्र शब्दनिष्पत्तये पाणिनिः शास्त्रकरणीभूताः उपदेशाः धातुप्रातिपदिकप्रत्ययादेशागमाः अनेके प्रोक्ताः। तेषु धातुप्रातिपदिकप्रत्ययादेशागमेषु तत्र तत्र अनुबन्धाः अर्थात् इत्संज्ञकाः इत्संज्ञकाः वर्णाः आसञ्जिताः पाणिनिना। आसञ्जितानां तेषाम् अनुबन्धानाम् आवश्यकता, तेषां सत्त्वे उपयोगः, प्रतिबन्धः, प्रतिबन्धे सति तत्परिहारः च कथमिति अत्र निबन्धे स्पष्टीभवति।

विषयवस्तुपरिचयः-

पाणिनिविरचितव्याकरणशास्त्रेऽस्मिन् पाणिनिना शास्त्रकरणीभूतेषु उपदेशेषु अनुबन्धाः अर्थात् इत्संज्ञकाः वर्णाः आसञ्जिताः। यथा धातौ – डुकृञ् इत्यत्र डु इत्यस्य ञ्कारस्य, प्रातिपदिके – नदट् इत्यत्र टकारस्य, प्रत्यये – अण् इत्यत्र ण्कारस्य, आदेशे – शी इत्यत्र शकारस्य, आगमे – नुट् इत्यत्र टकारस्य इत्संज्ञा भवति। इत्थम् उपदेशभूतेषु धातुप्रातिपदिकप्रत्ययादेशागमेषु इत्संज्ञकाः वर्णाः आसञ्जिताः, तान् इत्संज्ञकान् वर्णान् निमित्तीकृत्य अनेके विधयः प्रवर्तेरन्। एवञ्च शास्त्रकार्यनिर्वाहाय आसञ्जिताः एते इत्संज्ञकाः वर्णाः उपस्थापकस्य अवयवाः उत अनवयवाः इति संशयः जायते। 1. अनेकान्ताः अनुबन्धाः इति परिभाषया इत्संज्ञकानाम् उपस्थापकानवयवत्वं व्यवस्थाप्यते, 2. एकान्ताः अनुबन्धाः, इति परिभाषया इत्संज्ञकानाम् उपस्थापकावयवत्वं व्यवस्थाप्यते। आभ्यां परिभाषाभ्याम् इत्संज्ञकानाम् अनवयवत्वावयवत्वे व्यवस्थाप्य पक्षद्वयेऽपि दोषमुद्भाव्य अवयवत्वपक्षमेव सिद्धान्तीकृत्य तस्मिन् पक्षे दोषस्य न्यूनत्वेऽपि तेषां दोषाणां परिहाराय नानुबन्धकृतमनेकाल्त्वम्, नानबन्धकृतमनेजन्तत्वम्, नानुबन्धकृतमसारूप्यम् इति तिस्रः परिभाषाः आरब्धाः सन्ति। एतत्सर्वमत्र निरूप्यते।

विषयवस्तुबिन्दवः -

1. अनेकान्ताः अनुबन्धाः इति परिभाषार्थः।
   - 1.1. उपस्थापकस्य अनवयवत्वसाधनम्।
   - 1.2. अनवयवत्वसाधकव्यवहाराः त्रयः।
     - 1.2.1. प्रथमः व्यवहारः।
     - 1.2.2. द्वितीयः व्यवहारः।
     - 1.2.3. तृतीयः व्यवहारः।
   - 1.3. अनवयवत्वपक्षे प्रसक्ताः त्रयः दोषाः।
     - 1.3.1. प्रथमः दोषः।
     - 1.3.2. द्वितीयः दोषः।
     - 1.3.3. तृतीयः दोषः।
2. एकान्ताः अनुबन्धाः इति परिभाषार्थः।
   - 2.1. अनुबन्धानाम् अवयवत्वसिद्धिः।
   - 2.2. अनवयवत्वसाधकनिर्देशाः त्रयः।
     - 2.2.1. प्रथमः निर्देशः।
     - 2.2.2. द्वितीयः निर्देशः।

2.2.3. तृतीयः निर्देशः।

3. अनवयवत्वपक्षदोषाणामत्र पक्षे अभावः।

4. अवयवत्वपक्षे प्रसक्ताः त्रयः दोषाः।

4.1. प्रथमः दोषः।

4.2. द्वितीयः दोषः।

4.3. तृतीयः दोषः।

5. अवयवत्वपक्षे प्रसक्तदोषवारिकाः तिस्रः परिभाषाः।

5.1. नानुबन्धकृतमनेकाल्त्वम्।

5.1.1. परिभाषार्थः।

5.1.2. परिभाषारम्भप्रयोजनम्।

5.1.3. ज्ञापकम्।

5.1.4. स्वांशे चारितार्थ्यम्

5.1.4. अन्यत्रफलम्।

5.1.5. इत्संज्ञायोग्यत्वमेवानुबन्धत्वम्।

5.1.6. डाप्रभृतीनाम् वर्णप्रश्लेषेण सर्वादेशत्वम्।

5.2. नानुबन्धकृतमनेजन्तत्वम्।

5.2.1. परिभाषार्थः।

5.2.2. परिभाषारम्भप्रयोजनम्।

5.2.3. ज्ञापकं तत्चारितार्थ्यञ्च।

5.3. नानुबन्धकृतमसारूप्यम्।

5.3.1. परिभाषार्थः।

5.3.2. परिभाषारम्भप्रयोजनम्।

5.3.3. ज्ञापकम्।

5.3.5. स्वांशे चारितार्थ्यम्।

5.3.4. अन्यत्रफलम्।

विषयवस्तु–

1. अनेकान्ताः अनुबन्धाः इति परिभाषार्थः–

1.1. उपस्थापकानवयवत्वसाधनम्–

अनुबन्धाः अनवयवाः इति व्यवस्थाप्यते अनेकान्ताः अनुबन्धाः[1] इति परिभाषया । पाणिनेः व्यवहारात् इत्संज्ञकाः वर्णाः उपस्थापकस्य अनवयवाः इति प्रतीयन्ते। अत्र त्रिभिः पाणिनीयव्यवहारैः अनुबन्धानाम् उपस्थाकानवयवत्वम् उपस्थाप्यते। अनुबन्धाः उपस्थापकस्य अनवयवाः उपस्थाप्ये तदर्थभूते विधेये लक्ष्ये अदर्शनात् अश्रवणात् इति अनेन हेतुना अनुबन्धानाम् उपस्थाकानवयवत्वं सिद्धम्। अत्र प्रश्नः समुदेति यत् अनुबन्धानाम् उपस्थाप्ये अदर्शनरूपेण हेतुना उपस्थापकानवयवत्वं कथं साधयितुं शक्यते इति। सूत्रेषु श्रुयमाणः शब्दः उपस्थापकः वाचकः, लक्ष्ये श्रुयमाणः उपस्थाप्यः वाच्यः। शब्दार्थयोः उपस्थापकोपस्थाप्ययोः वाच्यवाचकभावः तादत्म्यम् इति संबन्धद्वयमपि अत्र शास्त्रे अङ्गीक्रियते।

शब्दार्थयोः भेदे वाच्यवाचकभावः इति संबन्धः। शब्दार्थयोः अभेदे सति तादात्म्यम् इति। एवञ्च अस्मिन् तादात्म्याख्ये पक्षे उपस्थापकोपस्थाप्ययोः अभेदात् उपस्थाप्ये अनुपलम्भेन हेतुना उपस्थापकानवयवत्वं साधयितुं सुशकमेव। इत्थम् अनेन हेतुना अनुबन्धानाम् अनवयवत्वं साधितम्।

1.2. अनवयवत्वसाधकव्यवहाराः त्रयः–

1.2.1. प्रथमः व्यवहारः–

अधुना त्रिभिः पाणिनीयव्यवहारैः अनुबन्धानाम् उपस्थाकानवय–वत्वम् उपस्थाप्यते। यदि एते अनुबन्धाः अवयवाः स्युः उदीचां माङे व्यतिहारे[2] इति निर्देशोऽनुपपद्यते । मेङ्धातोः एकारस्य आकारादेशः भवति आदेच उपदेशेऽशिति[3] इति सूत्रेण। अनुबन्धस्य डकारस्य मेङ्धातोः अवयवत्वेन मेङ्धातोः एजन्तत्वाभावात् माङ इति कृतात्वनिर्देशोऽनुपपन्नः। तस्य धात्वनवयवत्वे तु धातोः एजन्तत्वात् आत्वमत्र सुलभमेव। अतः माङः इति निर्देशात् अनुमीयते यत् अयम् इत्संज्ञकः ङकारः मेङ्धातोः अनवयवः इति।

1.2.2. द्वितीयः व्यवहारः –

यदि एते अनुबन्धाः अवयवाः स्युः तर्हि उपदेशेऽजनुनासिक इत्[4] इत्यस्मिन् सूत्रे उपदेशग्रहणं व्यर्थं स्यात्। उपदेशग्रहणस्य आवश्यकतां निरूप्य अनुबन्धस्य अवयवत्वे तद्वैयर्थ्यं प्रदर्श्यते। उपदेशग्रहणाद्धि अभ्र आँ अटितः इत्यत्र अट्धातोः आदितश्च[5] इत्यनेन इण्निषेधाप्रवृत्तिः भवति। अभ्र आ अटितः इति स्थिते निरनुनासिकस्य आकारस्य आङोऽनुनासिकश्छन्दसि[6] इति सूत्रेण अनुनासिकाकारे अभ्र आँ अटितः इति जाते अनुनासिकस्य आकारस्य इत्संज्ञाव्यावृत्त्यर्थम् उपदेशग्रहणम्। अपदेशावस्थायां आकारस्य अनुनासिकत्वाभावात् न तस्य इत्संज्ञा इति तत्प्रयोजनम्। अन्यथा तस्य आकारस्य इत्संज्ञायां सत्यामपि अनुबन्धानाम् अवयवत्वपक्षे आदितश्च इत्यस्य इत्संज्ञकाकारावयवात् धातोः परस्य वलाद्यार्धधातुकस्य इण्न स्यात् इत्यर्थात् तस्य आकारस्य अट्धात्वयवत्वाभावात् इण्निषेधाप्रसक्तिरिति तस्य आकारस्य इत्संज्ञायामपि अवयवत्वपक्षे दोषाभावात् उपदेशग्रहणं व्यर्थम्।

उपदेशग्रहणाभावे तस्य आकारस्य इत्संज्ञायां सत्याम् अट्धातोः अनवयवत्वात् अट्धातोः आदित्त्वात् आदितश्च इत्यनेन इण्निषेधः स्यात्। अनुबन्धानाम् अनवयवत्वपक्षे आदितश्च इत्यस्य इत्संज्ञकाकारसमीप–वर्तिनः धातोः परस्य वलाद्यार्धधातुकस्य इण्न स्यात् इत्यर्थात् अट्धातोः आदित्त्वात् इण्निषेधप्रवृत्त्या तदप्रवृत्तये तत्र अट्धातोः आदित्त्ववारणाय आकारस्य इत्संज्ञावारणाय उपदेशग्रहणम् आवश्यकम् इति येन अट्धातुः आदित् न स्यात् येन आदितश्च इत्यस्य अप्रवृत्तिः स्यात्। एवञ्च उपदेशग्रहणस्य हि अनवयवत्वपक्षे एव सार्थक्यं, न तु अवयवत्वपक्षे इति पाणिनिना कृतम् उपदेशग्रहणं अनुबन्धानाम् अनवयवत्वपक्षमेव द्रढयति।

1.2.3.तृतीयः व्यवहारः –

किञ्च अनुबन्धानाम् अवयवत्वे औश्प्रभृतीनाम् आदेशानाम् अनेकाल्त्वात् तेषां सर्वादेशत्वे सिद्धे अनेकाल्शित् सर्वस्य इत्यस्मिन् सूत्रे शिद्ग्रहणं व्यर्थम्। एवञ्च माङ्निर्देशात्, उपदेशग्रहणात्, शिद्ग्रहणात् च एतैः त्रिभिः प्रमाणैः अनुबन्धानाम् अनवयवत्वं सिद्धम्।

1.3. अनवयवत्वपक्षे प्रसक्ताः त्रयः दोषाः –

1.3.1. प्रथमः दोषः–

इत्थम् अनुबन्धानाम् अनवयवत्वे सिद्धे पक्षेऽस्मिन् दोषाः जायन्ते। शित् कित् इत्यादौ षष्ठ्यर्थे बहुव्रीहिसमासो नोपपद्यते । यदवयवशकारः इत् इत्यर्थकस्य विग्रहस्य श् इत् यस्य सः इत्यस्य, यदवयवककारः इत् इत्यर्थकस्य विग्रहस्य क् इत् यस्य सः इत्यस्य असंभवात्। षष्ठ्याः अवयवार्थकत्वात्, सामीप्यार्थकत्वाभावात् च। अतः अत्र समीपार्थे अवयवत्वारोपेण षष्ठ्यर्थे बहुव्रीहिसमासः वक्तव्यः। यत्समीपवर्तिशकारः इत् सः शित्, यत्समीपवर्तिककारः इत् सः कित् इति विग्रहः कर्तव्यः।

1.3.2. द्वितीयः दोषः –

यद्येवमत्र समीपार्थे अवयवत्वारोपेण षष्ठीसमास उच्यते तर्हि वुञ्छण्कठजिलसेनिरढञ्ययफक्फिञिञ्यकक्ठकोऽरीहण–कृशाश्वर्यकुमुदकाशतृणप्रेक्षाश्मसखिसङ्काशबलपक्षकर्णसुतङगप्रगदिन्वराहकुमुदादिभ्यः[7] इत्यस्मिन् सूत्रे वुञ्छण्कठजिल इत्यत्र णित्त्वप्रयुक्तकार्यं छप्रत्ययस्य वा कप्रत्ययस्य वा इति संशीतिः भवति। यतः णित् इत्यस्य यत्समीपवर्तिणकारः इत् सः इत्यर्थात् छप्रत्ययस्यापि कप्रत्ययस्यापि णकारसमीपवर्तित्वात् णित्त्वप्रयुक्तं कार्यं कस्य इति अत्र संशयः भवत्येव।

1.3.3. तृतीयः दोषः –

हलन्त्यम् इत्यत्र च अन्त्यशब्दस्य चरमावयवार्थकत्वं नोपपद्यते। अतः तदर्थं परित्यज्य अन्त्यशब्दस्य परसमीपे लक्षणा वक्तव्या। इत्येवं दोषाः अनुबन्धानाम् अनवयवत्वे जायन्ते।

2. एकान्ताः अनुबन्धाः इति परिभाषार्थः –

अनुबन्धाः अवयवाः इति व्यवस्थाप्यते एकान्ताः अनुबन्धाः[8] इति परिभाषया। पाणिनेः व्यवहारात् अनुबन्धाः इत्संज्ञकाः वर्णाः अवयवाः इति प्रतीयन्ते। एकान्ताः नाम अवयवाः। अयमेव पक्षः न्याय्यः। अनुबन्धानाम् अवयवत्वसाधकः हेतुः कः इति चेदुच्यते – इदम इश् इत्यादिशास्त्रघटके इश् इत्यादिषु उपस्थापकेषु उपलभ्यते। तस्य लोपः इति शास्त्रेण लोपज्ञानात् पूर्वम् उपस्थापके उपलभ्यते। यथा छेदनरूपयत्नाभावे वृक्षे अवयविनि सर्वदा शाखायाः उपलम्भात् शाखायाः वृक्षावयवत्वं सिद्धं तथा तस्य लोपः इति शास्त्रेण लोपज्ञानात् पूर्वम् इत्संज्ञकः वर्णः सर्वदा उपस्थापके उपलभ्यते इति अनुबन्धस्य उपस्थापकावयवत्वं सिद्धम् । अवयविनि दर्शनादर्शनयोः एव अवयवानवयवसाधकः हेतुः। अतः अवयवित्वेनाभिमते उपस्थापके इत्संज्ञकस्य वर्णस्य दर्शनात् तद्भिन्ने उपस्थाप्ये अर्थात् लक्ष्ये श्रूयमाणे विधेये अदर्शनेऽपि अवयवत्वसाधने न काचित् क्षतिः।

2.2. अनवयवत्वसाधकनिर्देशाः त्रयः –

2.2.1. प्रथमः निर्देशः –

अधुना त्रिभिः पाणिनीयनिर्देशैः अनुबन्धानाम् अवयवत्वं व्यवस्थाप्यते। अनुबन्धानाम् अवयवत्वादेव तस्य लोपः[9] इति सूत्रं सार्थकतां भजते। तेषाम् अवयवत्वात् अवयवानां स्वतः निवृत्त्यसंभावात् तेषाम् उपस्थाप्यात् अपनोदनार्थं तस्य लोपः इति शास्त्रम् आवश्यकमेव। अतः तस्य लोपः इति शास्त्रारम्भ एव अनुबन्धानाम् अवयवत्वे प्रमाणम्।

2.2.2. द्वितीयः निर्देशः –

यदि अनुबन्धाः अनवयवाः स्युः तर्हि आटश्च[10] इति निर्देशासङ्गतिः। तेषाम् अनवयवत्वे आट् इति शब्दस्य अर्थवत्त्वाभावात् प्रातिपदिकसंज्ञायाः अभावात् तस्मात् ङसिप्रत्यये आटः इति निर्देशः अनुपपद्यते। आट् इति समुदायात् विभक्तिनिर्दशात् अनुमीयते यत् ट्कारः इत्संज्ञकः आकारावयवः इति।

2.2.3. तृतीयः निर्देशः –

यदि अनुबन्धाः अनवयवाः स्युः तर्हि अवयवत्वबोधकान्त्यपद–घटितं हलन्त्यम् इति सूत्रमेव असङ्गतं स्यात्। अतः तत्साङ्गत्योपपत्तये अनुबन्धानाम् अवयवत्वं स्वीकार्यमेव । एवञ्च एभिः प्रमाणैः अनुबन्धानाम् अवयवत्वं सिद्धम्।

3. अनवयवत्वपक्षदोषाणामत्र पक्षे अभावः–

अत्र पक्षे अनुबन्धानाम् अनवयवत्वे ये दोषाः उक्ताः ते च अत्र न भवन्ति इति प्रतिपाद्यते अधुना। शित् कित् इत्यादौ च अवयवे समीपारोपं विनैव न्यायतः अत्र बहुव्रीहिः उपपद्यते। यदवयवः शकारः इत् सः शित् , यदवयवककारः इति सः कित् इत्यर्थकविग्रहश्च अत्र सुलभा एव। अतः वुञ्छण्कठजिल अन्त्यशब्दे परसमीपे लक्षणा, आदिशब्दे पूर्वसमीपे लक्षणा च नाश्रयणीया। तेषां शब्दानां स्वाभाविकावयवार्थकत्वादेव सर्वोऽपि व्यावहारः सूपपद्यते। इत्थम् अनुबन्धानाम् अवयवत्वपक्षे, पूर्वोक्तानवयवत्वपक्षोक्ताः दोषाः न सन्ति।

4. अवयवत्वपक्षे प्रसक्ताः त्रयः दोषाः–

4.1.प्रथमः दोषः –

परन्तु एतस्मिन् अवयवत्वपक्षे त्रयः दोषाः जायन्ते। प्रथमः दोषस्तु उदीचां माङो व्यतिहारे इति निर्देशोऽनुपपद्यते। मेङ्धातोः एकारस्य आकारादेशः भवति आदेच उपदेशेऽशिति इति सूत्रेण। अनुबन्धस्य ङ्कारस्य मेङ्धातोः अवयवत्वेन मेङ्धातोः एजन्तत्वाभावात् माङ इति कृतात्वनिर्देशोऽनुपपन्नः।

4.2. द्वितीयः दोषः–

द्वितीयः दोषस्तावत् उपदेशेऽजनुनासिक इत् इत्यस्मिन् सूत्रे उपदेशग्रहणं व्यर्थं स्यात्। उपदेशग्रहणस्य आवश्यकतां निरूप्य अनुबन्धस्य अवयवत्वे तद्वैयर्थ्यं प्रदर्श्यते। उपदेशग्रहणाद्धि अभ्र आँ अटितः इत्यत्र अट्धातोः आदितश्च इत्यनेन इण्निषेधाप्रवृत्तिः भवति। अभ्र आ अटितः इति स्थिते निरनुनासिकस्य आकारस्य आडेऽनुनासिकश्छन्दसि इति सूत्रेण अनुनासिकाकारे अभ्र आँ अटितः इति जाते अनुनासिकस्य आकारस्य इत्संज्ञाव्यावृत्त्यर्थम् उपदेशग्रहणम्। अपदेशावस्थायां आकारस्य अनुनासिकत्वाभावात् न तस्य इत्संज्ञा इति तत्प्रयोजनम्। अन्यथा तस्य आकारस्य इत्संज्ञायां सत्यामपि अनुबन्धानाम् अवयवत्वपक्षे आदितश्च इत्यस्य इत्संज्ञकाकारावयवात् धातोः परस्य वलाद्यार्धधातुकस्य इण्न स्यात् इत्यर्थात् तस्य आकारस्य अट्धात्वयवत्वाभावात् इण्निषेधाप्रसक्तिरिति तस्य आकारस्य इत्संज्ञायामपि अवयवत्वपक्षे दोषाभावात् उपदेशग्रहणं व्यर्थम्।

4.3. तृतीयः दोषः –

तृतीयः दोषो भवति अयम् – औश्प्रभृतीनाम् आदेशानाम् अनेकाल्त्वात् तेषां सर्वादेशत्वे सिद्धे अनेकाल्शित् सर्वस्य इत्यस्मिन् सूत्रे शिद्ग्रहणं व्यर्थम्।

5.अवयवत्वपक्षे प्रसक्तदोषवारिकाः तिस्त्रः परिभाषाः –

एवञ्च एतेषु दोषेषु प्रसक्तेषु तिस्त्रः परिभाषाः आरभ्यन्ते – नानुबन्धकृतमनेकाल्त्वम्, नानुबन्धकृतमनेजन्तत्वम्, नानुबन्धकृतमसारूप्यम् इति।

5.1.नानुबन्धकृतमनेकाल्त्वम् –

5.1.1.परिभाषार्थः –

तत्र आदौ नानुबन्धकृतमनेकाल्त्वम्[11] इति परिभाषात्र निरूप्यते। न अनुबन्धकृतम् अनेकाल्त्वम् इति त्रीणि पदानि सन्ति अस्यां परिभाषायाम्। अनुबन्धकृतम् अनेकाल्त्वं नादर्तव्यम् इति परिभाषायाः अर्थः।

5.1.2.परिभाषारम्भप्रयोजनम् –

इयं परिभाषा किमर्थम् आरब्धा इति आदौ अत्र प्रतिपाद्यते। अनेकाल्शित्सर्वस्य[12] इति हि सूत्रम्। यः आदेशः अनेकाल् शित् च भवति सः आदेशः स्थानिनः सर्वस्य स्थाने प्रवर्तते इति हि सूत्रस्यास्य अर्थः। यथा इदम इश्[13] इत्यत्र इश् आदेशः शित्। अतः इदम्शब्दस्य सर्वस्य स्थाने इश् इत्ययम् आदेशः प्रवर्तते। अनुबन्धानाम् अवयवत्वपक्षे इश्प्रभृतीनाम् अनुबन्धविशिष्टानाम् आदेशानाम् अनेकाल्त्वादेव सर्वादेशत्वे सिद्धे अनेकाल्शित् सर्वस्य इत्यस्मिन् सूत्रे शिद्ग्रहणं व्यर्थम्। एतद्वैयर्थ्यवारणायेयं परिभाषारब्धा।

5.1.3.ज्ञापकम् –

इत्थम् अनेकाल्शित् सर्वस्य इत्यस्मिन् सूत्रे शिद्ग्रहणं व्यर्थं सत् इमां परिभाषां ज्ञापयति नानुबन्धकृतमनेकाल्त्वम् इति। शिद्ग्रहणस्य वैयर्थ्यवारणाय परिभाषा इयम् आरब्धा। अनुबन्धकृतम् अनेकाल्त्वं नादर्तव्यम् इति परिभाषायाः अर्थः। अतः इश्प्रभृतिषु आदेशेषु अनेकाल्त्वम् इत्संज्ञकशकारकृतं वर्तते। अतः तन्नादर्तव्यम् इति परिभाषया बोधनात् इशादीनाम् आदेशानाम् अनुबन्धकृतानेकाल्त्वात् अनुबन्धविनिर्मुक्तस्य आदेशस्य अनेकाल्त्वाभावात् सर्वादेशत्वे अप्राप्ते सर्वादेशसिद्ध्यर्थं शिद्ग्रहणं सार्थकम् इति स्वांशे चारितार्थ्यम्।

5.1.4. स्वांशे चारितार्थ्यम् –

एवञ्च इश्प्रभृतिषु आदेशेषु अनेकाल्त्वम् इत्संज्ञकशकारकृतं वर्तते। अतः तन्नादर्तव्यम् इति परिभाषया बोधनात् इशादीनाम् आदेशानाम् अनुबन्धकृतानेकाल्त्वात् अनुबन्धविनिर्मुक्तस्य आदेशस्य अनेकाल्त्वाभावात् सर्वादेशत्वे अप्राप्ते सर्वादेशसिद्ध्यर्थं शिद्ग्रहणं सार्थकम् इति स्वांशे चारितार्थ्यम्।

5.1.5. अन्यत्रफलम् –

एवञ्च अस्याः परिभाषायाः सत्त्वात् अर्वणस्त्रसावनञः[14] इत्यादौ तृ इत्यादिषु आदेशेषु ऋकारादिवर्णानाम् इत्संज्ञकत्वात् तत्कृतानेकाल्त्वस्य अनादरात् तेषाम् आदेशानाम् एकाल्त्वमेव इति तेषाम् अन्त्यादेशत्वमेव न तु सर्वादेशत्वम् इति सिद्धम् अन्यत्र फलमपि।

5.1.5. इत्संज्ञायोग्यत्वमेवानुबन्धत्वम् –

लुटः प्रथमस्य डारौरसः[15], जसः शी[16] इत्यादौ डादीनाम् आदेशप्रवृत्त्युत्तरमेव इत्संज्ञाविधानात् आदेशप्रवृत्तिकाले इत्संज्ञायाः असत्त्वात् तेषु स्थलेषु डकाराकारानुपूर्वीकृतात् अनेकाल्त्वादेव सर्वादेशत्वम्। परन्तु वस्तुतः इत्संज्ञायोग्यत्वमेव अनुबन्धत्वम् इति सिद्धान्तात् लुटः प्रथमस्य डारौरसः इत्यत्र डादेशस्य आदेशप्रवृत्तिकालेऽपि इत्संज्ञायाः सत्त्वात् तत्कृतानेकाल्त्वस्य अनाश्रयणात् तेषाम् अनेकाल्त्वाभावात् सर्वादेशत्वम् अप्राप्तमेव।

5.1.6. डाप्रभृतीनाम् वर्णप्रश्लेषेण सर्वादेशत्वम् –

एवञ्च तेषाम् आदेशानां सर्वादेशत्वं कथं साध्यते इति चेदुच्यते – तेषाम् आदेशानां सर्वादेशत्वं तेषु आदेशेषु वर्णप्रश्लेषेण डा आ इत्येवं प्रकारेण प्रश्लेषं कृत्वा साध्यते। जसः शी इत्यत्र तु शित्त्वादेव सर्वादेशत्वं बोध्यम्। अनेन अनेकाल्शित् सर्वस्य सूत्रस्थशिद्ग्रहणेन अनुबन्धानाम् अविद्यमानवद्भावः ज्ञाप्यते इति यदि उच्येत तर्हि एताः तिस्रः परिभाषाः न कार्याः। एवं सति मन्दबुद्धिवैशद्यार्थमेव तिसृणामपि परिभाषाणाम् उपस्थापनमिति बोध्यम्।

5.2.नानुबन्धकृतमनेजन्तत्वम् –

5.2.1. परिभाषार्थः –

इत ऊर्ध्वं नानुबन्धकृतमनेजन्तत्वम्[17] इति परिभाषात्र निरूप्यते। न अनुबन्धकृतम् अनेजन्तत्वम् इति त्रीणि पदानि सन्ति अस्यां परिभाषायाम्। अनुबन्धकृतम् अनेजन्तत्वं नादर्तव्यम् इति परिभाषायाः अर्थः।

5.2.2. परिभाषारम्भप्रयोजनम् –

इयं परिभाषा किमर्थम् आरब्धा इति आदौ अत्र प्रतिपाद्यते। अथ परिभाषायाः अवतारिका उच्यते –दाधाघ्वदाप्[18] इति सूत्रम्। दारूपाणां धारूपाणां धातूनां घुसंज्ञा भवति, दाप्दैपौ धातुं विहाय इति सूत्रस्यास्य अर्थः। के च ते दारूपाः धातवः इति चेत् दो अवखण्डने, देङ् रक्षणे, डुदाञ् दाने, दाण् दाने इति चत्वारः धातवः दारूपाः अत्र गृह्यन्ते। के च ते धारूपाः धातवः इति चेत् धेट् पाने, डुधाञ् धारणपोषणयोः इति द्वौ धातू गृह्येते। दापः दैपः च न घुसंज्ञा अदाप् इति निषेधात्। अत्र दाप् इत्यनेन कृतात्वः दैप् शोधने धातुः एवं दाप् लवने धातुश्च विवक्षितः। एवञ्च एतेषां षण्णां धातूनां घुसंज्ञा विधीयते अनेन सूत्रेण। दो दद् घोः[19] इति सूत्रेण घुसंज्ञकस्य दा इत्यस्य दथ् आदेशः विधीयते तादौ किति परे। अव इत्युपसर्गपूर्वकात् दैप्धातोः निष्ठाक्तप्रत्यये अवदातम् इति रूपम् इष्टम्। परन्तु अनुबन्धानाम् अवयवत्वपक्षे अवदत्तं मुखम् इति अनिष्टं रूपं स्यात्। तत् कथमिति उच्यते – दैप्धातोः निष्ठाक्तप्रत्यये पलोपोत्तरम् आत्वं भवति आदेच उपदेशेऽशिति इति सूत्रेण। एवञ्च आत्वे कृते धातोः दारूपत्वात् दाधाघ्वदाप् इति सूत्रेण घुंसज्ञायां सत्यां दो दद् घोः इति सूत्रेण दथ् आदेशे अवदत्तं मुखम् इति अनिष्टं रूपं स्यात्, नाप्यत्र दापः उच्यमानः निषेधप्रसक्तिः। कथम् अत्र दापः उच्यमानः घुसंज्ञानिषेधः न प्रवर्तते इति चेदुच्यते। अनुबन्धानाम् अवयवत्वपक्षे दैप्धातोः दाप्रूपत्वाभावात् न तन्निषेधस्य प्रवृत्तिरत्र। अर्थात् पकारसत्त्वे तु एजन्तत्वाभावात् आत्वाप्रसक्त्या दैप्रूपत्वात् दाप्रूपत्वाभावात्, पलोपोत्तरं पकाराभावेन दारूपत्वेन दाप्रूपत्वाभावात् च अदाप् इत्यनेन उच्यमानः निषेधः अत्र न प्रवर्तते। तथा सति दैप्धातोः निष्ठाक्तप्रत्यये पलोपोत्तरम् आदेच उपदेशेऽशिति इति सूत्रेण आत्वे कृते धातोः दारूपत्वात् दाधाघ्वदाप् इति सूत्रेण घुंसज्ञायां सत्यां दो दद् घोः इति सूत्रेण दथ् आदेशे अवदत्तं मुखम् इति अनिष्टं रूपं स्यात्। अतः एतद्दोषवारणाय परिभाषेयम् आरब्धा नानुबन्धकृतमनेजन्तत्वम् इति।

अनुबन्धकृतम् अनेजन्तत्वं नादर्तव्यम् इति परिभाषायाः अर्थः। अनुबन्धकृतस्य अनेजन्तत्वस्य अनादारात् अनया परिभाषया अनुबन्धानाम् अविद्यमानवद्भावबोधनद्वारा अनुबन्धस्य सत्त्वेऽपि दैप्धातोः एजन्तत्वात् दैपः अनुबन्धलोपात् पूर्वमेव उपदेशे एव आत्वप्रवृत्तौ क्षत्यभावात्, आत्वे कृते, दाब्रूपत्वसत्त्वेन, अनुबन्धलोपे कृतेऽपि दाब्रूपत्वस्य स्थानिवद्भावेन दाशब्दे विद्यमानत्वात् अदाप् इत्युच्यमानः निषेधः दैपः प्रवर्तते एव इति न कश्चिदत्र दोषः।

5.2.3. ज्ञापकं तत्वारितार्थ्यञ्च –

परिभाषाज्ञापकम्–अस्याः परिभाषायाः ज्ञापकं भवति उदीचां माङो व्यतिहारे इति सूत्रे माङः इति निर्देशः। अनुबन्धानाम् अवयवत्वे तु डकारसत्त्वे एजन्तत्वाभावात् आत्वाप्राप्त्या माङ इति निर्देशः अनुपपन्नः सन् परिभाषामिमां ज्ञापयति। आदेच उपदेशेऽशिति इति सूत्रेण आत्वं

विधीयते। सूत्रेऽस्मिन् उपदेशशब्दः कर्मसाधनः, उपदिश्यमानस्य इत्यर्थः। अत्र कश्चन प्रश्नः समुदेति यत्–लिडादेशयोः एशिरेच् इत्यनयोः आत्ववारणाय, तथा गोप्रभृतीनां प्रातिपदिकानाम् आत्ववारणाय, आदेच उपदेशेऽशिति इति सूत्रे लिटि धातोरनभ्यासस्य[20] इत्यतः धातोः इत्यनुवृत्तेः आवश्यकत्वात्, तदनुवृत्तेः सत्त्वात् अनुबन्धविनिर्मुक्तस्यैव धातुत्वम् इति न धातुलोप आर्धधातुके[21] इत्यत्र व्यवस्थापितत्वात्, अनुबन्धसत्त्वे तस्य धातुत्वाभावात् आत्वमेव दुर्लभम् इति न स्वांशे चारितार्थ्यम् इति। चेत् न। लिडादेशयोः एशिरेच् इत्यनयोः आत्ववारणाय आदेच उपदेशेऽशिति इति सूत्रे लिटि धातोरनभ्यासस्य इत्यतः धातोः इत्यनुवृत्तेः आवश्यकता नास्ति। गवादिशब्दानाम् उपदेशत्वाभावात्, इरेप्रभृतीनाम् आदेशानाम् उपदेशत्वेऽपि शित्परत्वाभावात् न आत्वप्रसक्तिः। अतः धातोः अनुवृत्तिः अनावश्यकी। एवञ्च स्वांशे चारितार्थ्यात् माङ इति निर्देशः अनुपपन्नः सन् परिभाषामिमां ज्ञापयति।

5.3.नानुबन्धकृतमसारूप्यम् –

5.3.1. परिभाषार्थः –

इत ऊर्ध्वं नानुबन्धकृतमसारूप्यम्[22] इति परिभाषात्र निरूप्यते। न अनुबन्धकृतम् असारूप्यम् इति त्रीणि पदानि सन्ति अस्यां परिभाषायाम्। अनुबन्धकृतम् असारूप्यम् नादर्तव्यम् इति परिभाषायाः अर्थः।

5.3.2. परिभाषारम्भप्रयोजनम् –

इयं परिभाषा किमर्थम् आरब्धा इति आदौ अत्र प्रतिपाद्यते। अथ परिभाषायाः अवतारिका उच्यते – वासरूपोऽस्त्रियाम्[23] इति सूत्रम्। असरूपः अपवादप्रत्ययः उत्सर्गस्य विकल्पेन बाधको भवति इति हि एतत्सूत्रार्थः। उदाहरणमाध्यमेन एतत् प्रतिपाद्यते । कर्मण्यण्[24] इति सूत्रेण कर्मवाचके उपपदे धातोः अण्प्रत्ययः विधीयते। कुम्भं करोति इति कुम्भकारः इति उदाहरणम्। कुम्भम् इति कर्मवाचके द्वितीयान्ते उपपदे डुकृञ् धातोः अण्प्रत्यये कृते धातोः ऋकारस्य वृद्धौ आरादेशे कुम्भकारः इति रूपम्। आतोऽनुपसर्गे कः[25] इति सूत्रेण कर्मवाचके उपपदे आकारान्ताद् धातोः कप्रत्ययः विधीयते। आतोऽनुपसर्गे कः इति सूत्रेण कप्रत्ययः अणं बाधित्वा प्रवर्तते। वरं ददाति इति वरदः इत्युदाहरणम्। वरम् इति कर्मवाचके उपपदे डुदाञ् दाने इति आकारान्ताद् धातोः कर्मण्यण् इति सूत्रेण अण्प्रत्यये प्राप्ते तं बाधित्वा अनेन सूत्रेण कप्रत्ययः भवति। कप्रत्यये कृते तस्य कित्त्वात् आतो लोप इटि च इति सूत्रेण धातोः आकारस्य लोपे वरदः इति रूपं सिद्ध्यति। अयं कप्रत्ययः अण्प्रत्ययस्य नित्यबाधको भवति। अणि णकारस्य, के ककारस्य च इत्संज्ञकत्वात् निवृत्तौ उभयोरपि प्रत्ययोः अकारः एव अवशिष्यते। एवञ्च अनुबन्धनिवृत्तौ उभयोः सारूप्यम् अस्ति। अनुबन्धसत्त्वे तु वैरूप्यम् अस्ति। अनुबन्धकृतस्य वैरूप्यस्य असारूप्यस्य प्रत्ययद्वयेऽपि सत्त्वात् अत्र वासरूपोऽस्त्रियाम् इति वासरूपविधेः प्रवृत्तौ कप्रत्ययः अण्प्रत्ययस्य विकल्पेन बाधको भवति। एवं सति कप्रत्यये कृते वरदः इति अभीष्टरूपसिद्धावपि, कप्रत्ययाभावपक्षे अणि कृते वरदायः इत्यनिष्टं रूपं स्यात्। अतः एतद्दोषवारणायपरिभाषेयम् आरब्धा वर्तते नानुबन्धकृतमसारूप्यम् इति।

न अनुबन्धकृतम् असारूप्यम् इति त्रीणि पदानि सन्ति अस्यां परिभाषायाम्। अनुबन्धकृतम् असारूप्यम् नादर्तव्यम् इति परिभाषायाः अर्थः। एवञ्च अण्प्रत्ययकप्रत्ययोः वैरूप्यम् अनुबन्धकृतं वर्तते। अनुबन्धकृतवैरूप्यस्य अनाश्रयणात् उभयोः अनुबन्धनिवृत्तौ सारूप्यात् कप्रत्ययः अणः वा बाधको न, अपि तु नित्यबाधकः एव। अतः वरम् इति कर्मवाचके उपपदे डुदाञ् दाने इति आकारान्ताद् धातोः कर्मण्यण् इति सूत्रेण अण्प्रत्यये प्राप्ते तं नित्यतया बाधित्वा कप्रत्ययो भवति। कप्रत्यये कृते तस्य कित्त्वात् आतो लोप इटि च इति सूत्रेण धातोः आकारस्य लोपे वरदः इति अभीष्टं रूपं सिद्ध्यति।

5.3.3. ज्ञापकम् –

परिभाषाज्ञापकम्–अस्याः परिभाषायाः ज्ञापकं भवति – ददातिदधात्योर्विभाषा[26] इति सूत्रेण विकल्पेन णबाधकशप्रत्ययविधानमेव अस्याः परिभाषायाः ज्ञापकं। श्याद्व्याधस्रुसंस्र्वतीणवसाऽवह्लि–हश्लिषश्वसश्च[27] इति सूत्रेण आकारान्तेभ्यः धआतुभ्यः णप्रत्ययः विधीयते। अने सूत्रेण णप्रत्यये प्राप्ते तं बाधित्वा जौहोत्यादिकात् डुदाञ् धातोः डुधाञ् धातोः च विकल्पेन शप्रत्ययो विधीयते। शप्रत्ययः शित् अतः सार्वाधातुकः। कर्त्रर्थे सार्वधातुके परे धातोः शब् भवति। धात्वो अनयोः जौहोत्यादिकत्वात् शपः श्लुः भवति। श्लौ इति सूत्रेण द्वित्वे ददः दधः इति रूपं सिद्ध्यति। शप्रत्ययाभावपक्षे णप्रत्यये आतो युक्चिण्कृतोः[28] इति सूत्रेण युगागमे दायः धायः इति रूपं सिद्ध्यति। ददातिदधात्योर्विभाषा इति सूत्रेण विकल्पेन शप्रत्ययो विधीयते। एतेन शप्रत्ययाभावपक्षे णप्रत्ययो भवति। वासरूपोऽस्त्रियाम् इति सूत्रेण असरूपः अपवादप्रत्ययः उत्सर्गस्य विकल्पेन बाधको

भवति इति बोध्यते। प्रकृते णशप्रत्यययोः अनुबन्धकृता असरूपता अस्ति। अतः अपवादप्रत्ययस्य शप्रत्ययस्य वैकल्पिकत्वं वासरूपोऽस्त्रियाम् इति सूत्रेणैव सिद्धम्। तेनैव ददः दायः, दधः धायः इति अभीष्टरूपाणि सिद्ध्यन्ति। एवं सति ददातिदधात्योर्विभाषा इति सूत्रेण विकल्पेन णबाधकशप्रत्ययविधानम् असङ्गतं सत् इमां नानुबन्धकृतमसारूप्यम् इति परिभाषां ज्ञापयति। अनुबन्धकृतम् असारूप्यम् नादर्तव्यम् इति परिभाषायाः अर्थः। प्रकृते णशप्रत्यययोः अनुबन्धकृतस्य असारूप्यस्यैव सत्त्वात् तस्य च अनादरात् अनुबन्धविनिर्मुक्तयोः अनयोः प्रत्यययोः असारूप्याभावात् अर्थात् सारूप्यात् नात्र वासरूपोऽस्त्रियाम् इति सूत्रस्य प्रवृत्तिः।

5.3.4. स्वांशे चारितार्थ्यम् –

एवञ्च वासरूपविधिबलात् शप्रत्ययः विक्लपेन णप्रत्ययस्य बोधको नैव भवति। अतः णप्रत्ययस्य शप्रत्ययः नित्यतया बाधकः स्यात् । तथा सति ददः दधः इत्यवे रूपे स्यातां, न तु दायः धायः इति। अतः ददातिदधात्योर्विभाषा इति सूत्रेण णप्रत्ययबाधकत्वेन विकल्पेन शप्रत्ययो विहितः। तथा सति शप्रत्ययाभावपक्षे णप्रत्यये दायः धायः इति रूपे च स्याताम् इति न दोषः। एवञ्च यत्र अनुबन्धं विनैव प्रत्यययोः वैरूप्यं दृश्यते तत्रैव वासरूपोऽस्त्रियाम् इति सूत्रस्य प्रवृत्तिः। इत्थं ददातिदधात्योर्विभाषा इति सूत्रेण णप्रत्ययबाधकत्वेन विकल्पेन शप्रत्ययविधानं सार्थकमिति लब्धं स्वांशे चारितार्थ्यम्।

5.3.5. अन्यत्रफलम् –

अन्यत्र फलं तु कर्मण्यण् इति सूत्रविहितस्य अण्प्रत्ययस्य आतोऽनुपसर्गे कः इति सूत्रविहितस्य कप्रत्ययस्य च सारूप्यात्, अनुबन्धकृतवैरूप्यस्यैव सत्त्वात् अत्रापि वासरूपविधेः अप्रवृत्त्या कप्रत्ययः अण्प्रत्ययस्य नित्यतया बोधको भवति। अत एव गां ददाति इत्यत्र आकारान्तात् धातोः अणं बाधित्वा कप्रत्यये कृते गोदः इत्येव रूपमिति नात्र अणः प्रवृत्तेरवकाशः।

सन्दर्भः

1. परिभाषा संख्या 4।
2. अष्टाध्यायीसूत्रसंख्या 3.4.19. व्यतीहारेऽर्थे माङः क्त्वा स्यात् ।
3. अष्टाध्यायीसूत्रसंख्या 6.1.45. उपदेशे एजन्तस्य धातोः आत्वं, न तु शिति ।
4. अष्टाध्यायीसूत्रसंख्या 1.3.2. उदेशे अनुनासिकः अज् इत्संज्ञः स्यात् ।
5. अष्टाध्यायीसूत्रसंख्या 7.2.16. आकारेतो निष्ठायाः इण्न स्यात् ।
6. अष्टाध्यायीसूत्रसंख्या 6.1.126. आडोऽचि परे अनुनासिकः स्यात्, स च प्रकृत्या ।
7. अष्टाध्यायीसूत्रसंख्या 4.2.80.एभ्यः सप्तदशभ्यः सप्तदश स्युः चतुरर्थ्याम् ।
8. परिभाषा संख्या 5।
9. अष्टाध्यायीसूत्रसंख्या 1.3.9. तस्येतो लोपः स्यात् ।
10. अष्टाध्यायीसूत्रसंख्या 6.1.90. आटः अचि परे वृद्धिरेकादेशः स्यात् ।
11. परिभाषा संख्या 6।
12. अष्टाध्यायीसूत्रसंख्या 1.1.55. अनेकाल् य आदेशः, शित् च स सर्वस्य षष्ठीनिर्दिष्टस्य स्थाने भवति।
13. अष्टाध्यायीसूत्रसंख्या 5.3.3.प्राग्दिशः । इदम इश् इत्ययमादेशो भवति प्राग्दिशीयेषु प्रत्ययेषु परतः।
14. अष्टाध्यायीसूत्रसंख्या 6.4.127.नञ् रहितस्य अर्वन्नन्तस्याङ्गस्य तृ इत्यन्तादेशः स्यात् न तु सौ।
15. अष्टाध्यायीसूत्रसंख्या 2.4.75. लुडादेशस्य प्रथमपुरुषस्य परस्मैपदस्य आत्मनेपदस्य च यथाक्रमं डा रौ रस् एते आदेशाः भवन्ति।
16. अष्टाध्यायीसूत्रसंख्या 7.1.17. अदन्तसर्वनाम्नः परस्य जसः शी स्यात्।
17. परिभाषासंख्या 6।
18. अष्टाध्यायीसूत्रसंख्या 1.1.20.दारूपाः धारूपाः धातवः घुसंज्ञाश्च स्युः दाप्दैपौ वर्जयित्वा।
19. अष्टाध्यायीसूत्रसंख्या 7.4.46. घुसंज्ञकस्य दा इत्यस्य दथ् स्यात् तादौ किति।

20. अष्टाध्यायीसूत्रसंख्या 6.1.8.लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तः, आदिभूतादचः परस्य तु द्वितीयस्य।
21. अष्टाध्यायीसूत्रसंख्या 1.1.4. धआत्वंशलोपनिमित्ते आर्धधातुके परे इकः गुणवृद्धि न स्तः।
22. परिभाषासंख्या 7।
23. अष्टाध्यायीसूत्रसंख्या 3.1.95. परिभाषेयम् । अस्मिन् धात्वधिकारे असरूपोऽपवादप्रत्ययः उत्सर्गस्य बाधको वा भवति स्त्यर्थाधिकारोक्तं विना।
24. अष्टाध्यायीसूत्रसंख्या 3.2.1. कर्मण्युपपदे धातोः अण् स्यात्।
25. अष्टाध्यायीसूत्रसंख्या 3.2.3. आदन्तात् धातोः अनुपसर्गात् कर्मण्युपपदे कः स्यात् नाण्।
26. अष्टाध्यायीसूत्रसंख्या 3.1.139. दाजः धाजश्च विभाषा शप्रत्ययो भवति।
27. अष्टाध्यायीसूत्रसंख्या 3.1.141. श्यैड्प्रभृतिभ्यः नित्यं णः स्यात्।
28. अष्टाध्यायीसूत्रसंख्या 7.3.33. आदन्तानां युगागमः स्यात् चिणि ञिति णिति कृति च।

सन्दर्भग्रन्थसूची

1. अष्टाध्यायी भगवत्पाणिनिविरचिता कृष्णदास अकादमी प्रकाशित।
2. लघुसिद्धान्तकौमुदी परदराजाचार्येण विरचिता, भीमसेनशास्त्रिविरचितभैमीव्याख्यायुता, प्रथमद्वितीयतृतीयचतुर्थभागाः,भैमीप्रकाशनद्वारा प्रकाशिता चतुर्थं संसस्करणम् 2007।
3. वैयाकरणसिद्धान्तकौमुदी, प्रथमभागः भट्टोजिदीक्षितविरचिता, बालमनोरमा तत्त्वबोधिनीव्याख्याद्वयोपेता, गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च संपादिता, मोतीलाल बनारसीदास द्वारा प्रकाशिता 2004, ऐ.एस.बि.एन् 81-208-2341-9
4. वैयाकरणसिद्धान्तकौमुदी, द्वितीयभागः भट्टोजिदीक्षितविरचिता, बालमनोरमा तत्त्वबोधिनीव्याख्याद्वयोपेता, गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च संपादिता, मोतीलाल बनारसीदास द्वारा प्रकाशिता 2004, ऐ.एस.बि.एन् 81-208-2341-9
5. वैयाकरणसिद्धान्तकौमुदी, तृतीयभागः भट्टोजिदीक्षितविरचिता, बालमनोरमा तत्त्वबोधिनीव्याख्याद्वयोपेता, गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च संपादिता, मोतीलाल बनारसीदास द्वारा प्रकाशिता 2004, ऐ.एस.बि.एन् 81-208-2341-9
6. वैयाकरणसिद्धान्तकौमुदी, चतुर्थभागः भट्टोजिदीक्षितविरचिता, बालमनोरमा तत्त्वबोधिनीव्याख्याद्वयोपेता, गिरिधरशर्मणा परमेश्वरानन्दशर्मणा च संपादिता, मोतीलाल बनारसीदास द्वारा प्रकाशिता 2004, ऐ.एस.बि.एन् 81-208-2341-9
7. काशिकावृत्तिः जयादित्यवामनविरचिता न्यासपदमञ्जरीसहिता,रत्ना पब्लिकेशन्स द्वारा प्रकाशिता 1975।
8. परिभाषेन्दुशेखरः नागेशभट्टविरचितः पेरिवेङ्कटेश्वरशास्त्रिविरचितनागेशगूढार्थदीपिकाव्याख्यान- संवलितः आन्ध्रविश्वकला परिषदा प्रकाशितः - 1955
9. परिभाषेन्दुशेखरः नागेशभट्टविरचितः श्रीपादसत्यानारायाणाचार्येण विरचता बालबोधिनीव्याख्यायुता राष्ट्रियसंस्कृतविद्यापीठद्वारा प्रकाशितः।
10. अन्तर्जालपुटनाम - httpsÑ//ashtadhyayi.com/

****

3. द्वितीयमिथ्यात्वलक्षणम्

के. मनोज्ञा
सहायकाचार्या (अतिथिः), अद्वैतवेदान्तविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः वेदव्यासपरिसरः

उपक्रमः

''**एकमेवाद्वितीयम्**''[1] इत्यादिश्रुतिप्रतिपाद्यं ब्रह्मणः अद्वितीयत्वं प्रत्यक्षादिप्रमाणैः दृश्यमानस्य प्रपञ्चस्य मिथ्यात्वे एव सिद्ध्यतीति हेतोः प्रपञ्चस्य मिथ्यात्वं श्रुत्यनुमानादिभिः अनेकैः प्रमाणैः अद्वैतवेदान्तिभिः निरूप्यते । तत्र तावद् मिथ्यात्वं नाम किमिति अध्यवसेयम्। विभिन्नाचार्यैः मिथ्यात्वलक्षणानि प्रदर्शितानि। तेषु पञ्चमिथ्यात्वलक्षणानि सुप्रसिद्धानि। तदुक्तं –

आद्यं स्यात्पञ्चपाद्योक्तं ततो विवरणोदिते।

चित्सुखीयं चतुर्थं स्यादन्त्यमानन्दबोधजम्।। इति।

तेषु मिथ्यात्वलक्षणेषु द्वितीयमिथ्यात्वलक्षणं सम्प्रति अनतिविस्तरेण विविच्यते।

तथा हि विवरणे ''प्रतिपन्नोपाधावभावप्रतियोगित्वमेव मिथ्यात्वम्''[2], ''बाधकज्ञानसिद्धस्य प्रतिपन्नोपाधावभावप्रतियोगित्व–लक्षणस्य मिथ्यात्वस्य''[3] इत्यादिकमुक्तम्। ''**नेह नानास्ति किञ्चन**''[2] इति श्रुत्यर्थम् अधिकृत्य पञ्चपादिकाविवरणकारेण प्रकाशात्मयतिना उपस्थापितमदं द्वितीयमिथ्यात्वलक्षणम्।

न इह नाना अस्ति किञ्चन

इह = दृश्यतादात्म्यापन्नब्रह्मणि

नाना = ब्रह्मभिन्नम्

किञ्चन = वस्तुसामान्यम्

न = अत्यन्ताभावप्रतियोगितया अन्वयः

अस्ति = अस्तित्वक्रिया

दृश्यतादात्म्यापन्नब्रह्मणि अस्तित्वविशिष्टब्रह्मभिन्नवस्तु–सामान्याभावः इत्यर्थः।

लक्षणम् – **प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वम्।**

प्रतिपन्नः – स्वप्रकारकप्रतीतिविशेष्यः (प्रतीतिः – ज्ञानं – प्रमा/भ्रमः)।

उपाधौ–उपाधिनिष्ठः (सप्तम्याः वृत्त्यर्थत्वं)– अधिकरणनिष्ठः (उपाधिः = अधिकरणम्)।

त्रैकालिकनिषेधः–अत्यन्ताभावः (संसर्गाभावः)। अनेन ध्वंसप्रागभावयोः व्यावृत्तिः।

अर्थात् प्रतिपन्नं स्वप्रकारकप्रतीतिविशेष्यं यदधिकरणं तन्निष्ठः (तत्र विद्यमानः) यः अत्यन्ताभावः तस्य प्रतियोगित्वं मिथ्यात्वम्। (स्वपदेन मिथ्यात्वेन अभिमतं रजतादिकं नेतव्यम्)

शुक्तिरजते लक्षणसमन्वयः–

स्वप्रकारकप्रतीतिः रजतप्रकारकप्रतीतिः (रजतं प्रकारः यस्यां सा प्रतीतिः) 'इदं रजतम्' इत्याकारकप्रतीतिः, तत्प्रतीतिविशेष्यः इदंपदार्थः शुक्तिः वा अधिकरणं , तन्निष्ठः शुक्तिनिष्ठः यः अत्यन्ताभावः रजताभावः , तस्य अभावस्य प्रतियोगि रजतं , तत्प्रतियोगित्वं च रजते अस्तीति लक्षणसमन्वयः।

मिथ्यात्वलक्षणघटकीभूतस्य अत्यन्ताभावस्य का सत्ता?

पूर्वपक्षः

सत्ता	पारमार्थिकी	व्यावहारिकी	प्रतिभासिकी
दोषाः	अद्वैतहानिः	अर्थान्तरम्	सिद्धसाधनम्
		श्रुतेः अतत्त्वावेदकत्वम्	
		प्रपञ्चस्य पारमार्थिकत्वापत्तिः	

यदि प्रपञ्चनिषेधः(प्रपञ्चात्यन्ताभावः)

* पारमार्थिकः तर्हि–

पारमार्थिकत्वम् = त्रिकालाबाध्यत्वम्

अद्वैतहानिः – ब्रह्म प्रपञ्चनिषेधश्चेति परमार्थिकपदार्थद्वये सति ब्रह्मणः अद्वितीयत्वं हीयते।

* व्यावहारिकः तर्हि–

व्यावहारिकत्वम् = ब्रह्मप्रमातिरिक्तह्य–बाध्यत्वम् = ब्रह्मज्ञानबाध्यत्वम्

1. अर्थान्तरम्–प्रपञ्चनिषेधः व्यावहारिकत्वेन बाध्यमानम् । अतः स निषेधः स्वप्रतियोगिनः प्रपञ्चस्य त्रैकालिकसत्त्वविरोधि न भवितुमर्हति। तेन प्रपञ्चस्य तात्त्विकत्वं तदवस्थमेवेति अर्थान्तरम्। [अर्थान्तरम् = अभिमतार्थासिद्धिः / अनभिमतार्थसिद्धिः]
2. अद्वैतश्रुतेः अतत्त्वावेदकत्वम्–''नेह नानास्ति किञ्चन'' इति श्रुतिः अतात्त्विकं बाध्यमानं प्रपञ्चनिषेधं बोधयति , न तु तात्त्विकमर्थमित्यतः अस्याः श्रुतेः अतत्त्वावेदकत्वं अप्रामाण्यमित्यर्थः। [तत्त्वादेकत्वम् = तत्त्वं पारमार्थिकं आवेदयति बोधयति यत् तत् तत्त्वावेदकं, तस्य भावः तत्त्वावेदकत्वम्]
3. प्रपञ्चस्य पारमार्थिकत्वम्– ब्रह्मप्रमातिरिक्तप्रमया अबाध्यः प्रपञ्चः, अतः न प्रातिभासिकः प्रपञ्चः। भावाभावयोः समसत्ताकयोः एकाधिकरणत्वे विरोधः। तस्मात् प्रपञ्चनिषेधस्य व्यावहारिकत्वे सति प्रपञ्चस्य व्यावहारिकत्वं न युज्यते। तेन परिशेषात् प्रपञ्चस्य पारमार्थिकत्वमेव आपन्नम्।

* प्रातिभासिकः तर्हि–

प्रातिभासिकत्वम्= ब्रह्मप्रमातिरिक्त–प्रमाबाध्यत्वम्

सिद्धसाधनम्–निषेधस्य प्रातिभसिकत्वेन बाध्यमानत्वात् न प्रपञ्चसत्यत्वविरोधि। तत्तु पूर्वपक्षस्य जगत्सत्यत्ववादिनः मते सिद्धमेव इति सिद्धसाधनम्। [सिद्धसाधनम् = परमते लोके वा सिद्धस्यैव अर्थस्य पुनस्साधनम्]

दोषाश्रितत्वात् नेदं मिथ्यात्वलक्षणं युक्तमिति पूर्वपक्ष्याशयः।

सिद्धान्तः

उक्तदोषैः न संसृष्टमिदं लक्षणम्। तथा हि–

* पारमार्थिकत्वे न अद्वैतहानिः–

प्रपञ्चनिषेधस्य अधिकरणं ब्रह्म, समस्तदृश्यानां ब्रह्मणि अध्यस्तत्वात्। अभावस्य च अधिकरणस्वरूपत्वाभ्युपगमात् तात्त्विकः निषेधः न ब्रह्मणः भिन्न इति न अद्वैतहानिः।

* व्यावहारिकत्वे च

1. न अर्थान्तरम्–स्वप्नार्थस्य स्वप्ननिषेधेन बाधदर्शनात्। यथा स्वप्नार्थस्य प्रातिभासिकस्य गजादेः स्वप्ने एव आरोपितेन प्रातिभासिकेन तन्निषेधेन बाधे सति तेषां गजादीनां मिथ्यात्वव्यवहारः एव, न तु सत्यत्वमापन्नम्। तथैव व्यावहारिकप्रपञ्चस्य व्यावहारिकनिषेधेन बाधे सति तस्य प्रपञ्चस्य मिथ्यात्वव्यवहारः युज्यते, न तु सत्यत्वापत्तिः। प्रपञ्चतन्निषेधयोः उभयोरपि व्यावहारिकत्वाभ्युपगमात् विरोधः भवति।

निषेध्यपेक्षया नेषधस्य न्यूनसत्ताकत्वं पारमार्थिकसत्त्वावि-रोधित्वे तन्त्रम्

निषेधः प्रतियोग्यपेक्षया न्यूनसत्तावान् चेत् तदैव सः निषेधः प्रतियोगिनः पारमार्थिकसत्त्वस्य विरोधि न भवति। अन्यथा अधिकसत्ताकत्वे समानसत्ताकत्वे च सः निषेधः प्रतियोगिपारमार्थिक-सत्त्वस्य विरोधि भवत्येव।

2. अद्वैतश्रुतेः अतत्त्वावेदकत्वं नास्ति – ब्रह्मभिन्नं प्रपञ्चतन्निषेधादिकं अतात्त्विकं अतात्त्विकत्वेनैव बोधयति श्रुतिः । यद् यथास्ति तद् तथैव बोधयति, न तु अन्यथेत्यतः न अतत्त्वावेदकत्वं श्रुतेः। तद्वति तत्प्रकारकबोधजनकत्वरूपं व्यावहारिकप्रामाण्यमस्ति । [तद्वति तद्बोधकत्वमेव तत्त्वावेदकत्वम्/प्रामाण्यम्]

3. प्रपञ्चस्य न पारमार्थिकत्वापत्तिः-ब्रह्मप्रमाबाध्यत्वेन प्रपञ्चस्य व्यावहारिकत्वाङ्गीकारात्। समानाधिकरणे भावाभावयोः असमसत्ताकत्वनियमः स्वप्ने व्यभिचर्यते, स्वप्नपदार्थतन्निषेधयोः उभयोरपि स्वप्ने उपलम्भात्। अतः प्रपञ्चनिषेधस्य व्यावहारिकत्वेह्यपि प्रतियोगिनः प्रपञ्चस्य व्यावहारिकत्वमुपपद्यते।

* प्रातिभासिकत्वं प्रपञ्चनिषेधस्य सिद्धान्तिना नाभिमन्यते।

तथा च मिथ्यात्वलक्षणे उक्तदोषाप्रसक्तिः।

प्रपञ्चात्यन्ताभावप्रतियोगित्वं केन रूपेण? स्वरूपेण वा पारमार्थिकत्वेन?

स्वरूपेण = प्रपञ्चः स्वरूपेणैव	पारमार्थिकत्वेन = व्यावहारिकः
नास्ति मरीच्युदकवत्।	प्रपञ्चः विद्यते, प्रपञ्चस्य पारमा-र्थिकत्वमात्रं निषिध्यते।

पूर्वपक्षः

1. स्वरूपेण प्रपञ्चनिषेधः न सम्भवति, व्यवहारकाले विद्यमानत्वात्। यदि स्वरूपेणैव निषिध्यते तर्हि खपुष्पवत् असत्त्वापत्तिः। अत एव पारमार्थिकत्वेन वेति द्वितीयः विकल्पः दर्शितः।

2. असद्विलक्षणत्वं प्रपञ्चस्य अभ्युपगम्य स्वरूपेण न प्रपञ्चनिषेधः, अपि तु स्वरूपेण विद्यमानस्य प्रपञ्चस्य पारमार्थिकतामात्रं निषिध्यते इत्युच्यते चेदपि न, अन्योन्याश्रयत्वदर्शन्त्। तद्यथा-

मिथ्यात्वम्	=	बाध्यत्वम्
पारमार्थिकत्वम्	=	अबाध्यत्वम्

पारमार्थिकत्वम्	
न अबाध्यत्वम्	न बाध्यत्वम्
मथ्यात्वम्	

अबाध्यत्यत्वरूपेण पारमार्थिकत्वाकारेण प्रपञ्चस्य निषेधप्रतियोगित्वं, तच्च पारमार्थिकत्वं बाध्यत्वरूपेण मिथ्यात्वेन निरूप्यमित्यन्योन्याश्रयदर्शनात्। पारमार्थिकत्वस्य निर्धर्मके ब्रह्मण्यसम्भाविततया ब्रह्मभिन्नत्वेन अपारमार्थिकत्वमेव अतः तस्यापि मिथ्यात्वमनुमेयम् । तन्निषेधप्रतियेगित्वमपि यदि स्वरूपेणावच्छिद्येत, तदा पारमार्थिकत्वस्यापि अत्यन्तासत्त्वापतिः स्यात् । तदसत्त्वापत्तिं परिहर्तुं पारमार्थिकतया पारमार्थिकत्वस्य निषेधे सति अनवस्था भवति।

सिद्धान्तः

स्वरूपेणैव त्रैकालिकनिषेधप्रतियोगित्वं प्रपञ्चे शुक्तिरूप्ये च । 'नेदं रजतम्' इति बाधकज्ञानेन रजतबाधानन्तरं रजतं शुक्तौ नासीत्, नास्ति, न भविष्यति इति कालत्रयेह्यपि स्वरूपेण निषेधः । तद्वत् 'नेह नानास्ति' इति श्रुत्यापि स्वरूपेण प्रपञ्चस्य निषेधः बोध्यते।

मिथ्यात्वलक्षणघटकात्यन्ताभावप्रतियोगि कः ? [नेदं रजतमिति बाधकज्ञानेन शुक्तौ कस्य निषेधः इत्यर्थः]

पूर्वपक्षः	सिद्धान्तः
व्यावहारिकं आपणस्थं	व्यावहारिकरजततादात्म्येन प्रतीतं
रजतम्	प्रातिभासिकं रजतम्

व्यावहारिकरजतस्य निषेधप्रतियोगित्वे –

1. भ्रमबाधयोर्वैयधिकरण्यापत्तिः–'इदं रजतं' इति भ्रमज्ञानविषयीभूतं रजतं प्रातिभासिकं , 'नेदं रजतं' इति निषेधज्ञानविषयीभूतं तु व्यावहारिकं रजतमिति भ्रमबाधज्ञानयोः भिन्नविषयत्वात् वैयधिकरण्यापत्तिः । [वैयधिकरणापत्तिः = विविधं भिन्नं अधिकरणं यत्र तत् व्यधिकरणम् ; व्यधिकरणस्य भावः वैयधिकरण्यम् , असमानाधिकरणत्वमित्यर्थः]
2. अप्रसक्तप्रतिषेधापत्तिः – शुक्तौ व्यावहारिकं रजतं न प्रसक्तमिति अप्रसक्तस्य व्यावहारिकरजतस्य शुक्तौ निषेधे सति अप्रसक्तप्रतिषेधापत्तिः भवति । [अप्रसक्तप्रतिषेधः = यद् यत्र न प्रसक्तं, तस्य प्रतिषेधः]

शुक्तौ प्रवृत्तिदर्शनात्, प्रवृत्तिश्च व्यावहारिके अर्थे एव संभवात्, व्यावहारिकरजततादात्म्येन (तदभिन्नतया) प्रतीतस्य प्रातिभासिकस्य रजतस्य निषेधप्रतियोगित्वमभ्युपगतम्।

व्यावहारिकरजततादात्म्येन प्रतीतं प्रातिभासिकं रजतमेव निषेधप्रतियोगीति अभ्युपगन्तव्यम् । तेन भ्रमबाधकयोः ज्ञानविषययोः अभिन्नत्वे सति न व्यधिकरणापत्तिः, प्रसक्तस्यैव प्रातिभासिकरजतस्य निषेधात् नापि अप्रसक्तप्रतिषेधापत्तिश्च।

प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगित्वे घटादीनां अन्यत्रापि तन्निषेधप्रतियोगित्वात् असत्त्वापत्तिः इति चेन्न। असत्त्वं हि क्वचिदप्युपाधौ सत्त्वेन प्रतीत्यनर्हत्वम्, यथा शशश्रृङ्गादिः सत्त्वेन क्वचिदपि न प्रतीयते । तच्च प्रपञ्चे नान्वेति, बाधात् प्राक् तस्य सत्त्वेन प्रतीयमानत्वात् । एतदेव लक्षणे उपाधिपदेन सूचितम् । यद्यपि शून्यवादिभिरपि त्रैकालिकनिषेधप्रतियोगित्वमभिधीयते तथापि तैः सदधिष्ठानस्य अनङ्गीकारात् नास्य शून्यत्वप्रसङ्गः।

उपसंहारः

विवरणकारोदितं लक्षणमिदम् अतिमहत्त्वं भजते। ''ब्रह्मप्रमातिरिक्ताबाध्यत्वे सति सत्त्वेन प्रतीत्यर्हं चिद्भिन्नं प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगी न वा? पारमार्थिकत्वाकारेणोक्तनिषेधप्रतियोगी न वा?''[5] इति मिथ्यात्वविप्रतिपत्तिवाक्येऽपि अस्यैव लक्षणस्य ग्रहणं दृश्यते। यस्मिन्नधिकरणे यद् प्रतीतं तस्मिन्नेवाधिकरणे तस्य प्रतीतस्य त्रैकालिकनिषेधं ब्रुवन् तस्य मिथ्यात्वं साधयतीदं लक्षणम्। द्वैतवादिना व्यासतीर्थेन आक्षिप्तानां समस्तदोषानां परिहारं कृत्वा द्वितीयमिथ्यात्वलक्षणम् अनवद्यमिति न्यरूपी आचार्यः मधुसूदनसरस्वतिः। तदाचार्यप्रणीतं अद्वैतसिद्धिनामकं ग्रन्थमधिकृत्य इत्थं द्वितीयमिथ्यात्वलक्षणं सदलं संक्षेपेणोपपादितमत्र।

सहायकग्रन्थसूची

1. मधुसूदनसरस्वती, अद्वैतसिद्धिः।
2. योगीन्द्रनाथः, अद्वैतसिद्धिबालबोधिनी।
3. शङ्कराचार्यः, छान्दोग्योपनिषद्भाष्यम्।
4. शङ्कराचार्यः, बृहदारण्यकोपनिषद्भाष्यम्।
5. प्रकाशात्मा, पञ्चपादिकाविवरणम्।

पादटिप्पणी

1. छान्दोग्योपनिषद् 6.2.1
2. पञ्चपादिकाविवरणम्
3. तत्रैव
4. बृहदारण्यकोपनिषद् 4.4.19
5. अद्वैतसिद्धिः 1.11

****

4. श्रीमद्भगवद्गीतायां कर्मयोगः

डॉ. मञ्जुनाथ एस्. जी.
सहाचार्यः, अद्वैतवेदान्तविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः वेदव्यासपरिसरः
बलाहरः, काङ्गड़ा, हिमाचलप्रदेशः

श्रीमद्भगवद्गीतापर्व महाभारतस्य भीष्मपर्वणि अस्ति। भीष्मपर्वणः त्रयोदशाध्यायादारभ्येदं भगवद्गीतापर्व आरभ्यते। भगवान् वेदव्यासः कुत्रपि 'भगवद्गीता' इति न ब्रवीति, 'भगवद्गीतापर्व' इत्येव कथयति। किन्तु कालक्रमेण भगवद्गीतापर्वणि पञ्चविंशतेः अध्यायादारभ्य द्विचत्वारिंशदध्यायपर्यन्तं विद्यमानानष्टादशाध्यायान् सप्तशतश्लोकान् 'भगवद्गीता' इति नाम्ना सूचयन्ति जनाः। अर्थज्ञानसौकर्यार्थम् अर्जुनविषादयोगः इत्यादिनामास्ति। प्रत्येकमध्यायः योग इति नाम्ना लोके प्रसिद्धः। अत्र योगो नाम परब्रह्मणा सहैक्यदर्शने, आत्मदर्शने वा मार्गः, उपायः, साधनमित्यर्थः। युज्यते परब्रह्मानेनेति योगः[1] इति परब्रह्मप्राप्तिमार्गः, परमपुरुषार्थप्राप्त्युपायः, आत्मज्ञानसाधनमित्याद्यर्थः। अन्येष्वप्यर्थेषु योगशब्दः लोके श्रूयते। यथा– समत्वं योग उच्यते[2], योगश्चित्तवृत्तिनिरोधः[3], अप्राप्तस्य प्राप्तिः योगः[4], योगः कर्मसु कौशलम्[5], अवगतानामिन्द्रियाद्युपसंहारेणैकाग्रतया स्वात्मसंवेद्यतासंपादनं योगः[6], इति।

उपनिषत्सु प्रतिपादितः निवृत्तिमार्गो वा ज्ञानमार्गो वा मोक्षसाधनं वा सकलोपनिषत्सारभूतगीतायां निरूपतिम्। एवं गीतायां विद्यमानाः सर्वे अध्यायाः अष्टादशयोगा इति पदव्यपदेशभाजो भवन्ति। एवमष्टादशाध्यायात्मिकेयं गीता, वेदे यथा कर्मकाण्डम्, उपासनाकाण्डम्, ज्ञानकाण्डञ्चेति विभज्यते, तथैव विषयाधारेण त्रिधा विभक्ता। कर्मषट्कम्, उपासनाषट्कम्, ज्ञानषट्कमिति क्रमेण षण्णामध्यायानां त्रिधा त्रिधा विभागः। षट्कत्रयमेव कर्मयोगः, भक्तियोगः, ज्ञानयोगश्चेत्युच्यते। अत्रदौ षडध्यायेषु कर्मनिष्ठा, मध्ये भक्तिनिष्ठा, अन्ते ज्ञाननिष्ठा च वर्ण्यते। परस्परविरोधात्, अधिकारिफलादिभेदान्नास्ति ज्ञानकर्मसमुच्चयः। सर्वविघ्ननाशिनी भगवद्भक्तिनिष्ठा कर्ममिश्रा, शुद्धा, ज्ञानमिश्रा चेति त्रिधा विभज्यते। गीतायां प्रथमषट्के कर्म, कर्मत्यागद्वारा युक्तिपूर्वकं त्वम् पदार्थः विशुद्धात्मा निरूप्यते। द्वितीयषट्के भगवद्भक्ति–निष्ठावर्णनपूर्वकं तत् पदार्थः परमानन्दस्वरूपः भगवान् निर्धार्यते। तृतीयषट्के तत्त्वमसि[7] इति महावाक्यार्थः, तत्, त्वम् पदयोरैक्यं सम्यक् प्रतिपाद्यते। तदुक्तम्–

सच्चिदानन्दरूपं तत्पूर्णं विष्णोः परं पदम्।
यत्प्राप्तये समारब्धा वेदाः काण्डत्रयात्मकाः।।
कर्मोपस्तिस्तथा ज्ञानमिति काण्डत्रयं क्रमात्।
तद्रूपाष्टादशाध्यायी गीता काण्डत्रयात्मिका।।
एकमेकेन षट्केन काण्डमत्रेपलक्षयेत्।
कर्मनिष्ठाज्ञाननिष्ठे कथिते प्रथमान्त्ययोः।।
यतः समुच्चयो नास्ति तयोरतिविरोधतः।
भगवद्भक्तिनिष्ठा तु मध्यमे परिकीर्तिता।।
उभयानुगता सा हि सर्वविघ्नापनोदिनी।
कर्ममिश्रा च शुद्धा च ज्ञानमिश्रा च सा त्रिधा।।
तत्र तु प्रथमे काण्डे कर्मतत्त्यागवर्त्मना।
त्वं पदार्थो विशुद्धात्मा सोपपत्तिर्निरूप्यते।।
द्वितीये भगवद्भक्तिनिष्ठावर्णनवर्त्मना।
भगवान्परमानन्दस्तत्पदार्थो विचार्यते।।
तृतीये तु तयोरैक्यं वाक्यार्थो वर्ण्यते स्फुटम्।
एवमप्यत्र काण्डानां सम्बन्धोऽस्ति परस्परम्[8]।। इति।

कर्मयोगः –

किन्नाम कर्मेति जिज्ञासायां कायेन वाचा मनसा च यत्क्रियते तत्कर्मेत्युच्यते। प्रारब्धम्, क्रियमाणम्, सञ्चितं चेति कर्म त्रिविधं भवति। यत्कर्मवशादिह जन्मनि अस्मिन् शरीरे सुखदुःखाद्यनुभूयते तत्प्रारब्धं कर्म। अहर्निशं वर्तमानजन्मनि सुकृतदुष्कृतरूपं यत्कर्म कृतं, क्रियते चानारधफलं तत्क्रियमाणम्। प्रारब्धक्रियमाणाभ्यामन्यदनारब्धफलं यदेकत्रितं कर्म तिष्ठति तत्सञ्चितम्। पुनः सञ्चितं द्विविधं सुकृतं दुष्कृतमथवा विधिः निषेधञ्च। श्रुतिस्मृतिपुराणाद्यनुमोदितं कर्म सुकृतम्। श्रुतिस्मृतिपुराणाद्यननुमोदितं कर्म दुष्कृतम्। सुकृतञ्च पुनः काम्यनित्यनैमित्तिकप्रायश्चित्तोपासनाभेदेन पञ्चविधम्। फलोद्देशेन विधीयमानानि कर्माणि काम्यानि, यथा 'स्वर्गकामो ज्योतिष्टोमेन यजेत' इति। अकरणे प्रत्यवायोत्पादकानि नित्यानि, सन्ध्यावन्दनादीनि स्ववर्णोचिताश्रमोचित-कर्माणि च। निमित्तमात्रमासाद्य अवश्यकर्तव्यतया विहितानि नैमित्तिकानि। 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते' इति विहितानि जातेष्ट्यादीनि। विहिताकरणप्रतिषिद्धसेवनरूपनिमित्तविशेषानुबन्धीनि पापक्षयमात्रेद्देशेन विहितानि प्रायश्चित्तानि, चान्द्रायणकृच्छ्रादीनि। शास्त्रबोधिते सगुणे ब्रह्मणि नैरन्तर्येण मनोवृत्तिस्थिरीकरणमानस-व्यापाररूपाणि शाण्डिल्य-दहर-वैश्वानरविद्यादीन्युपासनानि।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः[9]
न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः[10]**।।**
न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः[11]**।**
नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।
शरीरयात्रपि च ते न प्रसिद्ध्येदकर्मणः[12]**।।**
कुरु कर्मैव तस्मात्वं पूवैः पूर्वतरं कृतम्[13]**।**
इत्यादिश्रुतिस्मृतिवचनानि लोके कर्मप्रतिपादकानि शोशरूयन्ते।
किञ्च, उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः[14]**।।**

अनुद्यमेन कस्तैलं तिलेभ्यः प्राप्तुमर्हति[15]। उद्योगः खलु कर्तव्यः[16], शुभैराप्नोति देवत्वं निषिद्धैर्नारकीं तनुम्[17] इति च कर्मणः महत्त्वं ज्ञायते।

श्रीमद्भगवद्गीतायां प्रथमषट्के कर्मयोगः विस्तारेण निरूप्यते। कर्म एव योगः, मार्गः, उपायः, साधनं वा कर्मयोगः। अत्र कीदृशं कर्म बध्नाति? कथं मोचयति? कर्म मोक्षसाधनं वा न वा? मोक्षसाधनं चेत् साक्षात्साधनं वा, परंपरया वा? कीदृशं कर्म ज्ञानसहकारि? प्रतिबन्धकं कीदृशम्? इत्यादिविषयाः विचार्यन्तेऽस्मिन् षट्के। यतोहि कर्मणः गतिः दुर्ज्ञेया। यथा

कर्मणो ह्यपि बोद्धव्यं बोद्धयं च विकर्मणः।
अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः[18]**।।** इति।

प्रवृत्तिमार्गः अर्थकामयोः पुरुषार्थयोः साधनार्थम्, मोक्षप्राप्त्यर्थं निवृत्तिधर्मश्च भवति। अयं निवृत्तिमार्गः संन्यासः कर्मयोगश्चति द्विधा विभज्यते। तत्र संन्यासः कर्मयोग श्चोभावपि निःश्रेयसकरौ, उभयोर्मध्ये कर्मयोगः श्रेष्ठः। कर्मत्यागमात्रत्सिद्धिः न प्राप्यते। नैष्कर्म्यरूपज्ञान-योगस्योपायः कर्मयोगः। श्रुतौ कर्मयोगस्य ज्ञानयोगोपायत्वं प्रतिपादितम्। यथा- तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन[19] इति। ज्ञानिनः लोकसंग्रहार्थं कर्म कुर्वन्ति। जनकादयोऽपि कर्मणैव सिद्धिं गताः आसन्। श्रेष्ठाः यथाचरन्ति तदनुसरन्ति जनाः। कर्तव्यस्य पालनं विना यः भोगमनुभवति सः चोरः यः कर्तव्यपालनेन शरीरनिर्वाहार्थं यज्ञशेषेण जीवति सः सर्वपापात्प्रमुच्यते। यज्ञो वै विष्णुः[20] इति श्रुतिः। तस्माद्यज्ञार्थं क्रियमाणं कर्म मुक्तेः कारणं भवति। अहं किमपि कर्म न करोमीति बाह्यकर्म त्यक्त्वा मनसि विषयान् चिन्तयति सः मिथ्याचारी। अकर्मापेक्षया कर्म श्रेष्ठम्। अकर्मणा शरीरनिर्वाहोऽपि न शक्यते। प्रकृतिजैः सत्त्वरजस्तमोगुणैरहर्निशं सर्वः प्राणी कर्म करोति। तस्मात्कर्म करणीयमित्युपदिशति भगवान्।

कर्मणा मोक्षप्राप्तिर्भवति वा? इति चेत्, न। नान्यः पन्था विद्यतेऽयनाय[21] इति नित्यसिद्धब्रह्मस्वरूपस्यापि सतः प्राप्तौ ज्ञानमेव केवलं साधनं नान्यदिति श्रुतिस्मृत्यादिभिर्निश्चितत्वात्। तदुच्यते

ज्ञानेनैव कथं मुक्तिः कर्मभिश्चापि तत्स्मृतेः।

नाविद्यकत्वात् बन्धस्य नान्यः पन्था इति श्रुतेः[22]।। इति।

क्रियात्मकस्य कर्मणः परम्परया ब्रह्मावाप्तौ साधनता। यज्ञादीनां विविदिषोत्पादनद्वारा ब्रह्मप्राप्तौ परम्परयोपयोगः इति भामतीकारणां मतम्। सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्[23] इति सूत्रेऽप्युच्यते– विद्याया उत्पत्तिं प्रति दुरितक्षयहेतुत्वेन चित्तशुद्धिद्वारा दूरतो यज्ञादिसर्वापेक्षाऽस्ति। यथा च योग्यतावशेनाश्वो न लाङ्गलाकर्षणे विनियुज्यते, रथचर्यायां तु विनियुज्यते। एवं कर्माणि ज्ञानफलसिद्धावविनियुज्यमानान्यपि ज्ञानोत्पत्तौ दूरतो विनियुज्यन्ते इति। महाभारतेऽपि

ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः।

यथाऽदर्शतलप्रख्ये पश्यत्यात्मानमात्मनि[24]।।

इति कथ्यते।

तर्हि कथं कर्म करणीयमिति चेत्, योगिनः फलासक्तिं विनात्मशुध्यर्थं यथा कर्म कुर्वन्ति तथा लोकसंग्रहार्थं कर्म करणीयम्। फलासक्ताः कृपणाः भवन्ति। तस्मात्फलतृष्णां त्यक्त्वा कर्म करणीयमित्युपदिशति। यथा–

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि।।

योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनञ्जय।[25] इत्यादिः।

निष्कामकर्म परम्परया परमपदप्राप्तिकारणं भवति। संगं त्यक्त्वा भगवदर्थमेव सर्वाणि कर्माणि यः करोति सः कर्मणा न बध्यते, यथा पद्मपत्रमम्भसा न हि सम्बध्यते तथा। तस्मात्सहजं कर्म करणीयम्। अनात्मज्ञः क्षणमपि न हि अकर्मकृत्तिष्ठति। स्वधर्मे निधनमपि श्रेयस्करं भवति। यज्ञदानतपः कर्म न त्याज्यं कर्यमेव तत्[26]। किञ्च, किं करणीयम्, किमकरणीयमित्यत्र शास्त्रमेव प्रमाणम्। यथा–

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।

ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि[27]।। इति।

विस्तृतरूपेण कर्मजिज्ञासा गीतायामेवास्ति। कर्मयोगार्थं स्वस्यैवोदाहरणं ददाति भगवान्यथा–

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन।

नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि[28]।। इति।

दैवसम्पदः असुरसम्पदश्चेति भवन्ति लोके। तत्रसुरसम्पत्पुरुषाः पारमार्थिकविचारं न कुर्वन्ति। दैवसम्पत्पुरुषाः मोक्ष अधिकारिणः। तेष्वधिकारिषु मनुष्याणां सहस्त्रेषु कश्चिद्यतति सिद्धये[29] इति भगवदुक्त्यनुसारेण परमपदप्राप्त्यर्थं प्रयतमानाः विरलाः। यतोहि

अनादिप्रकृतिभावात् दैवसम्पत्पुरुषा अपि फलापेक्षिणः भवन्ति। 'लोकोऽयं कर्मबन्धनः' कर्म सर्वान् संसारे बध्नाति, कर्मफलरूपपुण्य-पापात्। 'अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्' इतीश्वरनियमः। स्वफलदानेन विना जन्मजन्मान्तरेष्वपि कर्म न नश्यति। पुण्यं पापमुभयमपि स्वफलभोगार्थं जन्मान्तरमुत्पादयति। जन्मान्तरे पुनः कर्म कुर्वन्ति। एवं जन्म कर्म, कर्म जन्मेति पौनःपुन्येन भवन्ति।

तर्हि एतादृशदुःखकारणात् संसारचक्रात् कथं मुक्तिरिति जिज्ञासायां, तत्र कर्मयोगः, संन्यासश्चेति मार्गद्वयमस्तीत्युच्यते। फलासक्तिं विना निष्कामकर्माचरणं कर्मयोग इति। अस्य फलं चित्तशुद्धिसम्पादनम्। यथा

चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये।

वस्तुसिद्धिर्विचारेण न किञ्चित्कर्मकोटिभिः[30]।। इति।

निष्कामकर्मेत्येवास्य नाम किमर्थम्? निष्क्रोधकर्म, निर्द्वेषकर्मेत्यादिनामानि कुतो नेति चेत्, सकलकर्मणः मूलं कामः, फलासक्तिर्वा भवति। काम एव कर्मबीजम्, क्रोधादय अस्य अंकुराः।

काम एष क्रोध एष रजोगुणसमुद्भवः।

महाशनो महापाप्मा विध्येनमिह वैरिणम्[31]।। इति।

अपि च, काम एष सर्वलोकशत्रुर्यन्निमित्ता सर्वानर्थप्राप्तिः प्राणिनां स एष कामः प्रतिहतः केनचित्क्रोधत्वेन परिणमते[32] इति शङ्करभगवत्पादाः। क्रोधः लोभमोहादीनामुपलक्षणम्। एतेषां दुर्गुणानां बीजं काम एव। दुर्बीजस्य छेदनेनासुरीसम्पन्नश्यति। तदर्थं निष्कामकर्माचरणमपेक्ष्यते। अनेन चित्तशुद्धिद्वारा ज्ञानमुत्पद्यते। तस्मात्कर्म स्वतः न बन्धकम्, तत्र फलासक्तिः बन्धकारणमिति सिद्धम्। यद्यद्धि कुरुते जन्तुस्तत्तत् कामस्य चेष्टितम्[33] इति फलापेक्षयैव सर्वे कर्म कुर्वन्ति, नास्ति निष्काम कर्मेति ये कथयन्ति तेभ्यः उच्यते 'यथा माता शिशोः प्रीत्यर्थं शिशुं शुश्रुषते, तथेश्वरप्रीत्यर्थं कर्म करणीयम्' इति।

पादटिप्पणी

1. भ.गी.शां.भा. 3.
2. भ.गी. 2.48
3. यो.सू. 1.2
4. भ.गी.शां.भा. 2.22
5. भ.गी. 2.50
6. तत्रैव.शां.भा. 16.1
7. छा.उ. 7.8.7
8. गू.दी. उपोद्घातः 3.10
9. ई.उ. 2
10. भ.गी. 3.5
11. तत्रैव 18.11
12. तत्रैव 3.8
13. तत्रैव 4.15
14. सु.र.भा.उ.प्र. 3
15. तत्रैव. 4
16. तत्रैव 1
17. नै.सि. 1.41
18. भ.गी. 4.17
19. बृ.उ. 4.4.22
20. तैत्ति.सं. 1.7.4
22. श्वे.उ. 3.86
22. वे.सि.सू.म. 3.1
23. ब्र.सू. 3.4.26
24. शां.प. 204.8
25. भ.गी. 2.47-48
26. तत्रैव. 18.5
27. तत्रैव 16.24
28. तत्रैव 3.22
29. तत्रैव 7.3
30. वि.चू. 11
31. भ.गी. 3.37
32. तत्रैव.शां.भा. 3.37
33. म.स्मृ. 1.123

****

5. मूल्याङ्कने मापने च प्रश्नानाम् उपादेयता

डॉ. कृष्णानन्द दन्नाना

सहायकाचार्यः, शिक्षाशास्त्रविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः वेदव्यासपरिसरः
बलाहरः, काङ्गड़ा, हिमाचलप्रदेशः।

सारांशः–

शिक्षाप्रणाल्यां मूल्याङ्कनस्य स्थानं महत्वपूर्णं वर्तते। मूल्याङ्कनं विना छात्राणां विकासः मार्गदर्शनं च नैव भवितुमर्हति। अतः आधुनिककाले मूल्याङ्कने बहूनि परिवर्तनानि दृश्यन्ते।तत्र शिक्षामनोविज्ञानस्य महत्वपूर्णं योगदानम् अस्ति। मूल्याङ्कने मापनं साधनं भवति। मापनाय उत्तमपरीक्षणं साधनं भवति तथा च उत्तमपरीक्षणाय विभिन्नप्रकाराणां प्रश्नानां ज्ञानं तेषां नियोजनमपेक्षते एवं विभिन्नप्रकारान् प्रश्नान् उपयुज्य उत्तमपरीक्षणस्य निर्माणं भवति तेन क्रमशः मापनं मूल्यांकनञ्च उत्तमं भवति।अतःउत्तमपरीक्षणाय मूल्यांकनाय च प्रश्नप्रकाराणां ज्ञानं निर्माणं नियोजनं च अत्यन्तमावश्यकं भवति। अस्मिन् लेखे क्रमशः एते विषयाः प्रस्तूयन्यते। मूल्याङ्कनस्य अर्थः, मूल्याङ्कनस्य परिभाषाः मूल्याङ्कनस्य वैशिष्ट्यम्, मूल्यङ्कनस्योद्देश्यानि, मापनस्य अर्थः, मापनस्य परिभाषाः, मापनस्य कार्याणि, परीक्षणनिर्माणम्, प्रश्नानां प्रकाराः, निबन्धात्मकप्रश्नाः, निबन्धात्मकपरिक्षायाः गुणाः, निबन्धात्मकपरिक्षायाः दोषाः, निबन्धात्मकपरीक्षायाः दोषान् दूरीकर्तुमुपायाः, वस्तुनिष्ठप्रश्नाः, वस्तुनिष्ठपरिक्षायाः गुणाः, वस्तुनिष्ठपरिक्षायाः दोषाः, वस्तुनिष्ठप्रश्नानां प्रकाराः इति।

कूटशब्दाः–मूल्यांकनम्, मापनम्, प्रश्नप्रकाराः।

मूल्याङ्कनस्य अर्थः–

मूल्याङ्कनं हि सततप्रचाल्यमाना विसृता प्रक्रिया। एतस्यां कस्यचिद् वस्तुनः उपयोगितायाः विषये निर्णयो निर्धार्यते। मूल्यस्य अङ्कनम् एव मूल्याङ्कनं भवति। मूल्याङ्कने वस्तुनः उपयोगित्वम् अनुपयोगित्वं वा परीक्ष्यते।

मूल्याङ्कनस्य परिभाषाः–

मूल्याङ्कनस्य विकासः शिक्षायां नूतनस्य दृष्टिकोणस्य परिणामो वर्तते। तदनुसारं शिक्षायाः केन्द्रं विद्यार्थी भवति। छात्राणां विकासाय मार्गदर्शनाय च मूल्याङ्कनस्य स्थानं महत्वपूर्णं भवति। मूल्याङ्कनस्य सम्प्रत्ययः एताभिः परिभाषाभिः सुस्पष्टं भवितुमर्हति।

कोठारीकमीशन–

मूल्याङ्कनं सततप्रचाल्यमाना प्रक्रिया। मूल्याङ्कनं शिक्षाप्रणाल्याः एकम् अभिन्नम् अङ्गं भवति। उभयोर्मध्ये घनिष्ठः सम्बन्धः वर्तते।

रेमर्सगेजयोः महोदययोर्मतानुसारम् –

जनस्य समाजस्य च एताभ्यां दृष्टिकोणाभ्यां किं समीचीनं वर्तते इत्येतस्यनिर्धारणं भवति मूल्याङ्कनस्योद्देश्यम् इति।

वेस्लेमहोदयमतानुसारम्–

मूल्याङ्कनं हि छात्रस्य व्यवहारे परिवर्तनेन सम्बन्धितानां तथ्यानामेकत्रीकरणस्य, तेषां विवेचनस्य च पद्धतिरस्ति इति।

स्पष्टमेतद्वर्तते यत् शिक्षया बालकानां व्यवहारे समाजदृष्टया च वाच्छनीयानि उत्तमानि च परिवर्तनानि कियज्जातानीति इति मूल्याङ्कनस्य कार्यम्। अनेन शिक्षाया उद्देश्यानां सिद्धौ बलं लभ्यते। मूल्याङ्कनं हि कस्यचिद् गुणस्य वैशिष्ट्यस्य वा मात्रात्मकस्य वर्णनस्य गुणवत्तायाः (Quality) निर्धारणं वर्तते। वस्तुनि जनोपलब्धानां गुणानां सन्तोषप्रदत्वं वाञ्छनीयत्वं वा कियद्वर्तते इति मूल्याङ्कनमेव निर्धारयति।

मूल्याङ्कनस्यवैशिष्ट्यम्–

मूल्याङ्कनस्य विश्लेषणेन एतस्य वैशिष्ट्यं प्रकटितं भवति। एतद् वैशिष्ट्यं अत्र प्रस्तुयते यत्–

1. मूल्याङ्कनमुद्देश्यकेन्द्रितं भवति।
2. मूल्याङ्कनस्य प्रक्रिया सततं प्रचलति।
3. मूल्यङ्कने व्यापकता भवति।
4. मूल्यङ्कनं विश्लेषाणात्मकं संश्लेषात्मकञ्च भवति।

मूल्यङ्कनस्योद्देश्यानि –

मूल्याङ्कनस्य प्रक्रिया सोद्देश्या भवति। एतस्य प्रमुखान्युद्देश्यानि निम्नलिखितानि सन्ति।

1. शिक्षणोद्देश्यस्य प्रदर्शनम्।
2. शिक्षणप्रक्रियायां प्रभावोत्पादनम्।
3. शिक्षणप्रक्रियाया: परीक्षणम्।
4. छात्राणां वर्गीकरणम्।
5. मानदण्डानां Scales निर्धारणम् चेति।

मापनस्य अर्थः–

मापनं हि मूल्यङ्कनस्याङ्गभूतं भवति। मूल्याङ्कनस्य प्रक्रियायां मापनेन एव परिणामानां वाञ्छनीयताया: (Desirability), निर्णय: क्रियते। मापनं साधनं भवति मूल्यांकनाय। मापनेन मात्रात्मकसंकलनं लभ्यते तथा च संकलितस्य विवेचनं, विश्लेषणं च मूल्यांकनेन क्रियते।

मापनस्य परिभाषाः–

काम्पबेलमहोदयः–

नियमानुसारेण वस्तूनां घटनानां च मात्रात्मकरूपेण व्याख्यानं मापनम्।

रासमहोदयः–

मापनम् एका परिमाणीकरणप्रक्रिया भवति।

हैल्मसटेडरमहोदयः–

मापनम् एका तादृशी प्रक्रिया येन कस्यचित् व्यक्ते: वस्तुनश्च निहितानां विशेषणानां अङ्कनं भवति।

मापनस्य कार्याणि–

वर्गीकरणम् – मापनेनैव छात्राणां वर्गीकरणम् भवितुमर्हति।

पूर्वकथनम् – मापनाधारेण छात्राणां भविष्यस्थितिं वक्तुं शक्नुम:।

तुलनाकरणम् – मापनेनैव तुलनात्मकाध्ययनं कर्तुं शक्नुम:।

परामर्शदानं निर्देशनञ्च – मापनाधारेण छात्राणां कृते परामर्शदानं निर्देशनञ्च दातुं शक्नुम:।

अन्वेषणाय उपकरणरूपेण – शोधक्षेत्रे मापनम् अन्वेषणाय उपकरणरूपेण भवति।

परिभाषाभि: स्पष्टं यत् मापनं नाम किमिति। मापनस्याङ्गभूतं भवति परीक्षणम्। मापनप्रक्रियाया: मुख्यं साधनं भवति परीक्षणम्। परीक्षणस्य निर्माणे प्रश्नानां भूमिका महत्वपूर्णं स्थानं भवति। अत: उत्तमपरीक्षणनिर्माणाय प्रश्नानां विषये ज्ञानं,संकलनं च अपेक्षते।

परीक्षणनिर्माणम् (Test Candtructions)

परीक्षाया: कृते परीक्षणस्य प्रश्नपत्रस्य वा निर्माणं क्रियते । परीक्षणनिर्माणेन सहैव उत्तरपत्रं निर्मितं भवति।

प्रश्नानां प्रकाराः–

प्रश्नानां प्रकारद्वयं मुख्यरूपेण–

1. **निबन्धात्मकप्रश्नाः** 2. **वस्तुनिष्ठप्रश्नाः**

निबन्धात्मकप्रश्नाः–न केवलं भारते अपि तु विभिन्नेषु राष्ट्रेषु निबन्धात्मकपरिक्षायाः बाहुल्यं प्रभुत्वं चासीद्यत् भारते तु अधुनापि निबन्धात्मक परीक्षायाः प्रचलनमस्ति। किन्तु प्रगतिशीलेषु राष्ट्रेषु एतादृशीपरीक्षाणां महत्वं नास्ति। एतादृशीषु परीक्षासु पाठ्यक्रमस्य विशिष्टस्य अङ्गस्य प्रश्नाः दीयते। छात्राः स्वसामर्थ्यानुरूपं स्वातन्त्रेण स्वैच्छया उत्तराणि लिखन्ति।

निबन्धात्मकपरीक्षायाः गुणाः–सामाजिकविज्ञानशिक्षणे भाषाशिक्षणे च निबन्धात्मकपरिक्षायाः महत्वमधिकं भवति।

निबन्धात्मकपरिक्षायाः अधोलिखिताः गुणाः सन्ति ।

1. छात्राणां भावावबोधकक्षमतायाः ज्ञानं भवति ।
2. छात्राणां भाषाशैल्याः लेखन–कलायाश्च ज्ञानं भवति।
3. निबन्धात्मकपरीक्षा छात्रेभ्यः पर्याप्तरूपेण स्वतन्त्रतां ददाति।
4. परीक्षायाः प्रश्नपत्रं सरलतयानिर्मितं भवति।
5. छात्राः सरलतया प्रश्नमधिगच्छन्ति।
6. निर्माणं समय ङ्कधनस्य च दृष्ट्या सरलं भवति।
7. समूह–परीक्षणस्य दृष्ट्या निबन्धात्मक–परीक्षाणां संचालनं सरलं भवति।
8. छात्राणां रचनात्मकचिन्तनस्य प्रोत्साहनं भवति।
9. छात्राः सरलतया लिखितुं सन्नद्धाः भवन्ति।

निबन्धात्मकपरीक्षायाः दोषाः–

1. निबन्धात्मकपरीक्षायाः विश्वसनीयता न भवति।
2. मूल्याङ्कने वैधतायाः अभावः भवति।
3. प्रश्नानां निर्माणं पाठ्यक्रमस्य विशिष्टस्याङ्गस्यैव भवति तेन समग्रपाठ्यक्रमस्य ज्ञानस्याध्ययनस्यावबोधनस्य च मूल्यङ्कनं न भवति।
4. समुचित उत्तराभावेऽपि छात्रः यत्किमपि लिखति तेन मूल्याङ्कनं सफलं न भवति।
5. मूल्याङ्कने परीक्षानिरीक्षकस्य प्रभावः अधिकः भवति तेन वस्तुनिष्ठता न भवति।

निबन्धात्मकपरीक्षायाः दोषान् दरीकर्तुमुपायाः–

1. प्रश्नानां निर्माणम् अतीवावधानतया भवेत् प्रश्नानां निर्माणं समुचितरीत्या भवेत्। येन छात्राः उत्तराणि लिखितुं वञ्चिता न स्युः।
2. प्रश्नानां वितरणं समग्रपाठ्यक्रमानुरूपेण स्यात्।
3. प्रश्नपत्रनिर्माता परीक्षकश्च एकः स्यात्।
4. मूल्याङ्कनकार्यम् अत्यधिकपरिश्रमेण भवेदिति।
5. मूल्याङ्कनस्य एकमेव परिमाणं भवेत्।

2. वस्तुनिष्ठप्रश्नाः–वस्तुनिष्ठपरीक्षणे उत्तरप्रदाने स्वतन्त्रता न भवति। छात्राः यदेच्छन्ति तदा उत्तरं दातुं समर्थाः न भवन्ति। प्रत्येकं प्रश्नः उत्तरस्य दृष्ट्या विशिष्टः भवति। छात्रेभ्यः अपेक्ष्यन्ते यत् ते तादृशमेव उत्तरं लिखन्तु इति। अपरा विशेषता भवति यत् इमानि परीक्षणानि संक्षिप्तरूपेण ज्ञानात्मकरूपेण उत्तराणि दातुं कथयन्ति।

वस्तुनिष्ठपरीक्षणस्य गुणाः

1. वस्तुनिष्ठपरीक्षणं समग्रे पाठ्यक्रमे प्रसारितं भवति।
2. मूल्याङ्कने अध्यापकः वञ्चनां कर्तुं न प्रभवति।
3. उत्तरस्य लेखनं अतीवसरलं भवति।

4. मूल्याङ्कनम् अतीव सरलं विश्वसनीयञ्च भवति।
5. पक्षपातरहितं मूल्यांकनं संभवति।
6. वस्तुनिष्ठपरीक्षणस्य माध्यमेन छात्राणां अवधानस्य, ज्ञानस्य तर्कशक्त्या निर्णयशक्त्या च ज्ञानं भवति।
7. भाषाया अधिकं महत्त्वं नास्ति।
8. अधिक लेखनस्यापि आवश्यकता न भवति। यतोहि लेखनं संक्षिप्तेषु शब्देषु वर्णेषु न भवति।

वस्तुनिष्ठपरीक्षणस्य दोषाः-

1. प्रश्नपत्रस्य निर्माणे समया।
2. अस्मिन् अशुद्ध-उत्तराणां माध्यमेनापि सफलताया: संभावना भवति।
3. भाषाया: अभिव्यक्ते महत्वं नास्ति।
4. अनुकरणस्य प्रवृत्तिर्भवति।

वस्तुनिष्ठप्रश्नानां प्रकाराः

(1) मेलका: प्रश्नाः-

यदा वयं कस्याश्चित् विशिष्ट-सूचनाया: परीक्षायां आवश्यकतां अनुभवाम:। यत्र च पुन:स्मरणस्य आवश्यकता न भवति। यस्य माध्यमेन तथ्यद्वयेषु सम्बन्धस्य योग्यता समुचितरीत्या भवेत्।

तत्र मेलका: प्रश्ना: पृच्छन्ते। ----------

उदाहरणम्-

वर्ग क	**वर्ग ख**
कोलंबो	इग्लैन्ड
नव दिल्ली	श्रीलंका
पजिंगा	भारतम्
लन्दन	अमेरिका
टोक्यो	चीन

(2) रिक्तस्थानपूर्तिः प्रश्नाः-

एतादृशेषु प्रश्नेषु विशिष्ट-सूचनाया: परीक्षणं भवति। प्रमुखतया नाम-दिनाङ्क:-संख्या-स्थानादीनां विषये प्रश्ना: भवन्ति।

1. जार्ज वाशिंगटन..... देशस्य राष्ट्रपति: आसीत्।
2. गणतन्त्रदिवस:.....दिनाङ्के आयोजित: भवति।
3. जवाहरलालनेहरूमहाभागस्य .....रचना अस्ति।

(3) सत्यासत्य प्रश्नाः-

मूल्याङ्कने एतादृशा: प्रश्ना: प्रयुज्यन्ते। प्रविधिशास्त्रस्य दृष्ट्या मूल्याङ्कने एतादृशा: प्रश्ना: श्रेष्ठा: भवन्ति, किन्तु अध्ययनेन उदाहरण रूपेण-

1. अस्माकं वर्तमान प्रधानमन्त्री अटलबिहारीवाजपेयी अस्ति सत्यम्/असत्यम्
2. पृथ्वी सूर्यस्य परिक्रमणं करोति सत्यम्/असत्यम्
3. अक्बर: महान् साम्राट् आसीत् सत्यम्/असत्यम्

(4) बहुविकल्पात्मकप्रश्नाः-

एतादृशेषु प्रश्नेषु प्रश्नानां सम्मुखे अपेक्षितानि उत्तराणि दीयन्ते। तेषु एकमेव उत्तरं सत्यं वास्तविकं च भवति। छात्रश्च शुद्ध उत्तरस्य चयनं कृत्वा क्रमाक्षरं लिखति। चिह्नाङ्कितं वा करोति। उदाहरणम्-

1. जार्जवाशिंगटन् राष्ट्रपतिरासीत्। ( )

क. अमेरिकादेशस्य ख. ब्रिटेन्देशस्य

ग. फ्रांसदेशस्य घ. जर्मनीदेशस्य

(5) सर्वोत्तमचयनप्रश्नाः -

एतादृशाः प्रश्नाः अपि बहुविकल्पात्मकाः भवन्ति। किन्तु प्रायः सर्वाण्युत्तराणि समीचीनानि भवन्ति। तेषु एकमेव उत्तरं सर्वोत्तमं भवति। छात्रा अस्यैवउत्तरस्य चयनं करोति। उदा- 1.साम्राट् अशोकः बौद्धः-धर्मं स्वीकृतवान्। यतोहि

1. बुद्धः तं प्रभावितवान्
2. कलिंगयुद्धं तं प्रभावितमकरोत्।
3. जनाः अशोकं बाध्यमकुर्वन्।

(6) सरला - स्मरणप्रश्नाः -

अस्यां परीक्षायां तादृशाः प्रश्नाः भवन्ति। येषां उत्तराणि अतीवसीमितेषु शब्देषु भवन्ति। अतीवलघूत्तरीयाः प्रश्नाः भवन्ति। एक द्वि त्रयेषु वा शब्देषु प्रश्नस्य उत्तरं दीयते।

1. पृथिव्याः उपग्रहस्य किं नाम अस्ति।
2. अस्माकं प्रथम प्रथानमन्त्री कः आसीत्।

(7) वर्गीकरणप्रश्नाः-

एतादृशेषु प्रश्नेषु केचन शब्दाः विभिन्न समूहेषु संयोजिताः भवन्ति। प्रत्येकस्मिन् समूहे समान वस्तु-व्यक्ति-स्थान-घटन-तथ्यानां वा नामानि भवन्ति। समूहे एकः शब्दः पृथक् भवति। छात्राः तस्य पृथक् शब्दस्य चयनं कुर्वन्ति।

1. पृथिवी, सूर्य, चन्द्र, शनि, मंगल, वायु
2. सूर, तुलसि, बिहारी, मीरा, कबीर, इन्दिरा गान्धी।

एवं प्रकारेण विभिन्नप्रकारान् प्रश्नान् उपयुज्य उत्तमपरीक्षणस्य निर्माणं भवति तेन क्रमशः मापनं मूल्यांकनञ्च उत्तमं भवति। अतः उत्तमपरीक्षणाय मूल्यांकनाय च प्रश्नप्रकाराणां ज्ञानं तथा च निर्माणमत्यन्तमावष्यकं इति ज्ञायते।

सन्दर्भग्रन्थ

1. सौरभ अग्रवाल, शिक्षा में मापन एवं मूल्यांकन
2. एस्. पि.गुप्ता, आधुनिक मापन एवं मूल्यांकन
3. डॉ. पार्थसारथी पाण्डेय, शिक्षा में मापन एवं मूल्यांकन

****

6. वैदिकज्ञानपरम्परायाः सन्दर्भे वेदानां स्वरूपं महत्त्वञ्च

वेदप्रकाशआर्यः

श्री जे, जे, टी, विश्वविद्यालय राजस्थान

मुख्य शब्दः- ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः ईश्वरः ज्ञानकर्म, उपासना, मोक्षः मन्त्रः।

प्रस्तावनाः- वेदशब्दः 'विद ज्ञाने' इति ज्ञानार्थकाद् विद्धातोर्धञ् प्रत्यये कृते वेद इति रूपं निष्पद्यते। ज्ञानार्थेको हि वेदशब्दः। वेदेषु ज्ञानराशिः इति वदन्ति विद्वान्सः। विद सत्तायाम्, विद विचारणे, विद्लृलाभे, विद चेतनाख्याननिवासेषु इति धातुभ्योऽपि घञ् वेदरूपं निष्पद्यते।

वेदाः चत्वारः-1. ऋग्वेद-यजुर्वेदः-सामवेदः-अथर्ववेदः। ऋग्वेदे ज्ञानं, यजुर्वेदे, कर्मकाण्डं, सामवेदे उपासना, अथर्ववेदे ज्ञानकर्मोपासनानां त्रयाणामपिविषयानां समन्वयः अस्ति।

ईश्वरज्ञानत्वात् वेदाः स्वतः प्रमाणभूताः। शब्दप्रमाणे च प्रमाणकुशलैः गृह्यन्ते। अतः वेदेषु प्रतिपादितं यत् ज्ञानं तदपि स्वतः प्रामाण्यम्। मोक्षस्य आत्मनः परमात्मनश्च स्वरूपं पुनर्जन्मादि विषयानां ज्ञानं अस्माभिर्वेदेषु एव गृह्यते। धर्मस्य मूलाधार वेद एव। स एव साधनः तत्त्वतत्त्वानां ज्ञानं यथा मनु-

वेदोऽखिलो धर्ममूलम्।[1]

मनुः मानवानां कर्त्तव्यस्य ज्ञानाय वेदानाम् एव आधारं स्वीकरोति।

यः कश्चित् कस्यचित् धर्मोमनुना परिकीर्तितः।

स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।[2]

यज्ञेषु दृढ़विश्वासः, एकेश्वरवादः, निष्कामकर्मवादः, ईश्वरस्य सर्वव्यापकत्वं, ज्ञानकर्मणोसमन्वयः, भौतिकताप्राप्ति, औसादिन्यम्, मानवजीवनस्य प्रधानलक्ष्यम्, पुरुषार्थचतुष्टयं मोक्षश्चादीनां ज्ञानं वेदेभ्यः उपनिषद्भ्यः वा अधिगच्छामः।

वेदस्योत्पत्तिः-भारतीयानां विश्वासो यत् वेदः शाश्वतिकमपौरुषेयं शास्त्रम्। निरवयवेश्वरात्रेषां प्रादुभार्वात्। अग्निवाय्यवादित्याङ्गिरसः तु निमित्तीभूता।

वेदप्रकाशार्थमीश्वरेण कृता इति विज्ञेयम्। वेदेषु शब्दार्थसम्बन्धाः परमेश्वरादेव प्रादुर्भूताः तस्य पूर्णविद्यावत्वात्।

''ऋषिर्दर्शनान् मन्त्रान् ददर्श।''[3]

''ऋषयो मन्त्रद्रष्टारः''[4]

ऋग्वेदादिभाष्यभूमिकायां वेदोत्पत्तिविषये स्वामिदयानन्देन प्रतिपादितम् अस्ति यत्-

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।

छन्दांसि जज्ञिरे तस्मात् यजुस्तस्माद् जायत।।[5]

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।

सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम्।

स्कम्भं तं ब्रूहि कतमः स्विदेव सः।।[6]

अर्थात् तस्मात्यज्ञात् सच्चिदानन्दादिलक्षणात् पूर्णात् पुरुषात् सर्वहुतात् सर्वपूज्यात् सर्वोपास्यात् सर्वशक्तिमतः परब्रह्मणः ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्च चत्वारो वेदाः तेनैव प्रकाशिता इति।

''एवं वा अरेऽस्या महतो भूतस्य निःश्वासितमेतद्य-ऋग्वेदो-

यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः''[7]

महर्षिदयानन्दः वेदेषु परमेश्वरादारभ्य तृणपर्यन्त–पदार्थेषु विज्ञानं स्वीकरोति। तत्रापि ईश्वरानुभवो मुख्योस्ति।[8]

चत्वारो वै इमे वेदाः ऋग्वेदो यजुर्वेदः सामवेदो ब्रह्मवेदः।।[9]

''ऋग्वेदस्य अर्थः–ऋच्यते स्तूयते प्रतिपाद्योऽर्थो यया सा ऋक्''। ऋग्वेदः विज्ञानविशेषस्य विश्वकोशः एव। ऋग्वेदे ज्ञानविज्ञान–अध्यात्म–समाजशास्त्र–अर्थशास्त्र–आयुर्वेद–मनोविज्ञान इत्यादिविषयाः संक्षेपतः वर्णिताः सन्ति। ऋग्वेदः चतुर्षु वेदेषु आधारस्तम्भः ग्रन्थः वर्त्तते। ऋग्वेदे 10552 मन्त्राः सन्ति।

ऋग्वेदस्य मुख्यो विषयः विज्ञानमस्ति। तस्य परमेश्वरादारभ्य तृणपर्यन्तपदार्थेषु साक्षाद्बोधान्नयत्वात्। तत्रापीश्वरानुभवो मुख्योऽस्ति। एव हि सर्वेषां वेदानां तात्पर्यमस्ति।

ऋग्वेदस्य शाखा – महाभाष्यकारः महर्षिणा पतंजलिना लिखितम् यत्–

''एकविंशतिधा बाहवृच्यम्''[10]

किन्तु चरणव्यूहस्य रचयिता केवलं पंचशाखाः उद्धृताः। येषां नामानि इत्थं सन्ति। (1) शाकलशाखा (2) वाष्कलशाखा (3) आश्वलायनशाखा (4) शाङ्खायन शाखा (5) माण्डूकायन शाखा इत्यादयः।

''ऋभिः स्तुवन्ति यजुर्भिः यजन्ति।'' गद्यात्मको यजुः अर्थात् गद्ये रचिताः मन्त्राः यजुष् कथ्यते। यजुर्वेदे मुख्यतया कर्मकाण्डस्य प्रतिपादनं वर्त्तते।

यजुर्वेदे 40 अध्यायाः एवं च 1975 पंचसप्ततिः अधिक नवदशशताः मन्त्राः सन्ति। अस्मिन् वेदे कर्मकाण्डः सर्वक्रिया प्रधानोऽस्ति–स सर्वः क्रियामयोऽस्ति। अयमपि द्विविधः परमार्थ सिद्ध्यर्थम्, लौकिकव्यावहारिकसिद्धयर्थञ्च। न कर्मकाण्डस्येदं तात्पर्यं यत् यज्ञ एव कर्मकाण्डः। अपितु तस्मिन् जीवनस्य सर्वाः क्रिया संविशन्ति। याभ्यः क्रियाभ्यः सर्वेषामुपकारो भवति।

यजुर्वेदस्य शाखा–साम्प्रतं यजुर्वेदस्य षट्शाखा उपलभन्ते।

(1) शुक्लयजुर्वेदस्य – वाजसनेयी (माध्यन्दिन) काण्व संहिता,

(2) कृष्ण यजुर्वेदस्य – कठसंहिता, मैत्रायणी संहिता, कपिष्ठलसंहिता, तैत्तिरीयसंहिता इत्यादयः।

'गीतिषु समाख्या'' ज्ञानानि यो वेत्ति स वेद तत्त्वम। यः सामवेदस्य सामानि जानाति, स तत्त्वं विजानाति। 'वेदानां सामवेदोऽसि''[11], इयं उक्तिः अपि सामवेदस्य महत्त्वम् एव प्रकटयति।

सामवेदस्य मुख्यविषयोपासना विद्यते। अस्याम् उपासनायां स्तुति प्रार्थनोपासनां त्रयाणां समावेशोऽस्ति। स्तुति–कस्यापि पदार्थस्य गुणदोषयोः वर्णनमस्ति। अर्थात् वस्तुनः यथार्थस्वरूपस्याभिव्यक्तिरेव स्तुतिः। प्रार्थनायाः अर्थोऽयं भवति–स्वसामर्थ्यान्तरे ईश्वरसम्बन्धेन यद्विज्ञानं प्राप्यते तस्य पुनः पुनः याचना एव प्रार्थना भवति। उपासनाया अर्थः समीपं भवति। ''यथा परमात्मनः गुणाः कर्माणि, स्वभावाः, पवित्राः भवन्ति तथैवास्माभिः करणीयम्''[12], एवं साहित्यिक–दृष्ट्या एवं च भारतीय संगीतशास्त्रस्य दृष्ट्या च सामवेदस्य महत्वं बहुमूल्यमस्ति।

सामवेदस्य शाखा–''सहस्रवर्मा सामवेद'' पतञ्जलिना लिखितं यत् सामवेदस्य 1000 सहस्रशाखाः आसन्। परं अस्मिन् काले तु सामवेदस्य तिस्रः एव शाखाः उपलब्धाः सन्ति।

(1) कौथुमीय (2) राणायनीयः (3) जैमिनीयः

सामवेदस्य द्वौ विभागौ स्तः (1) पूर्वार्चिकः (2) उत्तरार्चिकः च। सामवेदे पंचसप्ततिः अधिक अष्टादशशताः मन्त्राः सन्ति।

अथर्वाणोऽ धनवन्तः। भवतिश्चरति कर्मा। तत्प्रतिषेधः।।[13]

आचार्य यास्कानुसारेण 'थर्व'[14], धातु गत्यर्थकः अस्ति। 'थर्वन् शब्दस्यार्थः गतिशीलताऽस्ति, अथर्वन् शब्दस्यार्थः गतिहीनता स्थिरता भवति। अथार्वाक् इत्यनेन अथर्वा शब्दः भवति'' 'अथर्वा वै प्रजापतिः'।।[15]

चरक संहितायां प्रश्नोपस्थितः कः स्यात् आयुर्वेदः तस्योत्तरं आचार्य लिखति–''चिकित्सा चायुषो हितोपदिश्यते वेदच्चोपदिश्यायुर्वाच्यम्?''

पुनश्च महर्षिः समादधति- ''तत्र भिषणा पृष्ठेनैवृंचतुर्णामृक्साम-यजुरर्थववेदानां आत्मको अथर्ववेदे भक्तिरादेश्या। वेदोहयाथर्वणः स्वस्त्ययवबलिमंगल होम नियम प्रायश्चित्तोपवासमन्त्रादि परिग्रहाच्चिकित्सां प्राह'' प्रस्तुतसन्दर्भे भगवता सुश्रुतस्य वचनमिदम्

''इह खल्वायुर्वेदो नाम यदुपाङ्गमथर्ववेदस्य''[16]

अतः अथर्ववेदस्य मुख्यविषयः ज्ञानम् अस्ति। ज्ञानस्यार्थोऽस्ति ईश्वरात् तृणपर्यन्तानां पदार्थानां सम्यक् ज्ञानम्।

एवं वेदो हि नाम अशेषज्ञानविज्ञानराशिः। आचार्य सायणेन प्रतिपादितं यत्-

''प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।

एवं विदन्ति वेदेन तस्मात् वेदस्य वेदता।।''[17]

उपसंहार-

वर्णाश्रमः धर्मः, चत्वारो आश्रमः, स्त्रीपुरुषयोः समानाधिकारः, वैदिकधर्मस्य स्वरूपम्, वेदे मोक्षस्यानन्दः, वेदे पुनर्जन्मः, वेदेराष्ट्रभावना, वेदे मांसभक्षणनिषेधः, वेदे द्यूतनिषेधः, कृषिप्रशंसा, एवं विधाः जनकल्याणकारिणोपदेशाः, परामर्शाश्च वेदेषु निर्दिष्टाः सन्ति। तेन मानवसमाजस्य नितरां कल्याणं भवति।

सन्दर्भग्रन्थसूच्यः

1. 1989 - पाणिनीयशिक्षा - हरियाणासाहित्यसंस्थानम् गुरुकुल-झज्जरम्
2. 1989 - धातुपाठः - हरियाणासाहित्यसंस्थानम् गुरुकुल-झज्जरम्
3. 1994 - अष्टाध्यायी - महर्षिपाणिनिः , हरियाणासाहित्यसंस्थानम् गुरुकुल-झज्जरम्
4. 2010 - यजुर्वेदः भाष्यकारः - महर्षिः दयानंदः सरस्वती, सार्वदेशिकः आर्यप्रतिनिधिसभा, दिल्ली
5. 2010 - सामवेद,भाष्यकारः - महर्षिः दयानंदः सरस्वती, सार्वदेशिकः आर्यप्रतिनिधिसभा, दिल्ली
6. 2010 - अथर्ववेद, भाष्यकारः - महर्षि दयानंद सरस्वती, सार्वदेशिकः आर्यप्रतिनिधिसभा, दिल्ली
7. 2006 - विशुद्ध मनुस्मृतिः - डॉ सुरेंद्र कुमार, आर्षसाहित्य प्रचारट्रस्टम्, खारी बावली, दिल्ली
8. 1980 - सुश्रुतसंहिता - संपादकः, हरियाणासाहित्यसंस्थानम् गुरुकुल-झज्जरम्
9. 1999 - शतपथब्राह्मणः - सम्पादकः -स्वामी सत्यप्रकाश सरस्वती, गोविन्दरामः हासानन्दः,दिल्ली-06
10. 2010 - स्वमन्तव्यामन्तव्यप्रकाशः - महर्षिः दयानंदः सरस्वती, सार्वदेशिकः आर्यप्रतिनिधिसभा, दिल्ली
11. 1999 - निरुक्तः - संपादकः, हरियाणासाहित्यसंस्थानम् गुरुकुल-झज्जरम्
12. 1995 - ऋग्वेदादिभाष्यभूमिका - महर्षिः दयानंदः सरस्वती, सार्वदेशिकः आर्यप्रतिनिधिसभा, दिल्ली
13. 1987 - गोपथब्राह्मणः - सम्पादकः -स्वामी सत्यप्रकाश सरस्वती, गोविन्दरामः हासानन्दः, दिल्ली-06
14. 1989 - व्याकरण-महाभाष्यम् -संपादकः, हरियाणासाहित्यसंस्थानम् गुरुकुल-झज्जरम्

पादटिप्पणी

1. मनु 2/6
2. मनु 2/7
3. निरुक्त
4. निरुक्त
5. यजु. 31/7
6. अथर्व. 10/23/4/7/20
7. शं. का. 14 अ. 5
8. ऋ. भा. भू. पृ. 43
9. गोपथ ब्रा.
10. महा. पस्पशा.
11. गीता. 10. ध् 22
12. स्वमन्तव्यामन्तव्य प्रकाश
13. निरुक्त 11-18
14. धातुपाठ
15. निरुक्त
16. सुश्रुत सूत्रस्वान.1
17. कृष्ण यजुर्वेद तैत्तिरीयसंहिता

****

7. वत्सापाकरणविचारपरिशीलनम्

डॉ. आर. सुब्रह्मण्य भिडे

सहाचार्यः, आपस्तम्बपौरोहित्यविभागः

श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः

विद्वद्विदितमेव हि यत् कर्म-ब्रह्मणी मीमांस्यमाने शास्त्रे क्रमात् पूर्वोत्तरमीमांसे इति प्रसिद्धेति। तत्र तावत् भगवता जैमिनिना प्रणीते पूर्वमीमांसाशास्त्रे वेदबोधितकर्मसमूहस्य प्रसङ्गादागतानामितरेषां विषयाणाञ्च 'अथाऽतो धर्मजिज्ञासा' (पू.मी.1.1.1) इत्यारभ्य धर्मजिज्ञासेति नाम्ना विचारः कृतः, निर्णयो दत्तश्च।

अस्यां पूर्वमीमांसाशास्त्रपरम्परायाम् आयाताः जैमिन्युत्तरकालिकाः विद्वांसः शास्त्रविचारान् पौनःपुन्यविचारविमर्शनेन द्रढयितुं लोकान् अनुजिघृक्षवः सन्तः भाष्य-व्याख्यान-विवरण-टीका-कारिकामाध्यमेन नैकान् ग्रन्थान् प्राणैषुः।

तत्र च वेदभाष्यनिर्मातारः सायणाचार्याः पूर्वमीमांसाशास्त्रनि-र्णीतांशान् स्वकीये जैमिनीयन्यायमालाग्रन्थे सरलया सुलभया च शैल्या श्लोकरूपेण व्यररचन्। तत्र चतुर्थाध्याये वत्सापाकरणान्तर्गतः शाखाहरणविचारः, तयैव शाखया उपवेषकरणविषयश्च चिन्तितः।

वत्सापाकरणं नाम वत्सानाम् अपाकरणम्, पृथक्करणमिति यावत्। संनयतः यजमानस्य दर्शयागार्थं सायंदोहः (दध्यर्थं) प्रातर्दोहः (क्षीरं) च आवश्यकौ। तत्सिद्ध्यर्थं गवां चारणसमये तद्वत्साः पलाशशाखया अपाक्रियन्ते।

वत्सापाकरणमन्त्राः कृष्णयजुर्वेदीय-तैत्तिरीयसंहितायाम् आरम्भे एव श्रूयते - 'इषे त्वोर्जे त्वे'ति। तत्र वत्सापाकरणमन्त्राणामेव कथं प्राथम्यमित्यत्र इदमुच्यते यत् - दर्शयागे त्रीणि प्रधानहवींषि, पूर्णमासे च त्रीणि। आग्नेयोऽष्टाकपालः उभयत्र समानाम्। अन्यद्द्वयं दर्शे ऐन्द्रं दधि पयश्च। पूर्णमासे तु सामान्याद्भिन्नं द्वयम् आज्येन प्राजापत्यः उपांशुयागः, अग्नीषोमीयः एकादशकपालश्च।

तत्र प्रतिपदि यागदिने दधि होतुं दधि सम्पादनीयम्। तदर्थम् अमावास्यायां रात्रौ गावो दोग्धव्याः। तद्दोहार्थं प्रातःकाले लौकिकदोहानन्तरं स्वमातृभिः सह चरन्तो वत्साः मातृभ्यः अपाकर्तव्या भवन्ति। अतोऽस्य कर्मणः वत्सापाकरणमिति कर्मनाम, प्राथम्यञ्च।

विषयेऽस्मिन् श्रुतिमूलानि कर्मविशदक-श्रौतसूत्राणि एवं विशदयन्ति -

1. **संनयतः पलाशशाखां शमीशाखां वाऽऽहरति बहुपर्णां बहुशाखाम् अप्रतिशुष्काग्रामसुषिराम्।**
2. **यं कामयेताऽपशुः स्यादित्यपर्णां तस्मै शुष्काग्रामा हरेदपशुरेव भवति। यं कामयेत पशुमान्थ्स्यादिति बहुपर्णां तस्मै शुष्काग्रामाहरेत्पशुमन्तमेवैनं करोतीति विज्ञायते।**
3. **सा या प्राच्युदीची प्रागुदीची वा भवतीषे त्वोर्जे त्वेति तामाच्छिनत्ति। अपि वेषे त्वेत्याच्छिनत्ति, ऊर्जे त्वेति संनमयत्यनु मार्ष्टि वा।**
4. **इमां प्राचीमुदीचीम्। इषमूर्जमभि सस्कृताम् । बहुपर्णामशुष्काग्राम्। हरामि पशुपामहम् इत्याहरति।**
5. **वायवः स्थोपायवः स्थेति तया षडवरार्ध्यान्वत्सानपा-करोति। दर्भैर्दर्भपुञ्जीलैर्वा।**
6. **देवो वः सविता प्रार्पयत्विति शाखया गोचराय गां प्रस्थापयति। प्रस्थितानामेकां शाखयोपस्पृशाति दर्भैर्दर्भपुञ्जीलैर्वा।**
7. **आ प्यायध्वमघ्निया इन्द्राय देवभागमित्येके समामनन्ति। महेन्द्रायेत्येके।**
8. **इन्द्रं निगमेषूपलक्षयेदिन्द्रयाजिनो महेन्द्रं महेन्द्रयाजिनः।**
9. **शुद्धा अपः सुप्रपाणे पिबन्तीः शतमिन्द्राय शरदो दुहानाः। रुद्रस्य हेतिः परि वो वृणक्त्विति प्रस्थिता अनुमन्त्रयते।**
10. **ध्रुवा अस्मिन्गोपतौ स्यात बह्वीरिति यजमानस्य गृहानभिपर्यावर्तते।**
11. **यजमानस्य पशून्पाहीति अग्निष्ठे अनसि अग्न्यगारे वा पुरस्तात्प्रतीचीं शाखामुपगूहति पश्चात्प्राचीं वा। (आ.श्रौ.सू.1.1.8 - 1.2.10) इति।**

अस्मिन् कर्मणि विनियुक्ता मन्त्राः तैत्तिरीयसंहितायां प्रथमकाण्डे प्रथमप्रश्ने प्रथमानुवाके 'इषे त्वोर्जे त्वे'त्यादिमन्त्राः, अच्छिद्रप्रश्ने एको मन्त्रः, शाखान्तराच्च एको मन्त्रश्च दृश्यन्ते।

आहत्य एतत्कर्मार्थम् अष्टौ मन्त्रा विनियुज्यन्ते। तत्र बहुपर्ण-बहुशाखा- अप्रतिशुष्काग्र-असुषिरात्मिकां प्राच्याम् उदीच्याम् ऐशान्यां वा दिशि भवां पलाशशाखां शमीशाखां वा 'इषे त्वोर्जे त्वे'ति मन्त्रेण आच्छिनत्ति। अच्छिद्रप्रश्ने आम्नातेन 'इमां प्राचीमुदीची'मिति मन्त्रेण आच्छिन्नशाखामाहरति। एवमाहृतया पलाशशाखया 'वायवः स्थोपायवः स्थे'ति मन्त्रेण षट्कृत्वो वत्सानपाकरोति।

ततः 'देवो वः सविता.... माऽघशसः' इति मन्त्रेण तयैव शाखया गोचराय गाः प्रस्थापयति। 'शुद्धा अपः सुप्रपाणे पिबन्तीः ... शतमिन्द्राय शरदो दुहानाः' इति शाखान्तरगतमन्त्रेण, 'रुद्रस्य हेतिः परि वो वृणक्तु' इति च तैत्तिरीयसंहिताम्नातमन्त्रेण प्रस्थिता गा अनुमन्त्रयते। 'ध्रुवा अस्मिन् ... बह्वी'रिति यजमानस्य गृहानभ्यैति। 'यजमानस्य पशून्पाही'ति अग्निष्ठे अनसि, अग्न्यगारे वा पुरस्तात्प्रतीचीं पश्चात्प्राचीं वा शाखामुपगूहति।

एषां मन्त्राणां विनियोगः इत्थं सङ्गृहीतः सायणैः -

इषे शाखां छिनत्यूर्जे मार्ष्टि वायेति वत्सकान्।
अपाकृत्याऽथ देवो गाः प्रस्थाप्याऽऽप्येति गां स्पृशेत्॥
रुद्रस्येत्यभिमन्त्र्यैता ध्रुवेति गृहमाव्रजेत्।
यजेति शाखोपगूह इत्यष्टावनुवाकगाः॥

इति। (तै.सं.सा.भा.1.1.1)

अत्र शाखाच्छेदनप्रयुक्तमन्त्रविभागे आपस्तम्ब-बोधायनयोः किञ्चन वैविध्यं वर्तते। बोधायनेन 'तामाच्छिनत्तीषे त्वोर्जे त्वेति' (बो.श्रौ.सू.1.1) इत्युच्यते। आपस्तम्बः उक्तमेतदभिधाय मन्त्रभेदपक्षमाश्रित्य विनियोगभेदमेवमाह - 'इषे त्वोर्जे त्वेति तामाच्छिनत्ति। अपि वा इषे त्वेत्याच्छिनत्ति, ऊर्जे त्वेति संनमयत्यनुमार्ष्टि वा'। (आ.श्रौ.1.1.10-11) इति। 'संनमयती'त्यत्र ऋजूकरोतीत्यर्थः। 'अनुमार्ष्टि' इत्यत्र आनुलोम्येन संलग्नधूल्यादीनाम् अपनयनमुच्यते। अयं मन्त्रभेदपक्षः जैमिनिना द्वितीयाध्याये प्रथमपादे 'अर्थैकत्वादेकं वाक्यं, साकाङ्क्षं चेद्विभागे स्यात्। समेषु वाक्यभेदः स्यात्'। इति स्वीकृतः। (मी.सू.2.1.46-47)

अत्र वत्सापाकरणार्थायाः पलाशशाखायाः प्राशस्त्यं श्रुतावेवं चिन्तितम् -

तृतीयस्यामितो दिवि सोम आसीत्। तं गायर्त्याहरत्। तस्य पर्णमच्छिद्यत। तत्पर्णोऽभवत्। तत्पर्णस्य पर्णत्वम्। ब्रह्म वै पर्णः। यत्पर्णशाखया वत्सानपाकरोति। ब्रह्मणैवैनानपाकरोति। (तै.ब्रा.3.2.1) इति।

अर्थात् द्युलोके सोम आसीत्। तं गायत्रीछन्दः आहरत्। आहरणकाले अभिघातेन सोमपर्णं भूमौ पतितम्। तस्मात् पलाशवृक्षः आविर्भूतः। पतितात् पर्णात् आविर्भूतस्य पलाशवृक्षस्यापि 'पर्णम्' इति नाम सञ्जातम्। पर्णवृक्षः ब्रह्मैव। अतः पर्णशाखया वत्सापाकरणेन साक्षात् ब्रह्मणैव वत्सा अपाकृता भवन्तीति सारः। पर्णस्य ब्रह्मसम्बन्धप्रसिद्धिस्तु - देवा वै ब्रह्मन्नवदन्त। तत्पर्ण उपाशृणोत्। (तै.सं.3.5.7) इत्यादिश्रुत्यन्तरेष्वपि प्रसिद्धम्।

अत्र शाखाया आहरणे - यत्प्राचीमाहरेत्। देवलोकमभिजयेत्। यदुदीचीं मनुष्यलोकम्। प्राचीमुदीचीमाहरति। उभयोर्लोकयोरभिजित्यै। (तै.ब्रा.3.2.1) इति श्रुतिवाक्येषु प्राच्यादिदिक्शब्देन मुख्यार्थत्वात् दिग्विवक्षितेत्याक्षेपः। दिश आहर्तुमशक्यत्वात् दिक्सम्बन्धिन्याः शाखायाः उपलक्षणीयत्वात्, तत्तद्दिग्वर्तिनी शाखा आहार्येति समाधिः।

विषयोऽयम् एवं चिन्तितं जैमिनीय-न्यायमालायां -

प्राचीमाहरतीत्यत्र दिक्शाखा वाऽस्तु दिक्श्रुतेः।
आहार्यत्वं दिशो नास्ति शाखा तेनोपलभ्यते।।

(जै.न्या.4.2.3) इति।

वत्पापाकरणानन्तरं शाखाया उपगूहनं भवति। पश्चात् उपवेषकरणकाले तां शाखां द्विधा छित्वा मूलभागः उपवेषः क्रियते। उपवेषश्च अङ्गारनिरूहण-कपालोपधानादि कर्म कर्तुम् उपयुज्यते।

अत्र विचारः एवं भवति – अन्तर्वेदि शाखायाः पलाशान्यसर्वाणि प्रशात्य, मूलतः शाखां परिवास्य उपवेषं करोति ...। (आ.श्रौ.1.6.7) इति।

अत्रायमर्थः – 'इषे त्वे'ति मन्त्रेण या शाखा छिन्ना, तस्याः शाखायाः मूलभागं भङ्क्त्वा, तं (मूलभागं) उपवेषं कुर्यादिति।

अत्र एतयोः मूलाग्रयोः 'उपवेषेण कपालन्युपदधाति' 'शाखया वत्सानपाकरोति' इति पृथग्विनियोगः दृश्यते। अतः कपालोपधानं वत्सापाकरणञ्चेत्युभयं शाखाच्छेदनेन प्रयोजनं भवति। यतः अग्रमूलयोः समानत्वेन विभज्य विनियोगो भवतीति चेत् मैवम्।

उपवेषं करोति इत्ययं विधिः उपवेषस्य प्रकृतिद्रव्यमपेक्षते। सा च अपेक्षा मूलेन पूर्यते। तच्च मूलं शाखार्थम्। 'इषे त्वोर्जे त्वेति तामाच्छिनत्ति' (आ.श्रौ.1.1.10) इत्यत्र छिन्नायाः समूलायाः शाखायाः सौकर्यार्थं परिवासनवाक्येन पुनः मूलापादानकं छेदनं श्रूयते। असति मूले मूलापादानकं छेदनं न सम्भवति। तस्मात् शाखार्थमेव मूलं, न तु उपवेषार्थम्। अतः अन्यार्थमूल-अनुनिष्पन्नेन उपवेषेण क्रियमाणं कपालोपधानं न शाखाच्छेदनस्य प्रयोजकं, किन्तु वत्सापाकरणमेव तत्प्रयोजकम्। तथा सति यत्र शाखायाः प्रथमच्छेदनेनैव सौकर्यं सम्पद्यते तत्र उपवेषसिद्धये पुनः, प्रयत्नेन मूलं न सम्पादनीयम्। लौकिकेनैव केनचित् काष्ठेन कपालान्युपधेयानि इत्येषोऽशः जैमिनीयन्यायमालायां एवं विवृतं वर्तते –

शाखां छित्वोपवेषं च मूले कुर्वीत शाखया।
नुदेद्वत्सान् कपालानि स्थापयेदुपवेषतः॥
द्वयं प्रयोजनं छित्तेर्वत्सापाकृतिरेव वा।
आद्योऽग्रमूलयोरत्र विभज्य विनियोगतः॥
उपवेषं करोतीति साकाङ्क्षोऽन्यार्थमूलतः।
पूर्यतेऽतोऽनुनिष्पादीस तस्माद्युज्यतेऽन्तिमः॥

इति। (जै.न्या.4.2.4-6)

एवं मीमांसाशास्त्रे निर्णीतप्रकारेण वत्सापाकरण-उपवेषकरणविचारः, जैमिनीयन्यायमालायां सरल-सुलभशैल्या श्लोकरूपेण विचारितो वर्तते। एतदग्रन्थकर्तारः वेदभाष्यप्रणेतारः सायणाचार्याः स्वकीयवेदभाष्ये श्लोकानिमान् उदाहरन्तो वेदविषयान् विचारयन्ति। सर्वज्ञकल्पाः सायणाचार्याः बहुशास्त्रग्रन्थान् वेदभाष्यञ्च विरच्य अनितरसाधारण्या लोकोपकृत्या लोकाननुगृह्णन्तश्चकासत इति तान् पौनःपुन्येन प्रणम्य विरम्यत इति शम्।

परामृष्टग्रन्थाः

1. मीमांसादर्शनम्
2. आपस्तम्बश्रौतसूत्रम्
3. बोधायनश्रौतसूत्रम्
4. तैत्तिरीयसंहिता(सायणभाष्ययुता)
5. जैमिनीयन्यायमाला
6. तैत्तिरीयब्राह्मणम्

****

8. रत्नावल्यां समाहितानाम् अलङ्काराणां विवेचनम्

देवेन्द्रप्रसादः

शोधच्छात्रः, साहित्यविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः श्रीरघुनाथकीर्तिपरिसरः,

देवप्रयागः

रत्नावलीनाटिकेति एकं सहजश्रद्धाभावेन निस्सृतहार्दिकभावानां निबन्धनमस्ति। अतः अस्यां नाटिकायां प्रयत्नपूर्वकं किमपि न समावेशितम्। तथापि उत्तमं काव्यमिदम्। उत्तमकाव्यस्य सर्वाणि तत्त्वानि अत्र सहजरूपेण समाहितानि सन्ति। उत्तमकाव्यतत्त्वेषु अलङ्काराः अपि सहजतया प्रयुक्ताः स्युः न तु प्रयत्नसाध्याः। प्रयत्नसाध्यालङ्कारे तु काव्यं चित्रकाव्यं किं वा अधमकाव्यं भवति। किन्तु अस्मिन् काव्ये तु सहजतया यत्र कुत्रचित्रापि अलङ्काराः उत्तमरूपेण आगताः सन्ति। काव्ये समाहितालङ्काराणां विवेचनात् पूर्वं किञ्चित् प्रस्तावनारूपेण अलङ्कारः कः? किं च तस्य स्वरूपमिति पूर्वाचार्याणाम् अभिमतं प्रस्तूयते-

वस्तुतः साहित्येऽलङ्कारस्य प्रयोगः अतिप्राचीनोऽस्ति। प्राचीनतमे साहित्ये ऋग्वेदे उपमादीनाम् अलङ्काराणां रमणीयप्रयोगाः सन्ति। निरुक्तेऽपि उपमायाः लक्षणं भेदाः उपमावाचकाः शब्दाश्च निरूपिताः सन्ति। भरतमुनिः नाट्यशास्त्रे उपमारूपकदीपकयमकादिसञ्ज्ञकानां चतुर्णामलङ्काराणां वर्णनमकरोत्। संस्कृतजगति भामहः एव सर्वप्रथममलङ्काराणां व्यवस्थितरूपेण निरूपणं कृत्वा अलङ्काराणां काव्यत्वमुपस्थापितवान् तथा च अलङ्कारसम्प्रदायः साहित्यशास्त्रे स्थापितवान्। सः नाट्यशास्त्रकारस्य भरतमुनेः निरूपितानां रसादितत्त्वानामलङ्कारेषु अन्तर्भावं कृत्वा रसवदादीनामलङ्काराणां निरूपणं कृतवान्।

अलङ्कारशब्दस्यार्थः-

व्याकरणदृष्ट्या अलङ्करोतीति अलङ्कारः अथवा अलङ्क्रियते अनेनेति अलङ्कारः इति व्याख्यायते। एवम् उभयविधव्याख्यया अलङ्करणसाधनरूपेण व्यवस्थापितः। अलङ्कारः कः? काव्यशास्त्रे काव्ये वा अलङ्काराः के? इति प्रतिपादयित्सवः अनेके आचार्याः अनेकप्रकारेण अलङ्कारस्य लक्षणं प्रतिपादितवन्तः। तत्र प्रथमं भामहमतमुपस्थाप्यते-

वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः[1]

वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते।[2]

सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।

यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना॥[3]

अत्र भामहकृत-अलङ्कारलक्षणे वक्रोक्त्या प्राधान्यमलङ्कारे इति प्रतिपादितम्।

दण्डीकृतालङ्कारलक्षणम्-

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।[4]

मम्मटकृतालङ्कारलक्षणम्-

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।

हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥[5]

पण्डितजगन्नाथकृतम् अलङ्कारलक्षणनिरूपणम्-

काव्यात्मनो व्यङ्ग्यस्य रमणीयता प्रयोजका अलङ्काराः।[6]

अलङ्काराणां विकासः वेदेभ्यः एव जातः। वेदेषु उपमोत्प्रेक्षानु-प्रासादयः अलङ्काराः सन्ति। भरतमुनिना चत्वारः एवालङ्काराः स्वनाट्यशास्त्रे प्रतिपादिताः सन्ति। ततश्च अलङ्काराणां स्वरूपं व्यवस्थापयन् भामहः 39 अलङ्काराणां प्रतिपादनं कृतवान्। भामहेन प्रेरितो दण्डी अपि अलङ्काराणां प्रतिपादनं किञ्चिद् भिन्नरीत्या कुर्वन् 35 अलङ्काराणां व्याख्यानं प्रस्तुतवान ततश्च उद्भटाख्येनाचार्येण स्वकाव्यलङ्कारसङ्ग्हे 41 अलङ्काराः

प्रतिपादिता:। तेन भिन्नरीत्या वामनेनापि अलङ्काराणां व्याख्यानं कृत्वा 33 अलङ्काराणां प्रतिपादनं कृतम्। काव्यालङ्कारसूत्रमिति ग्रन्थश्च प्रणीत:। तत: रूद्रटेन 52 अलङ्काराणां प्रतिपादनं कृतम्। मम्मटेन स्वकाव्यप्रकाशे 68 अलङ्काराणां व्याख्यानं कृतम्। रुय्यक: स्वालङ्कारसूत्रे 78 अलङ्कारान् व्याख्यायति। ततश्च विश्वनाथकविराजकृतसाहित्यदर्पणे 82 अलङ्कारा: उपवर्णिता: सर्वाधिकसङ्ख्यायां अप्पयदीक्षितप्रणीते कुवलयानन्दे 123 अलङ्काराणां प्रतिपादनं विद्यते। ततश्च पीयूषवर्षजयदेवेन एतेषामलङ्काराणां प्रतिपादनं कृतम्। अप्पयदीक्षितस्य जयदेवस्य च प्रतिपादने विशेषभेदो नास्ति। प्राय: समानता विद्यते।

अलङ्काराणां वर्गीकरणम्-

संस्कृतकाव्यशास्त्रीयाचार्येषु रुय्यकेन अलङ्काराणां वैज्ञानिकं विभाजनं सप्तधा विहितं तदेवात्र प्रस्तूयते। परवर्तिन: प्राय: इमामेव विभाजनरीतिं स्वीकृतवन्त:। यथा-

* सादृश्यमूलका: अलङ्कारा:-उपमारूपकोत्प्रेक्षादय: अलङ्कारा:।
* विरोधमूलका: अलङ्कारा:-विरोधाभासविस्मादय: अलङ्कारा:।
* शृङ्खलाबद्धमूलका: अलङ्कारा:-कारणमालामालोपमादय: अलङ्कारा:।
* न्यायमूलका: अलङ्कारा:-काव्यलिङ्गादय: अलङ्कारा:।
* कारणकार्यसम्बन्धका: अलङ्कारा:-अत्र विभावना-विशेषोक्त्यादीनाम् अलङ्काराणां गणना भवति।
* निषेधमूलका: अलङ्कारा:-अत्र व्यतिरेक: अपह्नुति-आदय: अलङ्कारा: सन्ति।
* गूढार्थप्रतीतिमूलका: अलङ्कारा:-अस्मिन् वर्गे समासोक्तिप्रभृतय: अलङ्कारा: समाविष्टा:।

अत्र किञ्चित् अलङ्कारविषयक: प्राथमिक: परिचय: निरूपित:। हर्षवर्द्धनविरचितरत्नावल्यामिति नाटिकायां समाहितानामलङ्काराणां विवेचनं प्रस्तूयते। यद्धर्षवर्द्धनो कवि: अस्ति, स: कालिदासेन प्रभावितो आसीत्। कालिदासस्य प्रियोऽलङ्कार: उपमा आसीत्। अनेन कविनाऽपि सर्वाधिक: प्रयुक्त:।

उपमालङ्कार:-

काव्यप्रकाशे उपमाया: सूक्ष्मविवेचनं प्रस्तुतं तद्यथा-

साधर्म्यमुपमा भेदे पूर्णालुप्ता च साऽग्रिमा।
श्रौत्यार्थी च भवेद्वाक्ये समासे तद्धिते तथा॥
तद्वद्धर्मस्य लोपे स्यात् न श्रौती तद्धिते पुन:।
उपमानानुपादाने वाक्यगाऽथ समासगा॥
वादेर्लोपे समासे सा कर्माधारक्यचि क्यङि।
कर्मकर्त्रीर्णमुलि एतद्विलोपे क्विप्समासगा॥
धर्मोपमानयोर्लोपे वृत्तौ वाक्ये च दृश्यते।
क्यचि वाद्युपमेयासे त्रिलोपे च समासगा॥[7]

अर्थात् उपमानोपमेययो: भेदे सति धर्मस्य (द्वयो: गुणस्य क्रियायाश्च) समानताया: वर्णनमुपमालङ्कारो स्यात्। अलङ्कारोऽयं द्विधा विभज्यते पूर्णा लुप्ता च भेदेन। उपमानस्य उपमेयस्य साधारणधर्मस्य उपमावाचकस्य (इव-यथा-वादीनां) यत्र उपादानं भवति, तत्र पूर्णोपमा भवति। यत्र एतेषाम् (उपमान-उपमेय-साधारणधर्म-उपमावाचका-नाम्) एकस्यापि द्वयोस्त्रयाणां वा लोपे लुप्तोपमा भवति। पूर्णोपमा लुप्तोपमा च पुन: श्रौत्यार्थी च भेदेन द्विधा विभज्यते।

श्रौतीपूर्णोपमा यथा-

श्रौती यथेव-वाशब्दा इवार्थो वा वतिर्यदि।।[8]

यत्र यथा इव वाशब्दः तथा तत्र तस्यैव[9] इत्यनेन सूत्रेण इवार्थे विहितः वतिप्रत्ययः एतेषां प्रयोगो भवति तत्र श्रौतीपूर्णोपमा भवति।

आर्थीपूर्णोपमा यथा–

आर्थी तुल्यसामानाद्यास्तुल्यार्थो यत्र वा वतिः।।[10]

यत्र तुल्यसमानादयः शब्दाः तथा तेन तुल्यं क्रियाचेद्वति[11] इत्यनेन सूत्रेण तुल्यार्थको विहितो वतिप्रत्ययः, एतेषां यत्र प्रयोगो भवति तत्र आर्थीपूर्णोपमा भवति। तथा लुप्तोपमापि पूर्ववत् भवति। यथा– श्रौतीलुप्तोपमा आर्थीलुप्तोपमा च। रत्नावल्यां नाटिकायाम् उपमायाः यत्र प्रयोगः कृतः ते श्लोका उदाह्रियन्ते तत्र कथमुपमेति विवेच्यते–

उपमायाः उदाहरणम्

उदयतटान्तरितमियं प्राची सूचयति दिङ्निशानाथम्।

परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी।।[12]

श्लोकोऽयं रत्नावल्याः प्रथमाङ्कस्य मदनमहोत्सवप्रसङ्गे राजा उदयनस्य वासवदत्तया कृतायाः पूजायाः कालस्य अस्ति। अत्र राजा उदयनः वासवदत्तां प्रति वदति यद्देवि पश्य विरहहेतुना पीतमुखेन हृदयप्रदेशस्थितं पतिं वेदयन्त्याः युवत्याः इव एषा पूर्वदिशा उदयदयाचलप्रदेशस्थितं दिशायाः पतिं चन्द्रं सूचयति इति। अत्र उपमायाः सर्वाण्यपि अङ्गानि विराजन्ते। यथा– यत्र उपमान–उपमेय–समानधर्म–वाचकपदेत्यादीनि चत्वारि अङ्गानि प्राप्यन्ते तत्र पूर्णोपमा भवति। प्रकृतस्थले युवतिः उपमानं वर्तते, पूर्वदिशा उपमेयोऽस्ति पतिरूपधर्मसामान्यधर्मोऽस्ति यः युवत्याः हृदयप्रदेशे तिष्ठति तथा सैव पतिरूपधर्मः पूर्व दिशायाः हृदयरूपे उदयाचले तिष्ठति, चतुर्थम् अङ्गं विद्यते उपमायाः वाचकशब्दः इवादि सोऽपि अत्र अस्ति। अतः स्थलेऽस्मिन् पूर्णोपमा विद्यते।

अपि–

कुसुमसुकुमारमूर्तिर्दधती नियमेन तनुतरं मध्यम्।

आभाति मकरकेतोः पार्श्वस्तथा चापयष्टिरिव ।।[13]

अत्र राज्ञः उदयनस्य विदूषकं प्रति उक्तिरस्ति। राजा उदयनः वासवदत्तां दृष्ट्वा तस्याः स्वरूपस्य अवस्थायाः वर्णनं करोति। सा वासवदत्ता सुमनसामिव सुकुमारमूर्तिः व्रतोपवासादिकारणेन क्षीणमध्यभागवती, कामदेवस्य समीपस्थिता धनुर्लता इव भासते इति अत्रापि उपमायाः सर्वाण्यपि अङ्गानि वर्तन्ते। अतः अत्रापि पूर्णोपमा अलङ्कारः विद्यते।

उत्प्रेक्षालङ्कारः–

उत्प्रेक्षायाः लक्षणं यथा–

भवेत् सम्भावनोत्प्रेक्षा प्रकृतस्य परात्मना[14]

तथा च–

सम्भावनमथोत्प्रेक्षाप्रकृतस्य समेन यत्।[15]

अर्थात् यत्र उपमेयस्य उपमानरूपेण सम्भावना (उत्कटकोटिक–संशयरूपो ज्ञानभेदः, वितर्कः इति भावः) भवेदिति। तत्र उत्प्रेक्षालङ्कारो भवति। तथा च 'मन्ये शङ्के ध्रुवं प्रायो नूनमिवादयः' इव आदयः उत्प्रेक्षावाचकाः शब्दाः भवन्ति। उपमालङ्कारेऽपि इव शब्दः उपमावाचकत्वात् अत्रापि इव शब्दः विवादास्पदं वर्तते। अत उत्तरयति– उपमालङ्कारे सादृश्यं सिद्धो भवति। तथा च उत्प्रेक्षालङ्कारे सादृश्यं सिद्धो न भवति। अपि तु साध्यं भवति। अतः अनयोः (उपमोत्प्रेक्षयोः) एते (सिद्धसाध्ये) भेदकमिति।

उत्प्रेक्षालङ्कारस्य रत्नावल्यामुदाहरणम् –

स्पृष्टस्त्वयैष दयिते स्मरपूजाव्यापृतेन हस्तेन।

उद्भिन्नापरमृदुतरकिसलय इव लक्ष्यतेऽशोकः।।[16]

श्लोकोऽयं रत्नावल्याः प्रथमाङ्कस्य मदनमहोत्सवस्य प्रसङ्गस्य अस्ति। अत्र राजा उदयनः वासवदत्तां (स्वराज्ञीं) प्रति कथयति यत् देवि! भवत्याः मकरकेतुपूजायां हस्तेन स्पृष्टोऽयम् अशोकवृक्षः प्रकटीभूतस्य अन्यमृदुतरनूतनपल्लवस्य इव प्रतीयते। अत्र उत्कटकोटिका सम्भावना कृता वर्तते। अतः अत्र उत्प्रेक्षालङ्कारो विद्यते।

अपि च–

अनङ्गोऽयमनङ्गत्वमद्य निन्दिष्यति ध्रूवम्।

यदनेन न सम्प्राप्तः पाणिस्पर्शोत्सवस्तव।।[17]

अयमपि श्लोकः तत्रैवास्ति। अत्र पुनः राजा उदयनः स्ववासवदत्तायाः सौन्दर्यस्य वर्णनं करोति। यत् कामदेवोऽयम् अवश्यमेव स्वस्य शरीररहितावस्थां दृष्ट्वा धिक् करिष्यति इति। यत् सः (कामदेवः) भवत्याः करस्पर्शस्य आनन्दलाभं न प्राप्तवान्। अत्रापि मकरकेतोः धिक् करणरूपक्रियायाः उत्कटकोटिका सम्भावना कृतास्ति। अत्रोऽत्र उत्प्रेक्षालङ्कारो विद्यते।

रूपकालङ्कारस्य लक्षणं यथा–

तद्रूपकमभेदो य उपमानोपमेययोः।[18]

रूपयति एकतां नयतीति रूपकमिति। यत्र काव्ये यदुपमानुपमेययोः अभेदारोपः तदेव रूपकालङ्कारो भवति। अस्य प्रयोगो रत्नावल्यां रूपकालङ्कारस्योदाहरणम् एवं प्रकारेण विद्यते यथा–

रूपकालङ्कारः–

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः।

कुतोऽन्यथा स्त्रवत्येष स्वेदच्छद्मामृतद्रवः।।[19]

भावार्थः– श्लोकोऽयं रत्नावल्याः द्वितीयाङ्कस्य अस्ति, अत्र राजा उदयनः विदूषकं प्रति रत्नावल्याः (सागरिकायाः) शरीरसौन्दर्यस्य वर्णनं कुर्वन् कथयति यत् हे वयस्य इयं (सागरिका = रत्नावली) लक्ष्मी अस्ति इति सत्यम्। अस्याः हस्तोऽपि पारिजातस्य किसलयोऽस्ति। यदि एतन्नास्ति, तर्हि स्वेदव्याजेन अमृतद्रवः कुतः क्षरति इति। यत्र स्पष्टरूपेण उपमानोपमेययोः उल्लेखो भवति। किन्तु यत्र उपमेयः उपमानरूपेण प्रस्तूयते तत्र रूपको भवति। अतः प्रकृतस्थले उपमेयरूपसागरिकायाः लक्ष्मीरूप-उपमानेन सह अभेदं संस्थाप्य उपमेयः उपमानरूपेण कविना प्रस्तूयते इति। अतोऽत्र रूपकालङ्कारो राजते।

अपि च–

विरम विरम वह्ने मुञ्च धूमानुबन्धं,

प्रकटयसि किमुच्चैरर्चिषां चक्रवालम्।

विरहहुतभुजाऽहं यो न दग्धः प्रियायाः

प्रलयदहनभासा तस्य किं त्वं करोषि।।[20]

श्लोकोऽयं रत्नावल्याः चतुर्थाङ्कस्य ऐन्द्रजालिकस्य मायाप्रस्तुतिप्रकरणकालस्य विद्यते। प्रसङ्गेऽस्मिन् ऐन्द्रजालिकेन स्वमायायाः अग्निप्रज्ज्वलनं क्रियते, तस्मिन् वह्नौ (अस्याः नाटिकायाः नायिका रत्नावली) वह्निना दग्धमानां सागरिकां (रत्नावलीं) दृष्ट्वा राजा उदयनः आत्मानं प्रज्ज्वल्यन्त्यां वह्निज्वालायां समर्पयितुं तत्र (अग्नौ) प्रविश्य अमुं श्लोकं वदति। यत् हे वह्ने झटिति विरतो भव, धूमविस्तारं त्यजतु, उच्चैः उच्चैः अग्निज्वालानां मण्डलं किमर्थं प्रकटयति। अहं (वत्सराजोदयनस्तु) प्रियायाः प्रलयकालीनविरहेणाऽपि न ज्वलितवान् तत् किम् एतादृशेन साधारणवह्निना। अत्रापि रूपकालङ्कारो विलसति।

स्वभावोक्तिरलङ्कारः–

लक्षणं यथा–

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम्।[21]

अर्थात् यत्र बालकादेः स्व–स्वाभाविकक्रियायाः अथवा रूपस्य (वर्णस्य तथा अवयवसंस्थानस्य) यथावद् वर्णनं भवति तत्र स्वभावोक्तिरलङ्कारो भवति।

स्वभावोक्तिरलङ्कारः–

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा–
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः।
पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं,
कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः।।[22]

भावार्थ–श्लोकोऽयं रत्नावलिनाटिकायाः द्वितीयाङ्कस्य वानरागमनप्रसङ्गस्य अस्ति। अत्र सुसङ्गता वानरं दृष्ट्वा वदति। यत् मनुष्यगणनाभावात् लज्जां सन्त्यज्य नपुंसकैः पलायितं वामनोऽयं कञ्चुकिनः चोलकस्य आभ्यन्तरं प्रविशति। तथा अन्तःपुरवासिनः किराताः बहिः गच्छन्ति। तथा ये कुब्जाः सन्ति ते वानरकृतदर्शनभयात् अनुच्चतया शनैः शनैः गच्छन्ति। यत्र मनुष्यादीनां स्वभाविकक्रियायाः वर्णनं क्रियते तत्र स्वभावोक्तिरलङ्कारः भवति। अत्र वानरागमनेन पुरवासिनां क्रियाणां वर्णनेन स्वभावोक्तिरलङ्कारः अस्ति।

अपि–

पुरः पूर्वामेव स्थगयति ततोऽन्यामपि दिशं,
क्रमात्क्रामन्नद्रिद्रुमपुरविभागास्तिरयति ।
उपेतः पीनत्वं तदनु भुवनस्येक्षणफलं,
तमःसंघातोऽयं हरति हरकण्ठद्युतिकरः।।[23]

श्लोकोऽयं रत्नावल्याः तृतीयाङ्के राज्ञः उदयनस्य विदूषकेण सह मकरन्दोद्यानप्रवेशकालस्य प्रसङ्गे आयाति। तत्र राजा उदयनः लतोद्यानं प्रविश्य अन्धकारं दृष्ट्वा मित्रविदूषकं प्रति वदति हे मित्र भवान् सत्यमुक्तवान् यत् हरकण्ठद्युतिहरः अयं तमःसमूहः सर्वादौ पूर्वदिशां व्याप्नोति। तथा अनन्तरं सः पश्चिमादिदिशाः क्रमशः उल्लङ्घ्य पर्वत–वृक्ष–नगरादीनां पृथक्–पृथक् विभाजनं कृत्वा पश्चात् विशालकायं सम्भूय भुवनदर्शनस्य फलं नाशयति इति। अत्रापि अन्धकारस्य स्वभाविकी क्रियायाः वर्णनं क्रियते। अतः अत्रापि स्वभावोक्तिरलङ्कारो विलसति।

अर्थान्तरन्यासालङ्कारः–

लक्षणं यथा–

सामान्यं वा विशेषो वा तदन्येन समर्थ्यते।
यत्तु सोऽर्थान्तरन्यासः साधर्म्येणेतरेण वा।।[24]
'भवेदार्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा'[25]

यत्र सामान्यस्य वा विशेषस्य समर्थनं तदन्येन (अर्थात् सामान्यस्य विशेषद्वारा अथवा विशेषस्य सामान्यद्वारा) यत् समर्थनं भवति, तत्रार्थान्तरन्यासोऽलङ्कारो भवति, अनेन प्रकारेण सामान्यविशेषाभ्यां समर्थनेन अलङ्कारोऽयं द्विविधो भवति। पुनः इदं समर्थनं साधर्म्यवैधर्म्यभेदेन भवति, अतोऽलङ्कारस्यास्य भेदचतुष्टयं भवतीति।

अर्थान्तरन्यासालङ्कारस्योदाहरणम्–

दुर्वारां कुसुमशरव्यथां वहन्त्या
कामिन्या यदभिहितं पुरः सखीनाम्।
तद्भूयः शिशुशुकसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति।।[26]

पद्यमिदं रत्नावलिनाटिकाया: द्वितीयाङ्कस्य राज्ञ: उदयनस्य विदूषकेण सह कदलीगृहप्रवेश काले विदूषकं प्रति उक्तमस्ति। अत्र राजा उदयनो ब्रवीति दुष्परिहारां मकरकेतो: (कामदेवस्य) पीडां समुद्वहन्त्या कामिन्या स्वसखीनां समक्षे यत्किमपि कथितं तत् लघुभि: लघुभि: शुकशिशुभि: सारिकाभिश्च पुन: उच्चरितं भवति। तत् पुण्यवतां जनानामेव श्रोत्रविवरविषयो भवति। यत्र सामान्यपदार्थस्य विशेषपदार्थेन अथवा विशेषपदार्थस्य सामान्यपदार्थेन समर्थनं भवति तत्र अर्थान्तरन्या-सालङ्कारो भवति। प्रकृतस्थले कामदेवस्य दु:सहवेदनीयपीडारूपस्य सामान्यार्थस्य, पुण्यवतां श्रोत्रविवरविषयरूपविशेषपदार्थेन समं कृतमस्ति। अतोऽत्र अर्थान्तरन्यासो विलसति।

अतिशयोक्ति:-

सिद्धत्वेऽध्यवसायस्यातिशयोक्तिर्निगद्यते।[27]

यत्र काव्ये अध्यवसायस्य सिद्धौ सञ्जाते सति अतिशयोक्तिनाम-कोऽलङ्कारो भवति।

अतिशयोक्तिरलङ्कारस्योदाहरणम्-

दृष्टिं रूषा क्षिपसि भामिनि यद्यपीमां
स्निग्धेयमेष्यति तथापि न रुक्षभावम्
त्यक्त्वा त्वरां व्रज पदस्खलितैरयं ते,
खेदं करिष्यति गुरूर्नितरां नितम्ब:।।[28]
दृश: पृथुतरीकृता जितनिजाब्जपत्रत्विष-
श्चतुर्भिरपि साधु साध्विति मुखै: समं व्याहृतम्।
शिरांसि चलितानि विस्मयवशाद् ध्रूवं वेधसा,
विधाय ललनां जगत्त्रयललामभूतामिमाम्।।[29]

पद्यमिदं राज्ञ: उदयनस्य कदलीगृहप्रवेशस्य कालस्य अस्ति, राजा वत्सराजोदयन: कदलीगृहं प्रविश्य सागरिकाया: (रत्नावल्या:) रूपसौन्दर्यं दृष्ट्वा विदूषकं प्रति ब्रवीति भो वयस्य ! रत्नावलिरूपत्रिभुव-नस्य अस्या: अद्वितीयसुन्दर्या: रचनां कृत्वा विधाता अपि विस्मयवशात् अवश्यमेव स्वनिवासभूतपद्मदलकान्त्या: लज्जयन्त्या: स्वचक्षुषो: विस्फारणं कुर्यात। तथा स्वचतुर्भि: मुखै: एकेन साधुवादं ध्रुवमेव कुर्यात्। तथा रत्नावल्या: प्रशंसायां शिरांसि कम्पितानि इति अवश्यमेव स्यात्।

काव्यलिङ्गालङ्कार:-

लक्षणं यथा-

काव्यलिङ्गं हेतोर्वाक्यपदार्थता।[30]

यत्र कवि: प्रस्तुतस्य अर्थस्य उपपादनाय हेतो: (लिङ्गस्य) कथनं करोति। तत्र काव्यलिङ्गालङ्कारो भवति। इदं हेतुकथनं वाक्यार्थरूपेण वा पदार्थरूपेण वा भवति। अर्थात् यत्र कस्यचित् पदार्थस्य हेतुरूपेण विशेषणानि प्रस्तूयन्ते, साभिप्रायविशेषणै: काव्यलिङ्गालङ्कारो भवति। अस्य प्रयोगो रत्नावल्यां नाटिकायां यथा-

काव्यलिङ्ग-अलङ्कार:-

प्रसीदेति ब्रूयामिदमसति कोपे न घटते,
करिष्याम्येवं नो पुनरिति भवेदभ्युपगम:।
न मे दोषोऽस्तीति त्वमिदमपि च ज्ञास्यसि मृषा,
किमेतस्मिन् वक्तुं क्षममिति न वेद्मि प्रियतमे।।[31]

अत्र पद्ये अप्रसन्नरूपकार्यस्य क्रोधरूपकारणस्य सत्वात् काव्यलिङ्गनामकोऽलङ्कारो विद्यते।

तथा च-

विवृद्धिं कम्पस्य प्रथयतितरां साध्वसवशा–

दविस्पष्टां दृष्टिं तिरयतितरां बाष्पपटलैः।

स्खलद्वर्णां वाणीं जडयतितरां गद्गदतया,

जरायाः साहाय्यं मम हि परितोषोऽद्य कुरुते ॥[32]

पद्येऽस्मिन्नपि कम्पनादिरूपकार्यस्य वृद्धत्वरूपकारणस्य कथनात् काव्यलिङ्ग–नामकोऽलङ्कारो राजते।

समासोक्तिः–

समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः।

व्यवहारसमारोपः प्रस्तुतेऽन्यस्य वस्तुनः।।[33]

यस्मिन् काव्ये प्रस्तुताप्रस्तुतयोः समानरूपेणान्वीयमानैः कार्यलिङ्गविशेषणैः प्रस्तुते अप्रस्तुतस्य समारोपो भवति तत्र समासोक्तिरलङ्कारो भवति। तस्योदाहरणं यथा–

यातोऽस्मि पद्मनयने समयो ममैष,

सुप्ता मयैव भवती प्रतिबोधनीया।

प्रत्यायनामयमितीव सरोरुहिण्याः,

सूर्योऽस्तमस्तकनिविष्टकरः करोति ॥[34]

पद्येऽस्मिन् कमलिन्याः नायिकारूपे तथा सूर्यस्य नायकरूपे आरोपः कृतो विद्यते अतोऽत्र समासोक्तिरलङ्कारो विद्यते।

तथा च–

आरुह्य शैलशिखरं त्वद्वदनापहृतकान्तिसर्वस्वः।

प्रतिकर्तुमिवोर्ध्वकरः स्थितः पुरस्तान्निशानाथः ॥[35]

अत्रापि समासोक्ती राजते।

दृष्टान्तालङ्कारः–

दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्।[36]

यत्र काव्ये समानधर्मेण युक्तोपमानोपमेयभावरूपयोः द्वयोः वाक्ययोः बिम्बप्रतिबिम्बभावस्य प्रतिपादनं भवति। तत्र दृष्टान्तालङ्कारो भवति। तस्योदाहरणमधः प्रदीयते। यथा–

तीव्रः स्मरसंतापो न तथादौ बाधते यथासन्ने।

तपति प्रावृषि नितरामभ्यर्णजलागमो दिवसः।।[37]

अत्र उग्रकामसन्ताप–कालीनस्य मनसः पीडितावस्थायाः समागम–कालीनस्य वर्षाकालस्य मनसः दृष्टान्तस्य कथनात् दृष्टान्तनामकोऽलङ्कारोऽस्ति।

प्रतीपालङ्कारः–

प्रसिद्धस्योपमानस्योपमेयत्वप्रकल्पनम्।

निष्फलत्वाभिधानं वा प्रतीपमिति कथ्यते।।[38]

यत्र काव्ये प्रसिद्धस्य उपमानस्य उपमेयरूपेण कल्पना क्रियते, अथवा तं (उपमानम्) व्यर्थं कथ्यते, तत्र प्रतीपालङ्कारो भवति। तस्योदाहरणमधः प्रदीयते।

कि पद्मस्य रुचं न हन्ति नयनानन्दं विधत्ते न किं,

वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।

वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गतो,

दर्पः स्यादमृतेन चेदिह तदप्येवास्ति बिम्बाधरे ॥[39]

अत्र मुखरूपोपमेयस्य कमलरूपोपमानस्य रूपे कथनं विद्यते अतः प्रतीपालङ्कारो राजते।

असङ्गतिरलङ्कारः-

कार्यकारणयोर्भिन्नदेशतायमसङ्गतिः ।[40]

यस्मिन् काव्ये कार्यकारणयोः देशस्य भिन्नतायाः वर्णनं भवति, तत्र असङ्गतिरलङ्कारो भवति। तस्योदाहरणं यथा-

मम कण्ठगताः प्राणाः पाशे कण्ठगते तव।

अतः स्वार्थं प्रयत्नोऽयं त्यज्यतां साहसं प्रिये॥[41]

अत्र कार्यकारणयोः भिन्नदेशतयोर्निबन्धनादसङ्गतिरलङ्कारो वर्तते।

परिकरालङ्कारः-

उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः ।[42]

यत्र उक्तानि वाक्यानि विशेषणाभिप्रायविशेषेण प्रयुक्तानि भवन्ति तत्र परिकरनामकोऽलङ्कारो भवति। तद्यथा-

प्रणमत चरणाविन्द्रस्येन्द्रजालकपिनद्धनाम्नः ।

तथैव शम्बरस्य मायासुप्रतिष्ठितयशसः ॥[43]

अत्र उक्तानि वाक्यानि विशेषणाभिप्रायविशेषेण प्रयुक्तानि सन्ति अतः अत्र परिकरनामकोऽलङ्कारो विद्यते।

विरोधाभासालङ्कारः-

जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः।

क्रिया क्रियाद्रव्याभ्यां यद् द्रव्यं द्रव्येण वा मिथः।।

विरुद्धमिव भासेत विरोधोऽसौ दशाकृतिः।।[44]

जात्यादिना (जातिगुणक्रियाद्रव्यादिना) सह यो परस्परं विरोधो भवति सः चतुर्विधात्मको भवति। यत्र पूर्वोक्तस्य विरोधस्य वर्णनं भवति तत्र विरोधाभासालङ्कारो भवति। यथा-

किं धरण्यां मृगाङ्क आकाशे महीधरो जले ज्वलनः।

मध्याह्ने प्रदोषो दर्श्यतां दह्याज्ञप्तिम् ॥[45]

अत्र पृथिव्यां चन्द्रस्य दर्शनरूपविरोधस्य कथनादत्र विरोधाभासालङ्कारो विद्यते।

उदात्तालङ्कारः-

लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते।

यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्।[46]

यत्र काव्ये लोकोत्तरसम्पत्तेः वर्णनं क्रियते तत्र उदात्तनामकोऽ-लङ्कारो भवति। यथा-कस्यचिद्महापुरुषस्य चरित्रस्य वर्णनं कस्यचिद्वस्तुनः अङ्गं स्यात् तत्रापि उदात्तालङ्कारो भवति। तद्यथा-

आक्षिप्तो जयकुञ्जरेण तुरगान्निर्वर्णयन्वल्लभान्,

सङ्गीतध्वनिना हृतः क्षितिभृतां गोष्ठीषु तिष्ठन्क्षणम्।

सद्यो विस्मृतसिंहलेन्द्रविभवः कक्षाप्रदेशेऽप्यहो,

द्वाःस्थेनैव कुतूहलेन महता ग्राम्यो यथाहं कृतः।।[47]

श्लोकेऽस्मिन् वसुभूतिः राज्ञः उदयनस्य दिव्यनगरीं दृष्ट्वा सर्वं विस्मृतवान् अतोऽत्र लोकोत्तरसम्पत्तेः वर्णनात् उदात्तनामकोऽलङ्कारो विद्यते।

पादटिप्पणी

1. काव्यालङ्कार: 1.36
2. काव्यालङ्कार:- 5.66
3. काव्यालङ्कार:- 2.85
4. काव्यादर्श:- 2.1
5. काव्यप्रकाश:- 8.67
6. रसगङ्गाधर: पृ. सं.-248
7. काव्यप्रकाश:- 10.87.90
8. साहित्यदर्णम् 10.16
9. अष्टाध्यायी 5.1.116
10. साहित्यदर्णम् 10.16
11. अष्टाध्यायी 5.1.115
12. रत्नावली 1.24
13. रत्नावली 1.19
14. साहित्यदर्पण:- 10/40
15. काव्यप्रकाश:- 10/92
16. रत्नावली 1.21
17. रत्नावली 1.22
18. काव्यप्रकाश:- 10.93
19. रत्नावली 2.18
20. रत्नावली 4.16
21. काव्यप्रकाश:-10/111
22. रत्नावली 2.3
23. रत्नावली 3.7
24. काव्यप्रकाश: 10-109
25. चन्द्रालोक:-5/68
26. रत्नावली 2.8
27. साहित्यदर्पण:10.46
28. रत्नावली 2.17
29. रत्नावली 2.16
30. काव्यप्रकाश: 10.114
31. रत्नावली 2.20
32. रत्नावली 4.13
33. साहित्यदर्पण: 10.56
34. रत्नावली 3.6
35. रत्नावली 3.12
36. साहित्यदर्पण: 10.50
37. रत्नावली 3.10
38. साहित्यदर्पण: 10.87
39. रत्नावली 3.13
40. साहित्यदर्पण: 10.69
41. रत्नावली 3.16
42. साहित्यदर्पण: 10.57
43. रत्नावली 4.7
44. साहित्यदर्पण: 10.68
45. रत्नावली 4.8
46. साहित्यदर्पण: 10.94
47. रत्नावली 4.12

****

9. संस्कृतशिक्षणे गृहकार्यस्य स्वरूपम्

डॉ. सत्यदेवः

सहायकाचार्यः, शिक्षाशास्त्रविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः

बलाहरः, काङ्गडा, हिमाचलप्रदेशः -177108

शोधसारः

आधुनिके युगे ज्ञानस्य प्रधानता अस्ति। नूतनं चिन्तनं, नूतनं विचारं, नूतनां सूचनां वा यः कोऽपि ददाति तस्य लोकप्रचारः सूचनाप्रौद्योगिकीद्वारा अनुदिनं भवति एव । अतः न केवलं विशेषज्ञाः, शिक्षाविदः वा अपितु प्रत्येकम् अपि मानवः नूतनं कर्तुं, स्रष्टुम् अन्वेष्टुं च स्पर्धाभावेन प्रवृत्तः अस्ति । अतः ज्ञानयुगं नाम सूचना-प्रधान-युगम् उत स्पर्धात्मक-युगम् उतस्वित् प्राविधिक-युगम् इत्येवं संकल्पनेन अपि अतिशयः नास्ति । एतस्मिन् प्राविधिके युगे शिक्षाक्षेत्रे विधीनां प्रविधीनां च प्रभावस्य साक्षिणः न केवलं विद्यालयेषु, महाविद्यालयेषु, विश्वविद्यालयेषु अधीयानः छात्राः सन्ति अपितु, शिक्षकाः, अभिभावकः समग्रः समाजः च अपि अस्ति। अतः समसामयिकदृशा प्रवर्तमानस्य संस्कृतशिक्षणस्य क्षेत्रविस्तृतिमुद्दिश्य छात्रेभ्यः अभ्यासदृशा उत गृहकार्यदृशा अनेके अवसराः सम्भवन्ति।

भूमिका

शिक्षाक्षेत्रस्य व्यापकतायाः परिचर्चनस्य सीमाङ्कनं कृत्वा विशिष्य संस्कृतक्षेत्रे अपि स्पर्धा, नूतनं सृजनम्, नूतना पद्धतिः, नूतनः विधिः, नवः प्रविधिः च इत्येते अंशाः आगच्छेयुः एतदुद्दिश्य अत्र लेखनम् आवहितम्।

किं नाम संस्कृतशिक्षणम्?

'गृहकार्यम्' इत्यनेन कः अभिप्रायः?

आधुनिककाले संस्कृतशिक्षणे गृहकार्यस्य स्वरूपं लक्षणानि च कानि ?

संस्कृतशिक्षणे गृहकार्यस्य स्वरूपे गुणवत्तानयनाय किं करणीयम् ?

संस्कृतं नाम भाषा । वर्णः, पदम्, वाक्यम्, सन्धिः, समासः, कारकम्, विभक्तिः, प्रत्ययादयः च भाषायाः तत्त्वानि। भाषिकतत्त्वानां शिक्षणं संस्कृतशिक्षणम् इति।[1]

गृहकार्यंनाम अभ्यासः। पठितस्य पाठितस्य वा विषयस्य दृढीकरणोद्देश्येन विषयसम्बद्धं प्रदत्तं कार्यम् गृहकार्यम् इति।[2]

आधुनिककाले संस्कृतशिक्षणे हिमाचलप्रदेशस्य स्कूलशिक्षा-बोर्डद्वारा माध्यमिकस्तरे, उच्चमाध्यमिकस्तरे वरिष्ठमाध्यमिकस्तरे च प्रचलितेषु 'रुचिरा-शेमुषी-शाश्वती-भास्वती' इत्यादिषु संस्कृतपाठ्य-पुस्तकेषु गृहकार्यस्य परिशीलितं स्वरूपं लक्षणं च सारांशरूपेण यदि पश्यामः तर्हि निम्नक्रमेण साक्ष्यम् आयाति-

* स्वीयपाठ्यपुस्तकस्य प्रथमगद्यपाठात् सन्धेः दश उदाहरणानां चयनं कृत्वा सन्धिविच्छेदं कुरुत।
* रिक्तस्थानानि पूरयन्तु।
* द्वयोः श्लोकयोः तुलसीदासस्य चतुष्पद्याः एवं च कान्तकवेः पङ्क्तीः गृहात् कण्ठस्थीकृत्य आनयन्तु।
* द्वयोः श्लोकयोः अन्वयं लिखन्तु।
* अद्य पठितस्य गद्यांशस्य हिन्दीभावार्थं लिखन्तु।
* तृतीयानुच्छेदस्य हिन्द्याम् अर्थं लिखन्तु?
* चरित्रचित्रणं कुर्वन्तु।
* श्यामपट्टे लिखितशब्दानामाधारेण संस्कृते अस्याः कथायाः वर्णनं कुर्वन्तु।

* शब्दाः-रजकः, रासभः, व्याघ्रचर्मणा, प्रतिच्छाद्यम्, यवक्षेत्रेषु, व्याघ्रं मत्वा, क्षेत्रपाला, रासभशब्दम्, लगुडैः, व्यापादितवन्तः।

पदक्रमः

* हिमाचलप्रदेश-स्कूल-शिक्षा-बोर्ड-द्वारा माध्यमिकस्तरे
* (रुचिरा-1, 2, 3),

उच्चमाध्यमिकस्तरे

* (शेमुषी-1, 2),
* (व्याकरणवीथिः-1, 2),
* (अभ्यासवान् भव-1, 2)

वरिष्ठमाध्यमिकस्तरे

* भास्वती-1, 2
* शाश्वती -1

इत्येतेषां संस्तुतानां संस्कृतपाठ्यपुस्तकानां गृहकार्यस्य परिशीलनम् ।

* परिशीलितकार्यस्य अनुशंसनम्।
* अनुशंसितकार्यस्य आधुनिकपरिप्रेक्ष्ये संवर्धनाय सम्प्रत्ययदृशा विमर्शनम्।
* संस्कृतभाषायां संक्षेपेण कस्यचित् अन्यस्य स्वावलम्बिनः जीवनकथां लिखन्तु ।
* उपर्युक्तानुच्छेदस्य सुन्दररीत्या गृहे प्रतिलिपिं कुर्वन्तु अर्थात् सुन्दरं हस्तलेखं पुनः लिखन्तु ।
* हिमालयः, उतरस्यां दिशि, वनस्पतयः, अनेकः, वन्यपशवः, तीर्थस्थानानि,तपोवनानि, औषधयः, विशालः, लभ्यन्ते, सन्ति, निवसन्ति, प्राप्यन्ते च इत्यादीनां शब्दानां साहाय्येन हिमालयस्य विषये संस्कृतेन कानिचन वाक्यानि लिखन्तु ।
* अस्य पाठस्य सारांशं गृहे लिखन्तु, श्लोकान् च कण्ठस्थीकुर्वन्तु।
* निम्नलिखितानां वाक्यानां गृहे संस्कृतानुवादं कुर्वन्तु-
  * विनोद सोता है।
  * सन्तोष यहाँ ठहरता है।
  * मनुष्य क्या ले जाते हैं ?
* कतिपयच्छात्राः क्रमेण पात्रानुसारं पाठस्य वाचिकाभिनयं करिष्यन्ति (आङ्गिकं न)।
* अस्य पाठस्य सारांशं संस्कृतेन लिखन्तु।
* निम्नलिखितगद्यांशस्य हिन्द्यनुवादं कृत्वा आनयन्तु-
  * एकदा .....अभवत्।
* एवमेव 'वसन्तर्तुः' इत्यस्मिन् विषये निबन्धं लिखन्तु।[3]
* भारतीयशास्त्रे महर्षिणा सुश्रुतेन चरकसंहिताया: अष्टमाध्यायस्य एकोत्तरशततमे सूत्रे कार्यस्य परीक्षणं लक्षणं च उद्दिश्यवर्णितं यत् ''कार्यं धातुसाम्यम्'' अर्थात् ''धातूनां साम्यावस्थाया: संरक्षणम् उत उत्पादनम्'' इति चिकित्साया: कार्यं वर्तते।[4] एतदाधारीकृत्य छात्रेभ्यः प्रदत्तगृहकार्येण तेषु उद्विग्नता, भीतिः, उदासीनता, व्यग्रता, सम्भ्रमः, क्लेशः, कुण्ठा च इत्यादीन्यः प्रवृत्तयः यथा न भवेयुः तथा गृहकार्यस्य स्वरूपं भवेत्। एताः प्रवृत्तयः यदि असन्तुलिताः सन्ति तर्हि गृहकार्ये परिष्कारः आनेयः इति गृहकार्यस्य लक्षणं परीक्षणं च अनुकरणीयम्।

संस्कृतशिक्षणे गृहकार्यस्य स्वरूपम्

* संस्कृतशिक्षणे गृहकार्यस्य बहुमुखि स्वरूपम् अस्ति –
* शिक्षाविदां मतेन गृहकार्यस्य विषये सम्मतयः -------

बहुधा परिहासेन श्रूयते यत् ''अरे ! हिन्दी का क्या पढ़ना, हिन्दी को तो राह चलता भी पढ़ लेता है'' इति। वस्तुतः एतत् कटु सत्यम् एव। यतः मार्गे, राजमार्गे, कार्यालयेषु, विद्यालयेषु , महाविद्यालयेषु, विश्वविद्यालयेषु, फलकेषु, आपणपट्टिकासु, वीथिषु प्रायेण सर्वत्र 80 प्रतिशतं अथवा 90 प्रतिशतं विज्ञापनानि हिन्दी भाषया, रोमनलिप्या अन्यासु वा भाषासु लिखितानि भवन्ति। यानि दृष्ट्वा प्रत्येकम् अपि मानवः गमनागमनवेलायाम् अनायासेन पठनस्य अवसरं प्राप्नोति एव। किन्तु अस्माभिः संस्कृतसन्दर्भे यदि समानदृशा विचारः क्रियते चेत् साक्षात् विपरीतं परिलक्ष्यते। प्रायेण 1 प्रतिशतम् अथवा 2 प्रतिशतं संस्कृतस्य अभ्यासाय सार्वजनिकरूपेण अवसरः स्यात्, अत्रापि सन्देहास्पदम्। अतः संस्कृतशिक्षणे प्रत्येकम् अपि संस्कृतशिक्षकेण गभीरतया विचारणीयम्। छात्रेभ्यः बाहुल्येन अवसराः कल्पनीयाः...।

संस्कृतशिक्षणे प्रवर्तमानस्य गृहकार्यस्य स्वरूपे व्यापकताम् आनेतुम्, अग्रोक्तानाम् अंशानां समावेशं कृत्वा संस्कृतशिक्षणे गुणवत्ता आनेतुं शक्यते। ''स्वाध्यायात् मा प्रमदितव्यम्''[5] इति उपनिषद्वाक्यम् अन्वर्थयितुं संस्कृतस्य अध्ययने पुनः पुनः परिशीलनदृशा छात्रेभ्यः अवसरः दातव्यः। अतः दैनिक-गृहकार्यरूपेण-

निर्देशः-'पठितेषु पाठेषु एतेषां (सम्बद्धानाम्) विषयाणां चयनं कुर्वन्तु' इति सूचयित्वा छात्रेभ्यः अवसरः कल्पनीयः-

* क्रियापदानाम्
* कर्तृ-कर्म-भाववाच्यपदानाम्
* प्रथमाद्वितीयादीनां विभक्तिपदानाम्
* विशेष्यपदानाम्
* विशेषणपदानाम्
* संज्ञापदानाम्
* सर्वनामपदानाम्
* ल्यबन्तपदानाम्
* क्त्वान्तपदानाम्
* क्त-क्तवत्वान्तपदानाम्
* चित्-चनप्रत्ययान्तपदानाम्
* शत्रन्तपदानाम्
* पर्यायपदानाम्
* नकारात्मकपदानाम् / वाक्यानाम्
* पुंलिङ्ग-स्त्री-नपुंसकलिङ्गपदानाम्
* चित्रसम्बद्धवाक्यानाम्

* सामाजिकपदानाम्
* आध्यात्मिकपदानाम्
* नैतिकपदानाम् / सूक्तिपदानाम्
* वर्गशः प्राणीनाम्
* लकारशः पदानाम्
* प्रथम-मध्यम-उत्तम-पुरुषपदानाम्
* वचनशः प्रथम-मध्यम-उत्तम-पुरुषपदानाम्
* अका.,आका.,इकारान्तादीनां पदानाम्
* सम्बोधनात्मकपदानाम् / वाक्यानाम्
* पाठे प्रत्येकम् अनुच्छेदशीर्षकाणाम्
* पाठे प्रत्येकं पद्यानां शीर्षकाणाम्
* अभिनयात्मकपदानाम्
* स्थानवाचकपदानाम्
* पाठपाठनाय सहायकसामग्रीणाम्
* विरामचिह्नयुक्तपदानाम् / वाक्यानाम्
* परस्मै-आत्मने-उभयपदक्रियापदानाम्
* सन्धिपदानाम्
* समासपदानाम्
* तुमुनान्तपदानाम्
* विभिन्नप्रत्ययानाम्
* संख्यासूचकपदानाम्
* समयसूचकपदानाम्
* सकर्मक-अकर्मकपदानाम्
* उपसर्गपदानाम्
* ऐतिहासिकपदानाम्
* रोगवाचकपदानाम्
* शाकवाचकपदानाम्
* वाहनवाचकपदानाम्
* कृषिवाचकपदानाम्
* विज्ञानवाचकपदानाम्
* ग्रन्थवाचकपदानाम्
* अनुवर्तिपदानाम्
* प्रश्नवाचकपदानाम् / वाक्यानाम्
* ऐतिहासिकस्थानसूचकपदानाम्
* सम्बन्धवाचकपदानाम्.....इत्यादीनाम्
* एतस्मिन् एव क्रमे पञ्च-दश-पञ्चदशानां च दिनानां मासस्य वा अवकाशकाले गृहकार्यस्य स्वरूपभेदः एवम्प्रकारेण भवितुम् अर्हति-

निर्देशः-'पाठ्यपुस्तकात् एतेषां विषयाणां चयनं कृत्वा आनयन्तु' इति सूचयित्वा छात्रेभ्यः अवसरः कल्पनीयः-

* ऐतिहासिकम्
* गद्यपाठानाम्
* पद्यपाठानाम्
* कथापाठानाम्
* नाटकपाठानाम्
* प्रहेलिकापाठानाम्
* नैतिकपाठानाम् / सूक्तिपाठानाम्
* सुभाषितपाठानाम्
* संवादपाठानाम्
* उद्धरणपदानाम्
* ऐतिहासिकपाठानाम् / पुस्तकानाम्
* वन्दनापाठानाम्
* आध्यात्मिकपाठानाम्
* सामाजिकपाठानाम्
* रूपकपाठानाम्
* अभ्यासप्रकाराणाम्
* अभ्यासानाम्
* चित्रसंख्यानाम्
* कार्यालयीयपदानाम्
* रिक्तस्थानपदानाम्.....इत्यादीनाम्

अत्र उक्तस्य प्रत्येकम् अपि बिन्दोः सम्पादनाय पाठस्य पुनः पुनः पठनस्य, संस्कृतपाठ्यपुस्तकस्य पुनः पुनः परिशीलनस्य आवश्यकता अनिवार्येण अस्ति। छात्रः पुस्तकं पठितुं, विषयान् अन्वेष्टुं, ग्रन्थान् परिशीलयितुं, पत्रपत्रिकाः अध्येतुं, चित्रोपयोगितां ज्ञातुं, नाटक-संवाद-कथानां महत्त्वम् अवगन्तुं, साहायकसामग्री-प्रभृतांशानाम् उपयोगिताम् अवगन्तुं समर्थः भवेत् इति धिया संस्कृतशिक्षणे गुणवत्तासम्पादनाय प्रवर्तितम् एतत्, इति।

परिशीलितानि पुस्तकानि

1. रुचिरा प्रथमः भागः, एन.सी.ई.आर.टी. प्रकाशन 2019
2. रुचिरा द्वितीयो भागः, एन.सी.ई.आर.टी. प्रकाशन 2019
3. रुचिरा तृतीयो भागः, एन.सी.ई.आर.टी. प्रकाशन 2019
4. शेमुषी प्रथमः भागः, एन.सी.ई.आर.टी. प्रकाशन 2020
5. शेमुषी द्वितीयो भागः, एन.सी.ई.आर.टी. प्रकाशन 2020
6. व्याकरणवीथिः, (नवमदशमकक्ष्ययोः)एन.सी.ई.आर.टी. प्रकाशन 2019
7. अभ्यासवान् भव, (नवमदशमकक्ष्ययोः) एन.सी.ई.आर.टी. प्रकाशन 2019
8. भास्वती प्रथमः भागः, एन.सी.ई.आर.टी. प्रकाशन 2019
9. शाश्वती प्रथमः भागः, एन.सी.ई.आर.टी. प्रकाशन 2019
10. भास्वती द्वितीयः भागः, एन.सी.ई.आर.टी. प्रकाशन 2019
11. मिश्र प. हरे कान्त बृहद्धातुकुसुमाकरः चौखम्बा संस्कृत प्रतिष्ठान दिल्ली पुनमुद्रित संस्करण–2007.
12. त्रिपाठी ब्रह्मानन्द, रूपचन्द्रिका, चौखम्बा सुरभारती प्रकाशन संस्करण– 2012.
13. आचार्य कपिलदेव द्विवेदी, प्रौढरचनानुवाद कौमुदी विश्वविद्यालय,प्रकाशन 18 वाँ संस्करण–2009.
14. अग्निवेश, चरकसंहिता, चौखम्बा सुरभारती प्रकाशन
15. पाण्डेय रामशक्ल, शिक्षा के दार्शनिक आधार, विनोद पुस्तक भण्डार आगरा, नवीनतम संस्करण–1998.
16. पाठक पी.डी., शिक्षा मनोविज्ञान, विनोद पुस्तक मन्दिर आगरा,नवीनतम संस्करण– 2009.
17. पाठक एण्ड त्यागी, सफल शिक्षण कला, विनोद पुस्तक भण्डार आगरा, नवीनतम संस्करण–1994.
18. पाण्डेय, के.पी. नवीन शिक्षा मनोविज्ञान , विश्वविद्यालय, प्रकाशन, वाराणसी, चतुर्थ संस्करण–2013.
19. भाषा विकास, हिमाचल प्रदेश, अरिहन्त पब्लिकेशन्स मेरठ, मुद्रण–2015.

पादटिप्पणी

1. सफल शिक्षण कला
2. सफल शिक्षण कला
3. रुचिरा–शेमुषी–शाश्वती–भास्वती
4. चरक संहिता
5. तैत्तिरीयोपनिषद्

****

10. भार्गवराघवीये महाकविरामभद्राचार्यस्य स्वाभिनवभाष्यनैपुण्यम्

डॉ. लक्ष्मीकान्त षडङ्गी
संस्कृतविभागाध्यक्षः,
योगदा-सत्सङ्ग-पालपाडा-महाविद्यालयः, पश्चिमवङ्गः

उपक्रमः –

सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।

स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।[1]

इत्युक्त्यनुसारं सूत्रानुसारिभिः वाक्यैः सूत्रार्थः यत्र वर्ण्यते यथा सन्दर्भं स्वपदानि च यत्र वर्ण्यते तं ग्रन्थं विद्वज्जनाः भाष्यं नाम्ना व्यपदिशन्ति। 'भाष् प्रवचने इति धातोः 'ण्यत्' इति प्रत्यये 'भाष्यम्' इति पदस्योत्पत्तिर्जायते। भारतीयसाहित्येतिहासे यद्यपि सर्वशास्त्रोपकारकः यथावदर्थबोधकश्च स हि महाभाष्यनाम्ना तत्र भवता भगवता पतञ्जलिना ग्रथितः यद्यप्ययं ग्रन्थः अष्टाध्यायाः शब्दानुशासनत्वेन परिपूर्णतासंपादकः अद्य विश्वस्मिन् विश्वे महतीं प्रतिष्ठां धत्ते, तथापि भाष्यपरम्परेयं तु सर्वेषु शास्त्रेषु महदुपकारकत्वेन प्राचीनकालादेव प्रचलिताऽस्ति । यतो हि संस्कृतवाङ्मये बहूनि महाकाव्यानि दृश्यन्ते । तत्रापि काव्येषु काव्यान्तरेषु आकरग्रन्थेषु वा काठिन्यं संलक्ष्यन्ते, यदि टीकाकाराः भाष्यकाराः वा सागरमन्थनमिव काव्यसागरस्यानेकधा अनुध्यानं कुर्वन्ति, तर्हि प्रत्येकवारं नवं नवमुत्पादनमाविष्कुर्वन्ति । यथा स एव वृक्षः मधुमासे संप्राप्ते सर्वथैव नवत्वमायाति तथा स एवार्थो नूतनतया विलसति भङ्ग्यन्तरसमाश्रयेण। ध्वनिकारेण यथार्थेणोक्तम्–

दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् ।

सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ।।[2]

टीकाकारेणाभिनवगुप्तपादेनापि अस्यानुरूपमुक्तम् – 'सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते।[3]

कविपरिचयः–

इदानीमेव सङ्कलय्य प्रकाशिते स्वोपज्ञे विंशशताब्दीसंस्कृत-ग्रन्थसूचीपत्रे (Catalogue of the 20th Century Sanskrit Creative Works) मया संस्कृतमहाकाव्यानां 1901तः 2000 तमावधि प्रणीतानां काऽपि बृहती विस्मयकारिणी च सूची सम्प्रस्तुता सहृदयानां परितोषाय। तत्र विंशशताब्द्याश्चरममहाकाव्य-कृतिर्वर्तते महाकविश्रीरामभद्राचार्यप्रणीता श्रीभार्गवराघवीयाभिधाना। बाल्यादन्धोऽपि कविरयं स्वीयनैसर्गिकाद्भूतप्रतिभया सर्वमेव शास्त्रजातं श्रावं श्रावं कण्ठस्थं कृत्वा सर्वत्र लोकसमक्षं शास्त्ररहस्यव्याख्याने तत्परो दृश्यते । महाकविः वैयाकरणश्चासौ श्रीरामभद्राचार्यः स्वाभिनवकौशलेन प्रस्थानत्रयी-श्रीरामचरितमानसाष्टाध्यायी-श्रीभार्गवराघवीयादीनां नैकेषां ग्रन्थानां प्रणेता प्राबन्धिकश्चासीत् । तद्रचितभाष्येषु श्रीभार्गवराघवीयमहाकाव्यस्य कृपाभाष्यम् अन्यत्तमम्। एकविंशसर्गात्मकस्यास्य महाकाव्यस्य भाष्यमिदं महाकविरामभद्राचार्यस्य स्वाभिनवभाष्यनैपुण्यं महत् प्रकाशयतीति तदीयग्रन्थान्वेषणेन ज्ञायते। अत्रैव महाकविः रामभद्राचार्यः स्ववैशिष्ट्यं बहुधा प्रतिपादयितुं कामः नैकेषु स्थानेषु स्वाभिनवकाव्यकौशलं व्यवहरति । एतस्य महाकाव्यस्य भावः कदाचित् अन्यथा केनचित् व्याख्यायेत इति धिया महाकविः स्वयमेव एतस्य कृपा हिन्दी टीकामपि स्वयं कृतवान् । एतदर्थमुच्यते महाकविना –

स्वनिर्मिते भार्गवराघवीये सामान्यलोकस्य सुखावबुद्ध्यै।

व्याख्यां कृपायां कविरामभद्राचार्यस्तु हिन्द्यां कुतुकात्तनोति।।[4]

काव्ये कवेः स्वाभिनवभाष्यनैपुण्यम् –

महाकविरामभद्रचार्यस्य स्वाभिनवकाव्यकौशलेषु ज्योतिष-शास्त्रीयसंख्यागणनारीतिः, एकाक्षरीश्लोकचरनारीतिः, चतुरर्थकश्लोक-प्रयोगनैपुण्यं स्वाभाविकश्लोकरचनारीतिश्च प्रमुखाः भवन्ति । महाकवेः स्वरचिते कृपाभाष्येऽस्मिन् स्वाभिनवकाव्यकौशलस्य निदर्शनं नैपुण्यञ्च उदाहरणमुखेन दिङ्मात्रमत्र प्रस्तूयते ।

कवेः स्वरूपं भट्टनौतेन प्रतिपादयनाह –

प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता ।

तदनुप्राणनो जीवेद् वर्णनानिपुणः कविः ।।[5]

अर्थात् नवनवोन्मेषशालिन्या प्रतिभया अनुप्राणितः सजीववर्णनायां यो हि निपुणः स एव कविः। लोचनकारस्य मते अपूर्ववस्तुनिर्माणकुशल एव जनः कविः । निरुक्ते मेधाविनामसु पठितः कविशब्दः क्रान्तदर्शी भवति । न तु हठादाकृष्टानां कतिपयपदानां रचयिता कविः । अस्मादुच्यते प्रचलितवृत्तस्य संस्कृतभाषया परिणमनमात्रमेव न भवति महाकाव्यम्। महाकाव्यं भवति ध्वनिवक्रोक्तिवैशिष्ट्यमण्डितं नूतनाभिप्रायप्रचुर-पदगुम्फसंवलितं रसच्छन्दोऽलङ्काररीतिवृत्त्यादिप्रयोगरुचिरं किमपि विलक्षणमेव सारस्वतं कविकर्म । इत्येवं वचनं मनसि निधाय प्रस्तुतोऽयं महकविः स्वकीयं काव्यमपि कालिदास-भारवि-माघादिनामिव विलक्षणरीत्या वर्णयितुं कामः विविधेषु स्थलेषु स्वाभिनवकाव्यकौशलं प्रतिपादयति।

सर्गसंख्याप्रतिपादनरीतिः –

तस्याभिनवकाव्यकौशलेषु अन्यत्तमोऽस्ति सर्गसंख्याप्रति-पादनरीतिः। यतो हि सर्गाणामन्तिमे श्लोके सर्गसंख्याप्रतिपादने महाकविः 'पञ्चमः. 'एकादशः' 'द्वादशः' चेत्यादिषु स्थलेषु साक्षादङ्कान् न प्रयुज्य क्रमानुसारं बाणः शिवः अर्कश्चेतिपदान् व्यवहरति । तद्यथा पञ्चमसर्गस्यान्तिमे श्लोके –

इत्थं शुभे भार्गवराघवीये भव्ये महाकव्य उदारवृत्ते ।

बाणोऽस्तु सर्गः कवि रामभद्राचार्यप्रणीते जगतां श्रियै नः।।[6]

श्लोकेऽस्मिन् पञ्चमसर्गस्यान्तिमं प्रकाशयितुं कामः महकविः 'बाण' इति शब्दं तृतीये पादे व्यवहरति । अस्मात् बाण इति शब्देन पञ्चबाणस्य प्रसिद्धित्वात् पञ्चमसर्गान्तस्य संसूचनं जातम् । एवमेकादशसर्गस्यान्तिमे श्लोकेऽपि एकादश इति पदमवबोधयितुं महाकविना 'शिव' इति शब्दस्य व्यवहारं कृतम् । अनेन शिव इति पदेन एकादशरुद्रस्य प्रसिद्धित्वात् एकादशसर्गस्यावबोधः जायते । एवमपि द्वादशसर्गस्यान्तिमे पद्ये 'अर्क' इति पदस्य व्यवहारेण द्वादशादित्यस्य प्रसिद्धित्वात् द्वादशसर्गस्यावबोधः 'सर्गाऽर्कसंज्ञः' इत्यंशात् ज्ञायते । न केवलमेतत् अपितु महाकाव्यस्यास्य त्रयोदशसर्गादारभ्य एकविंशसर्गं यावत् महाकविरसौ सर्गसंख्याप्रतिपादने विलक्षणरीत्या ज्योतिषीं गणितविद्यामाश्रयति । तेष्वेकस्योदाहरणं यथैव एकविंशसर्गस्यान्तिमे श्लोके –

इत्थं शुभे भार्गवराघवीये भव्ये महाकव्य उदारवृत्ते ।

ब्रह्माक्षिसर्गः कवि रामभद्राचार्यप्रणीतेऽस्तु सतां श्रियै नः।।[7]

श्लोकेऽस्मिन् महाकविः एकविंशसर्गान्तं संसूचयितुं कामः तृतीये पादे 'ब्रह्माक्षिसर्गः' इति पदं प्रतिपादयति । अस्मात् 'ब्रह्माक्षिसर्गः' इत्यंशात् 'ब्रह्म' इति पदेन ब्रह्मणः ऐक्यत्वं प्रसिद्धित्वात् एक (1) इति संख्यायाः पुनश्चाक्षि इति पदेन अक्षिद्वयस्य प्रसिद्धत्वात् द्विः (2) इति संख्यायाः बोधः भवति । एवमेतस्य संख्याद्वयस्य एकत्रीकरणेन यद्यपि द्वादश इति संख्यामवबुध्यते, परन्तु 'अङ्कानां वामतो गतिः' इति ज्योतिषशास्त्रस्य गाणितिकधारानुसारेण द्वादश इति संख्यायाः वामतः परिगणनेन एकविंशति इति संख्यायाः बोधः जायते । अस्मात् 'ब्रह्माक्षिसर्गः' इत्यस्मादंशात् एकविंशसर्गस्य बोधः जायते न तु द्वादशसर्गस्य इति । एवमनुरूपभावेन त्रयोदशसर्गस्यान्तिमे श्लोके 'लोकेशसर्गः' इत्यंशात् लोकपदेन त्रिलोकस्यार्थात् त्रयस्य ईशपदेन परमेश्वरस्यार्थात् एकस्य च एवं संख्याद्वयस्यास्य सम्मिश्रणेन यद्यपि एकत्रिंशत् इति संख्या आगच्छति तथापि महाकवेः ज्योतिषशास्त्रीयगणित-विद्यारीत्यनुसरणेन त्रयोदश इति सर्गस्यावबोधः जायते । चतुर्दशसर्गेऽपि श्रुतीशः इति पदेन श्रुति इत्यनेन चतुः ईश इत्यनेन एकस्य च सम्मिश्रणेन एकचत्वारिंशत् इति जायते, परन्तु उपर्युक्तरीत्या समीक्षणेन चतुर्दशसर्गस्यावबोधः भवति । एवं पञ्चदशसर्गस्यान्तिमे 'बाणैकसर्गः' इत्यनेन एकपञ्चाशत् इति स्थले पञ्चदशस्य ज्ञानं जायते । षोडशे सर्गेऽपि 'सर्गः कलाख्यः' इत्यंशात् (षोडशकलायाः) प्रसिद्धित्वात् षोडशसर्गस्यावबोध जायते । एवं क्रमेण सप्तदशसर्गस्यान्तिमे श्लोके दशसप्तमोऽयम् इत्यस्य अष्टादशसर्गस्यान्तिमे 'सर्गाऽष्टकेशः' इत्यस्य ऊनविंशतिसर्गे अस्तूनविंशः इत्यस्य विंशसर्गे विंश इत्यस्य च व्यवहारः कृतः महाकविना ।

एकाक्षरीश्लोकप्रयोगरीतिः–

महाकविरामभद्रचार्यस्य कृपाटीकायाम् एकाक्षरीश्लोकप्रयोगरीतेः वैलक्षण्यं प्रदर्शितम् । संस्कृतसाहित्ये इतः पूर्वं किरातार्जुनीये भारविना एक एव एकाक्षरी श्लोकः प्रयुक्तः, तत्रापि भारविः असफलः एवाभूत्। यतो हि तत्र एकाक्षरीश्लोकान्ते तकारस्य प्रयोगोऽभूत् । तद्यथा –

ननो न नुन्नो नुन्नो नो नाना नाना ना ना ननु ।

नुन्नेऽनुन्नो ननुन्नेनो नानेना नन्ननुन्नत् ।।[8]

परन्तु भार्गवराघवीये त्रयः श्लोकाः प्रसङ्गसापेक्षाः रसपोषिताश्च प्रयुक्ताः । तेषु आद्यस्योदाहरणं यथा –

कः कौ के केककेकाकः काककाकाकक: ककः ।

काकः काकः ककः काकः कुकाकः काकक: कुकः ।।[9]

अस्यैव श्लोकस्यान्वयः यथा – केककेकाकः काककाकाकक: ककः काकः काकः ककः काकः कुकाकः काकक: कुकः कः कौ के । इत्यन्वयः ।

श्लोकार्थः – के ब्रह्मणि ब्रह्माण्डे वा कं सुखं यस्मात्स केकः संज्ञात्वात्सप्तम्या अलुक्स एव केकः ब्रह्माण्डसुखदाता केकाकः केका मयूरवाणी तस्यां कं सुखं यस्य स केकाकः ब्रह्माण्डसुखदातापि मयूरवाण्यां सुखमनुभवतीति भावः । स एव भगवान् रामो बाल्यकाले काककाकाकक: काकस्य भुशुण्डिनः काका वाणी तस्या यत्कं सुखं तदेव कम् आनन्दो यस्य स काककाकाकक: भुशुण्डिनो वाणीसुखमेवानन्दं मन्यत इति भावः । स एव कक: केषु लोकेषु कं सुखं यस्मात्तादृशः 'जो आनन्द सिन्धु सुखरासी' (श्रीरामचरितमानसे 1.197.5) इत्यादिषु स्पष्टम् । स च काकः कं सुखम् अकं दुःखं वनवासात्मकं यस्य स काकः अर्थाद्वनवासदुःखमपि सुखं मन्यते । एवंविधः काकः काकः प्रशस्तः काकभुशुण्डिरस्त्यस्य स काकः प्रशस्तकाकवानिति भावः । कक: कः ब्रह्मा तस्यापि कं सुखं यस्मात्स च काकः कायति भक्तानाह्वयति स काकः काकपक्षधरो वा भगवान् रामः । कुः पृथ्वी तस्यां कं सुखं जन्मभूमितया यस्याः सा कुका सीता तस्यां कम् आनन्दो यस्य स कुकाकः सीतारामो भगवान् । काकक: काकं भुशुण्डिनं कायति । कुकः कुः भोगं कं मोक्षसुखं यस्मात् एवंविधः कः परब्रह्म परमात्मा भगवान् श्रीरामः कौ पृथिव्यां के साकेतलोकेऽयोध्यायां विराजते । इति श्लोकार्थः ।

द्वितीयस्योदाहरणं यथा –

काककाक ककाकाक कुकाकाक ककाक क ।

कुककाकाक काकाक कौकाकाक कुकाकक ।।[10]

अस्यैव श्लोकस्यान्वयः यथा – काककाक कक आक आक कुकाक आक कक क आक कुकक आक आक काक आक कौक आक कुकाकक आक । इत्यन्वयः।

श्लोकार्थः – काकः जयन्तस्तस्य के शिरसि अकं दुःखं दण्डदानेन यस्मात्स काककाकः जयन्तदण्डदाता तत्सम्बुद्धौ के काककाक जयन्तनिग्रहकारिन् प्रभो । कक आक आक इति पदच्छेदः । केषु जीवेषु कम् आनन्दो यस्मात्स कक: तत्सम्बुद्धौ हे कक जीवनानन्ददायिन् । आक आक आगच्छ आगच्छ । कुकाकाक कुकाकः सीतासुखदाता (पश्यन्तु 20–91) तत्सम्बुद्धौ हे कुकाक । आक आगच्छ । कक ब्रह्माण्डसुखहेतो (पश्यन्तु 20–92) । क परमात्मन् । आक आगच्छ । कौ पृथिव्यां भोगे कम् आनन्दो येषां ते कुकाः तान्

कायति अभिमुखीकरोति इति कुकक: तत्सम्बुद्धौ हे कुकक । आक आक आगच्छ आगच्छ । काद्याछाक कः ब्रह्मा अः विष्णुस्तयोः कम् आनन्दो यस्मात्स काकः तत्सम्बुद्धौ काक । आक आगच्छ । कौकाकाक कौ पृथिव्यां कम् आनन्दः यस्मात्स कौकः तत्सम्बुद्धौ के कौक । आक आगच्छ । कुत्सितं काकं जयन्तं परित्राणाय कायति अथवा कुकाकेन जयन्तेन कीयते सम्बोध्यते रक्ष रक्षेति सः कुकाकक: तत्सम्बुद्धौ हे कुकाकक । आक आगच्छ । इति श्लोकार्थः । विशेषः – आङ्उपसर्गपूर्वस्य गमनार्थकस्य 'अक'धातोर्लोटि लकारे मध्यमपुरुष एकवचन 'आक' इति रूपम् ।

तृतीयस्योदाहरणं यथा –

लोलालालीललालोल लीलालालाललालल ।

लेलेलेल ललालील लाल लौलील लालल ।।[11]

अस्यैव श्लोकस्यान्वयः यथा – लोलालालीललालोल लीलालालाललालल लेलेलेल ललालील लाल लोलील लालल इत्यन्वयः । श्लोकार्थः – लोलाश्चञ्चलाः अलाः अलकाः तेषाम् आलिः समूहः तैः लः विलसितः स च अलोलः अचञ्चलः इति लोलालालीललालोलः

तत्सम्बुद्धौ लोलालालीललालोल । अलाम् अक्षणाणां समूहः आलं तं लाति वक्ति इति आललं मुखं लीलायां शिशुकेलौ लालया तृष्णाजलेन ललं क्रीडावत् आललं मुखं यस्य सः लीलालालाललालः तत्सम्बुद्धौ लीलालालाललालल । पुनः लेला शिशुक्रीडा धनुर्भङ्गरूप तथा इलायाः पृथिव्याः ई लक्ष्मीं सीतारूपां लाति स्वीकरोति स लेलेलेलः सीतापतिः तत्सम्बुद्धौ लेलेलेल । स एव ललानां विलासिनाम् अलीं लुनाति इति ललालीलः तत्सम्बुद्धौ हे ललालील । हे लाल राघव । लोलीं जीवचञ्चलतां लुनाति नाशयति लोलीलः तत्सम्बुद्धौ हे लोलील । लालल अतिशयेन विलस इति श्लोकार्थः ।

अत्र भगवता परशुरामेण त्रिभिः एकाक्षरीश्लोकैः भगवन्तं श्रीरामं स्तौति । अत्र श्रीभार्गवराघवीयस्य रचयितुः श्रीरामभद्राचार्यस्य भगवन्निष्ठा शास्त्रगतपाण्डित्यं काव्यकलायाः लोकोत्तरचातुर्यं च परिलक्ष्यते । महाकविः कालिदासः श्रीहर्षः तथा च माघस्तु एतदर्थं प्रयतितवन्तः एवं नहि । अत्र अतिकठिनाम् एकाक्षरी श्लोकरचनां संविधाय महाकविः भार्गवराघवीयं काव्येषु शिखरारूढं करोति । अतः यथार्थेण केनचित् समीक्षकेन उच्यते –

नैषधे च किराते च माघे काव्यगुणाः यथा ।

ततोऽधिकास्तु विद्यन्ते काव्ये भार्गवराघवे ।।[12]

चतुरर्थकपद्यरचनारीतिः–

संस्कृतवाङ्मये इतः पूर्वं महाकविश्रीहर्षः द्वयर्थकपद्यरचनां त्यर्थकपद्यरचनां विधाय काव्यरचनापरम्परायाम् एकं नवीनं मानकं स्थापितवान् । परन्तु महाकविरामभद्राचार्यः चतुरर्थकां रचनाधर्मितां पद्यं प्रयुज्य स्वकीयाम् अप्रतिमां प्रतिभां प्रादर्शयत् । तद्यथा–

ललाममाधुर्यसुधाभिरामकं ललाममाधुर्यसुधाभिरामकम्।

ललाममाधुर्यसुधाभिरामकं ललाममाधुर्यसुधाभिरामकम्।।[13]

उपर्युक्तश्लोके एकस्या एव पंक्तेः चतुर्वारम् आवृत्तिः कृता किन्तु तासाम् अर्थः पृथक् । श्लोकस्यास्य प्रथमपंक्तेः अयमेवाशयः यत् यः त्रिपुण्ड्रमाधुर्या युक्तः तथा यस्य अभीष्टदेवः श्रीरामः आसीत् । द्वितीयपंक्तेः तु अयमेवाशयः यत् यः बालचन्द्ररूपाभूषणस्य शोभां धारयति तथा अस्योत्सवे रमणीयः आसीत् । एवं तृतीयपंक्तेः आशयस्तु यः खलु प्रधानतायाः शक्त्या धर्मविचक्षणस्य रमणीयतां सुरक्षितुं यतते । एवं चतुर्थपंक्तेः आशयस्तावत् यः धर्मस्वरूपस्य वृषध्वजस्य सौन्दर्येण मधुरतायाः तेजसा श्रीरामचन्द्रस्य शरणागत्या च संयुक्तः आसीत् इति । अनेन न केवलं कविः आत्मनः प्रातिभकौशलं प्रकटयति अपितु स्वाभिनवकाव्यकौशलेन बृहत्त्रयीकारान्नपि अतिक्रामति ।

स्वाभिनवश्लोकरचनारीतिः–

भार्गवराघवीये महाकवे अभिनवकौशलस्यापरा या एका विशेषता वर्त्तते स्वाभाविकश्लोकरचना–सम्बन्धिनी, यद्यथा –

त्रिजगदवन हतहरिजननिधुवन निजवनरुचिजितशतशतविधुवन।
तरुवरविभवविनतसुरवरवन जयति विरतिघन इव रघुवरवन।।
मदनमथनसुखसदन विधुवदन गदितविमलवरविरुद कलिकदन।
शमदमनियममहित मुनिजनधन लससि विबुधमणिरिव हरिपरिजन।।
जनकदुहितरमहिपमपि सुखयसि सुखमुखमपि शुचिसुमु सुमुखयसि।
विबुधविपिनमपि हरिसख सखयसि यतिजनमखमपि सुमख सुमखयसि।।
मनसिजजवमपि सुजव विफलयसि खलकुलरवमपि सुरव विकलयसि।
कलिमलबलमपि सबलमबलयसि गुणिगणकुलमपि कुशल कुशलयसि।।
विटपनिविडनिगडितमनसिजजव शिखरिशकलशकलित–भवपरिभव।
मुनिजनभजन महितखगकलरव रघुवरवन मयि सकरुण इह भव।।
रघुपतिगृहिणीनयनसुखनवदल हरिपदजलजरसितसितज–लकल।

सुरनरमुनिगणगुणित सुजनबल विफलय मम भवरुजमपि फलफल।।

सुकृतसुभगसुरवतरुफल जय फणिपतिरघुपतिचरणविमल जय।

कलिमलखलकुलकदनकुशल जय गिरिधर सुखवन नयन-सुफल जय ।।[14]

उपर्युक्तश्लोकानामपरमेकं महत्त्वपूर्णं वैशिष्ट्यमस्ति ह्रस्वमात्रिकम्। महाकविभारवि-माघ-श्रीहर्ष-कालिदासादयः विख्याताः महाकवयः ह्रस्वमात्रिकश्लोकानां प्रयोगं काव्येषु नैव कुर्वन्ति । परन्तु महाकविरसौ प्रस्तुतमहाकाव्यस्य सप्तमसर्गस्य एकादशश्लोकादारभ्य सप्तदशं श्लोकं यावत् ह्रस्वमात्रिकच्छन्दसः सुव्यवहारं करोति[15]। एवं श्रीभार्गवराघवीयस्याद्यन्तामवलोकनेन प्रतीयते यत् स्वामीरामभद्राचार्यः अन्येभ्यः कविवरेभ्योऽप्यधिकं काव्यशास्त्रीयव्याकरणस्त्रीयमानदण्डं सुरक्षितुं कृतसंकल्पः ।

स्वाभिनवव्याख्याननैपुण्यम्-

न केवलमसौ महाकविः देशभक्तोऽपि, साम्प्रातिकसमाजे भारतवर्षस्य धर्मविहीनस्वरूपमवलोक्य दुःखाभिभूतः सन् देशस्यास्य वास्तविकादर्शरामराज्य-स्वरूपमवलोकयितुमसौ चेष्टते। यतो हि तस्य प्रवचनस्य मूलवक्तव्यमस्ति रामो हि राष्ट्र, राष्ट्रो हि रामः। महाकाव्यस्यास्य दशमे सर्गे 'राम' इति शब्दस्य स्वरूप प्रतिपादयन् कविः कथयति -

रामः स्वरूपं हि मनुष्यताया राष्ट्रस्य वै मङ्गलनामधेयम् ।

स एव हत्वा दशकण्ठमाजौ लोकान्समस्तानसुखिनो विदध्यात्।।[16]

अर्थात् राम इति शब्दस्तु मनुष्यतायाः द्योतकोऽस्ति । रामशब्दस्य 'रा' इत्यनेन राष्ट्रं 'म' इत्यनेन मङ्गलनामधेयं चावबुध्यते। अदूरे अतीते 'श्रीरामजन्मभूमि' इति बहुचर्चिते विवादे भारतवर्षस्य उच्चतमे न्यायालये महाकविश्रीरामभद्राचार्य स्ववैदिकयुक्तिभिः अयोध्यानगरी एवं श्रीरामचन्द्रस्य साक्षात् जन्मभूमि इति प्रमाणयन् भारतवर्षस्य गौरवोज्ज्वलमितिहासं संरचयामास । तन्मतानुसारं भगवान् भारतवर्षस्य सूक्ष्मरूपो भवति। भारतवर्षमिदं भगवतः स्वरूपं भवति । अतः समग्रमिदं जगत् तु भारतवर्षस्य साम्यं न भवति । एवं स्वानुभूतिं महाकविः स्वरचिते चन्द्रशेखरचरितम् इति ग्रन्थे सुरीत्या प्रकाशयति तद्यथा -

दृष्टं विधात्रा न बिभर्ति साम्यम्, जगत्समग्रं किल भारतस्य।

तद् भारतान्न्युनमनेन चक्रे नेमाक्षरं नूनममुष्य नाम ।।[17]

अर्थात् यदैव विधाता दृष्टवान्, यत् समग्रमिदं जगत् भारतस्य साम्यं न भवति, तदा भारतात् अर्धाक्षरं न्यूनं संसारस्य नाम जगत् कृतवान् ।

उपसंहारः-

एवं चतुरस्रं परिलक्ष्यते श्रीमद्रामभद्रचार्यपादानां सारस्वतं क्षेत्रम्। वेदवदाङ्गानां रहस्यमयं स्वरूपम्। पुनर्विविधशास्त्राणां नारिकेलकठिन-कलेवराश्शूडान्तसिद्धान्ताः। चाप्यबोधविकलग्राह्या भक्तिरसरसायनमाधुरी श्रीरामकृष्णचरितनिस्यन्दिनी। हन्त। सर्वत्राप्यकुण्ठा गतिर्भार्गवराघवीय-काराणाम्। रामकथप्रसङ्गान् प्रस्फुटीकुर्वन् कविर्यथा श्रोतृन् साधारणी-करणापहृतकथेतरसंसृतिभावान् रोदयति तथैव तदधिकं स्वयमपि रोदतीति चित्रम्। सर्वाण्यपि शास्त्राणि श्रीरामभद्राचार्यवशंवदानीत्यत्र न काऽपि संशीतिः। अकिञ्चित्करकिङ्करकल्पाः शास्त्रपंक्तयः स्मरणसमकालमेव तद्बुद्धौ समवभासन्ते। एवं हि सर्वविद्यामयं प्रतिभाति श्रीमत्तुलसीपीठाधीश्वर-व्यक्तित्वम्। हिन्दीकाव्यप्रचलिताः सपादिकाः (सवैया इति) घनाक्षरिकाश्च (घनाक्षरीति) यथायथं प्रयुज्य प्रस्तोति यथा छन्दोविचितिप्रागल्भ्यं कविस्तथैव रामकथाया नूतनाभिप्रायानपि समुपन्यस्यति। मन्ये एभिरेवाभिप्रायैः प्रकरणवक्रतासौख्यं संसृजती भार्गवराघवीया रामकथा सहृदयानां मनांस्यावर्जयिष्यति। एवमन्यत्रापि स्वरचिते भार्गवराघवीये रसरीत्यलङ्कारच्छन्दौचित्यादिभिः महाकवेः भाष्यगतनैपुण्ये स्वाभिनवप्रयासः यथार्थेण सहृदयाह्लादः भवति इति शम् ।

पादटीका

1. पराशरपुराणे - पृ. 35
2. ध्वन्यालोके - 4.4, पृ. 256
3. लोचनटीकायाम् - 1.1, पृ. 1

4. भार्गवराघवीये, प्रथमसर्गे – पृ. 2
5. काव्यकौतुकम् – पृ. 21
6. भार्गवराघवीये – 5.101, पृ. 118
7. भार्गवराघवीये – 21.101, पृ. 511
8. किरातार्जुनीये – 15.14, पृ. 55
9. भार्गवराघवीये – 20.92, पृ. 481
10. भार्गवराघवीये – 20.93, पृ. 482
11. भार्गवराघवीये – 20.94, पृ. 484
12. भार्गवराघवीये – प्रकाशकीये
13. भार्गवराघवीये – 3.26, पृ. 56
14. भार्गवराघवीये – 7.17, पृ. 145
15. भार्गवराघवीये – 7(11.17), पृ. 143–145
16. भार्गवराघवीये – 10.23, पृ. 213
17. मेरी स्वर्णयात्रा – पृ. 85

सहायकग्रन्थसूचीः

1. अलङ्कारशास्त्रस्येतिहासः – केतकीनायकः, सांविदीप्रकाशनम्, पुरी, ओडिशा
2. किरातार्जुनीयम् – यदुपतित्रिपाठी, वि.एन्.पब्लिशर्स, कोलकाता।
3. ध्वन्यालोकः – सुबोधचन्द्र सेनगुप्तः, संस्कृतबुक्डिपो, कोलकाता ।
4. मेरी स्वर्णयात्रा – रामभद्राचार्य विकलाङ्ग विश्वविद्यालयः, उत्तरप्रदेशः ।
5. श्रीभार्गवराघवीयम् – रामभद्राचार्यः, रामभद्राचार्य-विकालङ्ग-विश्वविद्यालयः, उत्तरप्रदेशः
6. श्रीभार्गवीयराघवीयम् मीमांसा – वागीशदिनकरः, देवभारतीप्रकाशनम, दिल्ली ।
7. समानुभूतिः – रामभद्राचार्य विकलाङ्ग विश्वविद्यालयः, उत्तरप्रदेशः ।
8. संस्कृतसाहित्यर इतिहास – हरेकृष्णशतपथी, किताबमहल, कटक, ओडिशा।
9. संस्कृतसाहित्यशास्त्रे साम्प्रतिकी धारा – प्रशान्तकुमारपण्डा, ज्ञानेन्द्रकल्याणीपब्लिशर्स, बालेश्वरः, ओडिशा ।

****

11. वर्तमानसंस्कृतशिक्षणे भाषणकौशलस्य परिष्कारार्थम् उपकरणानां पाठ्येतरक्रियाकलापानां च योगदानम्

डॉ. हरि ओम
सहायकाचार्यः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
वेदव्यासपरिसरः, बलाहरः,हिमाचलप्रदेशः

शोधसारः

प्रस्तुतशोधपत्रे प्राचीनकालिकशिक्षणविधीनां पद्धतीनाञ्च विश्लेषणमेवं तेषां संस्कृतशिक्षणे का उपयोगिता ? इति वर्णनं विधायवर्तमानसन्दर्भे संस्कृतशिक्षणस्य पारम्परिकविधीनां पद्धतीनाञ्च वर्णनं कृतम् ।

सर्वप्रथमं तु भाषायाः विषये विषदवर्णनं तथा जीवने समाजे वा भाषायाः का आवश्यकता ? भाषायाः वैशिष्ट्यं किम् ? इति सविषदं वर्णनं विहितम् । तदनु संस्कृतभाषायाः सन्दर्भे वर्णनं विश्लेषणञ्च कृतम् । अनन्तरं संस्कृतभाषाशिक्षणे प्राचीनसंस्कृतशिक्षणविधीनां पद्धतीनां तथा च संस्कृतशिक्षायाः स्वरूपं किम् ? अस्य वर्णनम् अकारि पुनश्च भाषणकौशलं नाम किम् ? भाषाणकौशलस्य तात्पर्यं किम् ? इत्यस्मिन् विषये वर्णनं कृतमस्ति ।

इत्थमग्रे भाषणकौशलविकासाय के उपायाः भवितुमर्हन्ति? कथं भाषायाः शिक्षणं भवेत् इति निरुपणं कृतम् । तथा भाषणकौशलस्य स्रोतांसि, भाषणकौशलस्य विकासाय दृश्यश्रव्योपकरणानां भूमिका का ? इत्येतद्विश्लेषणं कृतमस्ति ।

सम्प्रति प्रश्नोऽयमुत्पद्यते यत् संस्कृतभाषायाः अध्ययनं पुराकाले कथमासीत् सम्प्रति च कथमस्ति इत्येतद् ज्ञातुमेव विषयोऽयं शोधपत्रे स्वीकृतः यत् "वर्तमानसंस्कृतशिक्षणे भाषणपठनकौशलयोः परिष्काराय पाठ्येतरक्रियाकलापा" । अत्र सर्वप्रथमं प्रतिपाद्यते यत् पुराकाले संस्कृतशिक्षणं कथमासीत् । तस्मिन् शिक्षणे केषां विधीनां प्रयोगः अभवत् । का च पद्धतिः, कश्च पाठ्यक्रमः आसीत् । पुराकाले शिक्षा बालकेभ्यः कथं प्रदीयते स्म । अत्रापि विशिष्य प्राचीनसंस्कृतशिक्षणस्य स्वरूपवर्णनं विधास्यते ।

कूटशब्दः- संस्कृतशिक्षणम्शैक्षिकोप ,पाठ्येतरक्रियकलापः,भाषाकौशलम् ,करणञ्चेत्यादयः।

सीमाङ्कनम्- शोधपत्रेऽस्मिन् भाषणकौशलेशैक्षिकोपकरणानां पाठ्येतरक्रियाकलापानां च विषये एव प्रतिपादितमिति ।

भाषा तु मानवस्य विचारविनिमयस्य विचाराणामादानप्रदानस्य चास्ति एकं साधनम् । भाषाशब्दस्युत्पत्तिः 'भाष्' धातोः 'गुरोश्च हलः[1]' इति 'अ'प्रत्यये टापि कृते भाषा शब्दोऽयं व्युत्पद्यते । अस्मिन् विश्वे व्याप्तानां चेतनाचेतनानां भावाभिव्यक्तेः सम्पूर्णसाधनानि भाषेत्याभिधीयते । भाषाशब्दस्य अर्थोऽस्ति यत् विचाराणां प्रकाशनमिति । प्रवर्तमानविषये बृहदारण्यकोपनिषदि उल्लेखः लभ्यते-

"वाग्वै सम्राट्परमं ब्रह्म"[2]

व्यक्तवाग्रूपेण यस्याः अभिव्यक्तिः क्रियते सा भाषेति कथ्यते । काव्यादर्शकर्त्रा आचार्यदण्डिना निगदितं काव्यादर्शे –

"वाचामेव प्रसादेन लोकयात्र प्रवर्तते"[3]

वस्तुतः अस्मदीया लोकयात्रा देव्याः वाग्देव्याः कृपयैव सम्भाव्यते । इत्थं भाषां सम्बोध्याग्रे भाषामाध्यमेन संस्कृतभाषां प्रस्तोतुं प्रयासः कृतः ।

संस्कृतभाषा-

संस्कृतशब्दोऽयं सम् उपसर्गपूर्वकं'कृ' धातोः क्त प्रत्यये ल्यूटि च निष्पन्नः[4] । अस्यार्थो भवति संस्कारिता, परिमार्जिता, परिशुद्धा च भाषा । संस्कृतभाषा अस्माकं भारतदेशस्यैव न, अपितु अस्य संसारस्य प्राचीनतमा भाषा वर्तते । इयमेव संस्कृतभाषा देववाणी अपि कथ्यते। यथा-**"संस्कृतं नाम दैवीवाक्"** आदिकालस्य सभ्यतायाः परिचयं प्राप्तुं वयं संस्कृतभाषायाः एव अध्ययनं कुर्मः इति । संस्कृतभाषायामेव लोकहितस्य राष्ट्रहितस्य च वर्णनं प्राप्यते । उक्तमपि-

ॐसंगच्छध्वं संवदध्वंसं वो मनांसि जानताम्
देवाभागं यथा पूर्वेसञ्जानाना उपासते ।।

[1]पाणिनीय अष्टाध्यायी– 3/3/102.
[2]शास्त्रीजगदीशः – बृहदारण्यकोपनिषद्, पृष्ठ.सं.-111
[3]आचार्यदण्डी – काव्यादर्शः, परिच्छेदः -01, श्लोकः- 03.
[4]वाचस्पत्यम् – पृ.सं. – 5189.

समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।

समानं मन्त्राभिमन्त्रये वः समानेन वो हविषा जुहोमि ।।

समानी व आकूतिः समाना हृदयानि वः ।

समानमस्तु वो मनो यथा वः सुसहासति ।।[5]

इत्थं ज्ञायते यत् संस्कृतभाषा देवभाषा वर्तते । यतोहि अस्यां भाषायां सद्भावनायाः हितस्य च भावना दरीदृश्यते यत्-

"अयं निजः परो वेति गणना लघुचेतसाम् ।

उदारचरितानां तु वसुधैव कुटुम्बकम् ।।"[6]

क्रमेऽस्मिन्इतोऽपि स्पष्टतायैSanskrit Commission इत्यस्य प्रतिवेदनमत्र प्रस्तूयते- "The Modern Aryan Language's were all born in the lap of Sanskrit, and as for the Dravidian language, ever since their earliest use, they have been nurtured by Sanskrit."[7]

प्राचीनसंस्कृतशिक्षायाः स्वरूपम्-

पुराकाले संस्कृतशिक्षा गुरुकुलेषु छात्रेभ्यः प्रदीयते स्म । छात्रः स्वगृहं विहाय त्यक्त्वा वा गुरोः पार्श्वे अध्ययनाय गच्छति स्म । गुरुरपि तं छात्रं स्वपुत्रमिव शिक्षयति स्म । गुरु पञ्चविंशतिः वर्षाणि पर्यन्तं तस्मै छात्राय विभिन्नशास्त्राणां ज्ञानं ददाति स्म । सः छात्राय प्रायोगिकं, मौखिकं, व्यावहारिकञ्च विषयं बोधयति स्म । तस्मिन् दीयमाने ज्ञाने सः ज्ञानदाता अनेकान् विधीन् प्रयुङ्क्ते स्म । तद्यथा-

01. कण्ठस्थीकरणविधिः
02. प्रश्नोत्तरविधिः
03. व्याख्याविधिः
04. प्रत्यक्षविधिः
05. शास्त्रार्थविधिः

एतैः विधीभिः सः सर्वेभ्यः छात्रेभ्यः ज्ञानं प्रददाति स्म । छात्राः अपि एतैः झटिति ज्ञानं प्राप्नुवन्ति स्म । अस्य शिक्षणस्य प्रमुखमुद्देश्यम् "सा विद्या या विमुक्तये"[8] । उद्देश्यमेतद् प्राचीनशिक्षाव्यवस्थायाः गुरुकुलशिक्षायाः वासीत् ।

वर्तमानसंस्कृतशिक्षणस्य स्वरूपम्-

संस्कृतशिक्षममद्यत्वे गुरुकुलशिक्षणपद्धतितः भिन्नमस्ति । अत्र शिक्षणं विद्यालयेषु, महाविद्यालयेषु औपचारिक-अनौपचारिक-निरोपचारिकमाध्यमैः प्रदीयते । साम्प्रतिकेऽस्मिन् वर्तमानकाले नास्ति प्राचीनपरम्परायाः परिपालनमिति । संस्कृतशिक्षणं सम्प्रति प्रौद्योगिक्याः आधीनमस्ति । तस्मिन् शिक्षणे नूतनविधीनां प्रयोगः भवति । कक्षाशिक्षणे उपागमानां प्रयोगः क्रियते । तद्यथा-

01. कठोरोपागमः
02. मृदुलोपागमः

शिक्षायामाधुनिकोपागमानां द्वारा पाठयितुं लुम्सडेन काचन सामग्रीं प्रस्तुतो[9]-

आधुनिकसंस्कृतशिक्षणं रुचिकरं निर्मातुं सङ्गणकस्य प्रयोगोऽपि क्रियते । Projector, Ohp, Slide, Computer, p.p.t, इत्येतेषां प्रयोगः वर्तमानसंस्कृतशिक्षायां भवति । अस्य संस्कृतशिक्षणस्य सरलीकर्तुं शिक्षाशास्त्रिभिः लूतनविधीनां प्रयोगोऽपि क्रियते । यथा-

01. हरबर्टीया पञ्चपदी
02. विश्लेषणात्मकविधिः
03. भण्डारकरविधिः

---

[5]ऋग्वेदः – 10/191/2-4
[6]महोपनिषद्, अध्याय ६, मंत्र ७१
[7]Report of the Sanskrit Commission- p.no-85.
[8]तत्कर्म यन्न बन्धाय सा विद्या या विमुक्तये।
आयासायापरं कर्म विद्याऽन्या शिल्पनैपुणम् ॥ विष्णुपुराण)म्(
[9] शैक्षिकतकनीकि के मूलाधार, पृ.सं.- 16.

04. पाठ्यपुस्तकपद्धतिः
05. आगमननिगमनविधिः
06. प्रायोजनाविधिः
07. प्रश्नोत्तरविधिः
08. प्रयोगात्मकविधिः

एतेषां विधीनां प्रयोगः आधुनिकसंस्कृतशिक्षणे भवति । एतेषां द्वारा सरलतया विषयज्ञानं प्राप्तुं शक्यते । एतेषां विधीनां प्रयोगः छात्राः स्वयमेव कुर्वन्ति । एतेषां प्रयोगं कृत्वा छात्राः सक्रियाः भवन्ति । संस्कृतशिक्षणस्य नूतनोपक्रमस्य प्रमुखोद्देश्यमस्ति- सरलतया विषयावबोधः परामृश्यते । इतः परमग्रे वर्तमानसंस्कृतशिक्षणे भाषणकौशलस्य उपादेयता का वर्तते कथञ्च एतस्य कौशलस्य प्रयोगः कर्तुं शक्यते इति । आधुनिकसंस्कृतशिक्षणस्यस्वरूपमुपस्थाप्याग्रे भाषणकौशलमुपस्थाप्यते ।

भाषणकौशलम्-

देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥[10]

भाषाकौशलेषु द्वितीयं स्थानं भाषणस्य । सर्वेऽपि मनुष्याः स्वीयम् आशयं प्रकटीकर्तुं भाषन्ते एव । परञ्च शब्दोच्चारणमात्रं भाषणं न इति अस्माभिः ज्ञातमेव । सुसंस्कृते वातावरणे प्रवृद्धानां, बालानां मातृभाषायां भाषणकौशलशिक्षणं न क्लेशाय । यतः तादृशानां भाषणं स्पष्टं भवति । तेषाम् उच्चारणं शुद्धं भवति, शब्दसम्पत्तिश्च विपुला जायते ।

संस्कृतभाषिवातावरणम् अद्यत्वे प्रायः छात्रैः स्वगृहे परिसरे वा नोपलभ्यते इत्यतः सर्वेषामपि संस्कृतच्छात्राणां संस्कृतविषयकश्रवणभाषणकौशलयोः शिक्षणस्य आरम्भः विद्यालये एव भवति इति वक्तुं शक्यते । परन्तु तैः कीदृशात् परिसरात् आगताः इत्यवलम्ब्य तेषां भाषणे स्पष्टता उच्चारणे शुद्धता वा निर्धार्यते । शब्दसम्पत्तेः निर्धारणेऽपि सः एव अंशः निर्णायकः भवति । सम्यक् भाषणस्य शुद्धभाषणस्य च विषयेऽपि विद्वज्जनानाम् अभियुक्तोक्तिः प्रसिद्धा संस्कृतजगति-

"यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम् ।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत् ।।"

ग्रन्थकारेणात्र उच्चारणभाषणयोः शुद्धतायाः महत्त्वं प्रत्यपादि-

"व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ।।"[11]

भाषाशिक्षणे प्रथमं सोपानं भवति पदानां साधूच्चारणशिक्षणमिति ।

भाषणकौशलविकासस्य उपायाः-

01. सम्भाषणम्
02. कथाकथनम्
03. चित्रपठनम्
04. नाटकाभिनयः
05. भाषाक्रीड़ा

भाषणकौशलस्य प्रकाराः-

भाषणकौशलं मुख्यतः द्विधा विभक्तुं शक्यते उच्चारणं मौखिकाभिव्यक्तिश्चेति ।

[10]ऋग्वेदः सूक्तं ८.१००
[11]पाणिनीय शिक्षा – श्लो – 25

प्रकाराः



उच्चारणम्

01. ध्वनेः उच्चारणम्
02. विवृत्तिः
03. बलाघातः
04. अनुतानः

मौखिकाभिव्यक्तिः

01. शाब्दिकसंरचना
02. व्याकरणिकसंरचना
03. आर्थीसंरचना

भाषणकौशलस्य प्रकारान् विवेच्याग्रे भाषणकौशलस्य स्रोतांसि प्रस्तूयन्ते-

भाषणकौशलस्य स्रोतांसि-

01. संवादः
02. सम्मभाषणम्
03. प्रश्नोत्तरम्
04. चित्रवर्णनम्
05. कथाकथनम्
06. वादविवादः
07. नाटकाभिनयः
08. श्लोकपाठः
09. आत्मानुभवकथनम्

भाषणकौशलस्योद्देश्यानि-

01. छात्रेषु स्वतन्त्ररूपेण स्वीयान् विचारान् प्रकटीकरणस्य क्षमतोत्पादनम् ।
02. कुशलवक्तृणां निर्माणम् ।
03. छात्रान् प्रभावोत्पादकशैल्यामन्यैस्साकं वार्तालापकरणस्य योग्योत्पादनम् ।
04. छात्रान् शुद्धोच्चारणस्य, भावानुगुणं भाषणस्य क्षमतोत्पादनम् ।
05. सरलस्पष्टशुद्धशब्दानां भावाभिव्यक्तौ प्रयोगकरणस्य क्षमतोत्पादनम् ।

परिष्कारार्थं पाठ्येतरक्रियकलापाः-

शोधपत्रे आधुनिकसंस्कृतशिक्षणे भाषणकौशलस्य परिष्काराय काश्चन पाठ्येतरक्रियाकलापानां वर्णनमपि अत्र क्रियते । यतोहि प्रत्येकस्याः भाषायाः कौशलानि भवन्त्येव । तेषु कौशलेषु वातावरणेन सह काश्चन त्रुटयः आयन्ति । यया त्रुट्या भाषायां दोषाः समागच्छन्ति । भाषायामागतानां दोषानां निवारणायेव पाठ्येतरक्रियाकलापानां प्रयोगः क्रियते । अत्रापि भाषणकौशलस्य परिष्काराय काश्चन पाठ्येतरक्रियाकलापानां चयनं कृतमस्ति । ते च-

01. दृश्यसाधनानि
02. श्रव्यसाधनानि
03. भाषात्मकक्रीडा
04. प्रतियोगिता च ।

उपर्युक्तान् प्रयोगान् विधाय अधिकृतकौशले परिष्काराय साहाय्यता लभ्यते । वर्तमानसंस्कृतशिक्षणे शिक्षणव्यवस्थायाञ्च एतेषां प्रयोगोऽपि विद्वद्भिः क्रियते । येन प्रत्येकस्यां भाषायां परिष्कारः सौकर्येण सम्भवति ।

निष्कर्षः

निष्कर्षरूपेणात्र वक्तुं शक्यते यत् प्राचीनकाले संस्कृतशिक्षायाः शिक्षणे विभिन्नप्राचीनपद्धतीनां विधीनाञ्च प्रयोगः भवति स्म । प्रस्तुतशोधपत्रे प्रमुखतया अन्विष्टमेतत् यत् वर्तमानसंस्कृतशिक्षणस्य पद्धत्यैः भाषाशिक्षणस्य तथा भाषाकौशलानां विकासः सारल्येन सम्भवति । कारणमिदं वर्तते यत् वर्तमानकालिक ये छात्राः सन्ति ते उपकरणप्रियाः सन्ति । तेषां कार्याणि उपकरणैः सम्पूरितानि सम्भवन्ति । उपकरणपाठ्येतरक्रियाकलापाभ्यां भाषणकौशलस्य विकासः सम्भवति । इदानीं सर्वत्र व्याख्याने पाठने च दृश्यश्रव्योपकरणानां प्रयोगं बहुधा भ्रवति । कारणं परिवेशोऽपि इत्थं निर्मितं छात्राणामपि एतानि संसाधनानि प्रति रुचिः वर्तते । मनोविज्ञानमपि स्पष्टमत्र निर्दिसति यत् यस्याः कस्याः अपि भाषायाः विषयस्य च ज्ञानं दातव्यं तर्हि छात्राणां रुच्याः ध्यानमावश्यकं भवति । एतदर्थं मया निश्चितं यत वर्तमानकालिकसंस्कृतशिक्षणे आधुनिकपद्धतिः विधिश्च प्रयोगमध्ये दृश्यश्रव्योपकरणानि, भाषात्मकक्रीड़ा, विविधप्रतियोगिताभिः, शिक्षणं रुचिकरं भवितुमर्हति । अत एव उपकरणानां पाठ्येतरक्रियाकलापानां च प्रयोगः उपयुक्तः वर्तते नास्ति कश्चिद् संदेहः इति ।

सन्दर्भग्रन्थसूची-

01. पाण्डेय डॉ. रामशकल, संस्कृशिक्षणम्, नवीनतमसंस्करणम्, विनोदपुस्तकमन्दिर आगरा-2.
02. वत्स डॉ. बी.एल, संस्कृतशिक्षणम्, नवीनतमसंस्करणम्, विनोदपुस्तकमन्दिर आगरा-2.
03. शर्मा डॉ. च.ल.ना. सिंह, सिंह डॉ. फतेह, संस्कृतशिक्षणम्, प्रथमसंस्करणम् 1996, भारतमुद्राप्रकाशनम्, केरलः ।
04. भन्साली डॉ. आशा, संस्कृतशिक्षण के नवीन उपागम

****

12. श्रीभर्तृहरेः नीतिशतके सत्कर्मणः वैशिष्ट्यम् : एका समीक्षा

डॉ. प्रीतिलक्ष्मी स्वाईं

सहाध्यापिका,

संस्कृतविभाग, भाषा-भवनम्, विश्वभारती, शान्तिनिकेतनम्,

वीरभूम्, पश्चिमवङ्गः, PIN-731235, Email: pritisans@gmail.com,

दूरभाषसंख्या- 9475848652

सारांशः-

संस्कृतकाव्यजगति पद्यकाव्यस्य भूमिका अतुलनीया। पद्यकाव्येषु शतककाव्यस्य स्थानं स्वतन्त्रम्। तेषु नीतिशतकस्य महत्त्वम् अपरिहार्यम्। अस्य उपदेशसमूहस्य अद्यतनसमाजे प्रभूता उपयोगिता वर्तते। नैतिकज्ञानशून्येन विषयासक्तमानवाः पशुवद्जीविका निर्वहन्ति। विलासव्यसनेन विमुग्धा ज्ञानहीनाश्च भवन्ति। फलतः सत्कर्मणः अनुष्ठानाभावस्तथा कुकर्मणः प्रादुर्भावो दरीदृश्यते। आधुनिकमानवाः कर्म विना प्रचुरफललब्धुमिच्छन्ति। उत्तममार्गं त्यक्त्वा विनाशपन्थानं स्वीकृत्य अधोपतिता भवन्ति। एतेषां कृते श्रीभर्तृहरिकृतः नीतिशतके विराजिताः नैतिकज्ञानसमृद्धाः प्रदर्शिताः सन्मार्गाः वाञ्छनीयाः। एतद्विषये शोधपत्रेऽस्मिन् विचारान् प्रस्तौमि।

कूटपदानि - मुक्तकम्, सत्कर्म, फलम्, धर्मः, मानवः, सुकृतम्।

भूमिका-

संस्कृतसाहित्याकाशे नक्षत्ररूपेण विराजमाना महामहिमानः शतकत्रयस्य रचयितारो महान्तः कवयो भर्तृहरिरासन्। । तस्य गुरोर्नाम वसुरात आसीत्। महावैयाकरणो महायोगी च स विभिन्नेषु शास्त्रेषु यथा वेदेषु, वेदांगेषु, दर्शनेषु, योगेषु, व्यवहारशास्त्रेषु च पारंगताः स्म। एतेषां महोदयानां सुकृतयः भवन्ति-वाक्यपदीयम् (व्याकरणग्रन्थः), वाक्यपदीयटीका (१-२ काण्डयोः), भट्टिकाव्यम्, भागवृत्तिः, महाभाष्यदीपिका (महाभाष्यटीका), वेदान्तसूत्रवृत्तिः, मीमांसासूत्रवृत्तिः, शब्दधातुसमीक्षा, एवं नीतिशतकं श्रृंगारशतकं वैराग्यशतकञ्च शतकत्रयम् इति।एतासु सुप्रसिद्धासु कृतिषु अन्यतमा भवति शतककाव्यं नीतिशतकम्। नीतिशतके भर्तृहरिणा स्वानुभूतिमाश्रित्य तथा लोकव्यवहारमाधारीकृत्य नीतिसम्बन्धितानि विविधानि श्लोकानि प्रदत्तानि। मोनियर विलियम्स महोदयेन संस्कृताङ्ग्लकोशे नीतिशतकशव्दस्यार्थः एवं प्रदत्तः- "the 100 verses on morality by Bhartṛhari". विद्याधरस्य नीतिरत्नम्, श्री मन्महाराजाधिराजस्य नीतिप्रदीपः, कामंदकीयस्य नीतिसारः, विष्णुगुप्तस्य चाणक्यनीतिः प्रभृतिषु नीतिवषयकेषु काव्येषु भर्तृहरेः नीतिशतकं सर्वश्रेष्ठं स्थानं लभते। काव्यमिदं मुक्तकम्। श्लोकान्तरनिरपेक्षम् एकमेव पद्यं भवति मुक्तकम्। काव्यमिदं स्वार्थसिद्धये पदान्तरान्वयं नापेक्ष्यते। अस्य मुक्तकस्य लक्षणम् अग्निपुराणे एवमेव उपलभ्यते- "मुक्तकं श्लोक एकैकश्चमत्कारक्षमः सताम्"[i]। साहित्यदर्पणे "वृत्तगन्धोज्झितं गद्यं मुक्तं वृत्तगन्धि च"[ii] इत्याहुः। यस्मिन् काव्ये प्रत्येकं श्लोकं स्वतंत्रतापूर्वकं स्वकीयपरिपूर्णार्थप्रकाशने समर्थं भूत्वा सहृदयानां हृदयकमले चमत्कारित्वं प्रतिपादयति तादृशं काव्यं भवति मुक्तकम्। मुच्यते स्मेति मुच् धातोः निष्ठा(३.२.१०२) सूत्रेण क्तः प्रत्ययेन एवञ्च संज्ञायां कन् (५.३.७५) इत्यनेन सूत्रेण स्वार्थे कन् प्रत्ययेन मुक्तकमिति पदं निष्पन्नम्।

सत्कर्मणः वैशिष्ट्यम्-

अस्माकं मानवसमाजस्य आधारभूतानि प्राणस्वरूपाणि च भवन्ति नीतिशास्त्राणि। एतेषां प्रत्यहम् अध्ययनेन दैनन्दिनजीवने परिपालनेन च अस्माकं जीवनधारा श्रृङ्खलिता भवति। विविधेषु विषयेषु गुरुत्वपूर्णानि तत्वसंवलितानि तथ्यानि सन्निवेशितानि नीतिशास्त्रमिदम् अतीव मूल्यवत्तरम्। नीतिशतके परोपकारिणां मौलिकधर्मविषये सारगर्भकं श्लोकमेकं परिदृश्यते। तद्यथा-

"भवन्ति नम्रास्तरवः फलोद्गमैर्नवाम्बुभिर्दूरविलम्बिनो घनाः ।

अनुद्घताः सत्पुरुषाः समृद्धिभिः स्वभाव एवैष परोपकारिणाम्" ।।[iii]

अस्य श्लोकस्य भावार्थो भवति यत् फलप्रादुर्भावैर्वृक्षा विनीता जायन्ते, सजला मेघा दूरंयावदधो लम्बायमाना भवन्ति, अपि च सज्जनाः सम्पत्तिविशेषैः विनम्रा भवन्ति। यतो हि तेषां फलानि,जलानि समृद्धयश्च न तु स्वार्थम् परंतु परार्थमेव भवन्ति। इदं च नम्रत्वं परोपकारिणां एतेषां स्वभावसिद्धो धर्मः। एतादृशानि बहूनि उदाहरणानि समुपलभ्यन्ते तत्र। याभिः क्रियाभिः परोपकारो भूयते एवं काचिदपि हानिः न आशङ्क्यते अपि च मानवसमाजस्य मंगलाय, सर्वजनहिताय च क्रियते तत्तु सत्कर्म इत्याचक्षते। श्रूयते च –

"अष्टादशपुराणानां सारं व्यासेन कीर्तितम् ।

परोपकारः पुण्याय पापाय परपीडनम्" ।।

साधारणतः 'कर्म' इत्यनेन 'क्रिया' बुध्यते। व्याकरणे 'कर्म' शब्देन क्रियायाः निष्पाद्यमानफलस्याश्रय इति बुध्यते। यथा- रामः गृहं गच्छति। वाक्येऽस्मिन् गमनक्रियायाः फलाश्रयत्वात् गृहं इति 'कर्म' भवति। तच्च जन्मभेदात् चतुर्विधम् सञ्चितं प्रारब्धं क्रियमाणं भावि चेति वेदान्तमतेन।

ब्राह्मणादीनां स्वाभाविककर्माणि यथा- 'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च। ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्। शौर्य्यं तेजो धृतिर्दाक्षं युद्धे चाप्यपलायनम्। दानमीश्वरभावश्च क्षत्रकर्म स्वभावजम्। कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम्। परिचर्य्यात्मकं कर्म शूद्रस्यापि स्वभावजम्'। स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानव इति ज्ञायते।

तदनन्तरम् 'अकर्म' इति कर्मेषु निर्लिप्तम्। न कर्म अकर्म इति नञ्समासः।उच्यते यत्- 'किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः'।यदा मनुष्यो निष्कामभावेन काऽपि क्रिया करोति तदा स कर्मफलाधीनो न भवति। अतः तत्कर्म 'अकर्म' इति उच्यते। यदा मनुष्यः सकामभावेन शास्त्रविहितं या काऽपि क्रिया करोति तदा स कर्मफलाधीनो भवति।तदेव 'कर्म' इति बुध्यते। दुराचारं नीतिविरुद्धञ्च कर्म 'दुष्कर्म कुकर्म' वेति ज्ञायते।अनुचितं निषिद्धञ्च कर्म भवति 'विकर्म', यथा-असत्यं, कपटं, हिंसा, ईर्ष्या प्रभृतयः। सदाचारं नैतिकञ्च कार्यं 'सुकर्म अथवा सत्कर्म' इति उच्यते, येन मानवसमाजस्य उत्थानं समृद्धिश्च भवति। अपि च, प्राणभूतानां विनाशेन मानवस्य अधर्म भवति परंतु अन्यायस्य अधर्मस्य च विनाशाय यदि युद्धमपि भवति एवं विनाशोऽपि जायते तर्हि तत्र धर्मप्राप्तिः इति आचक्ष्यते।अतः विविधेषु क्षेत्रेषु धर्मोऽप्यधर्मो एवं अधर्मोऽपि धर्मो भूयते।

कर्म मनुष्यस्य मानदण्डस्वरूपम्। तद्विना कोऽपि निमिषमपि स्थातुं न शक्यते। स्वकृतकर्मणः फलं नरो नूनमेव अवाप्स्यते यत्तु कर्मणः फलं न विनश्यति- "ध्रुवं न नाशोऽस्ति कृतस्य लोके"[iv]। सर्वे जनाः स्वकीयकर्मफलम् अवश्यमेव विन्दन्ते-"नूनं पूर्वकृतं कर्म सुधारमनुभूयते"[v]। ऋग्वेदस्य दशमसण्डलेऽपि कथितं यत्- "अकर्मा दस्युः"[vi]। अर्थो भवति कर्महीनो मनुष्यो दुराचारी। पुनः गीतायामप्युक्तम् अकर्मणः कर्म श्रेष्ठो भवति- "कर्म ज्यायो ह्यकर्मणः"[vii]। नरेण स्वकर्मणा स्वात्मपरिचयो निर्मीयते। अपि च अधुना एकः प्रश्नो जायते यत् कीदृशं कर्म करणीयम् इति। येन कर्मणा कस्यापि काचिदपि क्षतिः न भवति अपितु विश्वजनहिताय मानवसमाजस्य कल्याणाय च विद्यते तदेव वेदविहितं कर्म विधेयम्। नीतिशतके चतुर्नवतितमे श्लोके कर्मणो महत्त्वं गुरुत्वञ्च भर्तृहरिणा सुविस्तृतेन पर्यालोचनं कृतम्।स्वयं विधाताऽपि कर्मानुरूपमेव फलं ददाति, न तस्मादधिकं न्यूनं वा प्रयच्छति। सर्वशक्तिसंपन्ना देवा अपि वीधिमतिक्रम्य न किमपि कर्तुं राघन्ते यतो हि सर्वे कर्माधीनाः। तद्यथा-

"नमस्यामो देवान्ननु हतविधेस्तेऽपि वशगाः ।
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।।
फलं कर्मायत्तं यदि किममरैः किं च विधिना ।
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति" ।।[viii]

अधःपतनाभिमुखविशृङ्खलितमानवसमाजं यथायथरूपेण संरक्षणाय सत्कर्मणः प्रयोजनीयता अपरिहार्यम् । विचारपूर्वकमेव प्रत्येकं कार्यं करणीयम्। यद्यपि पूर्वकर्मानुसारेणैव मानवस्य बुद्धिः सत्कर्मणि-असत्कर्मणि वा प्रवर्तते एवं तदनुसारमेव च फलमपि सुखदुःखात्मकं वा लभ्यते तथापि बुद्धिमता सुष्ठुरूपेण चिन्तयित्वैव कर्तव्यम्।लभ्यते च-

"कर्मायत्तं फलं पुंसां, बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता" ।।[ix]

अस्मिन् प्रसंगे महाभारतेऽपि उच्यते-

"न कर्मणा पितुः पुत्रः पिता वा पुत्रकर्मणा ।
मार्गेणान्येन गच्छन्ति बद्धाः सुकृत दुष्कृतैः" ।।[x]

नीतिशास्त्रकुशला विद्वांसो धीरपुरुषाः समीचीनान्मार्गान्न स्खलिता भवन्ति। मनस्विजना धैर्यशीलामनुष्याश्च केनचित्कृताया निन्दाया स्तुतेर्वा अपेक्षां न कुर्वन्ति, मृत्युमप्युपेक्षन्ते परन्तु कदापि यथोचितान्मार्गात् पराङ्विमुखा न भवन्ति। न्यायप्रदर्शितमार्गे एते चलन्ति। उक्तञ्च-

"निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु, लक्ष्मीः समाविशतु, गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा, न्याय्यात्पथः प्रविचलन्ति पदं न धीराः" ।।[xi]

यदि पुरुषेण पूर्वजन्मनि विपुलानि पुण्यानि संरक्षितानि चेत्, एतानि पुण्यानि तं नरं सर्वदा आपदाद्रक्षन्ति। वनमध्ये रणे वा, शत्रुभिर्जलैरग्निभिर्वा पीडितो भवतु, समुद्रे पर्वतशिखरे वा यत्र तत्र भवतु तत्सुकृतप्रभावात् तस्य न कोऽपि किमप्यनिष्टं कर्तुं शक्नोति। अतः स्वसत्कर्मणा नरः सर्वत्र सुरक्षितः। अस्मिन् प्रसंगे तत्रैव स्पष्टतया विरचितम्।

प्रसंगेऽस्मिन् श्रीमद्भगवद्गीतायाः तृतीयाध्याये श्रीकृष्णेन प्रोक्तं-

"तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पुरुषः" ।।[xiii]

अस्मिन् श्लोके सर्वदा आसक्तिशून्येन स्वकर्तव्यकर्म सम्यक्तया सम्पादनेन नरः परमात्मां विन्दते इति विषये वर्णितः। विधेयकर्म अवश्यमेव करणीयम्। प्रत्येकस्य कर्मणः तदनुसारं फलमपि विद्यते। सुकर्मणः सुफलं तथा कुकर्मणः कुफलं प्राप्यते। कर्मणा सह कर्मफलं ओतप्रोतभावेन जडितः।

अतो मानवः स्वमत्या सुमार्गे गन्तव्यम्। नरस्य कर्मण्येव अधिकारो वर्तते परंतु कर्मफले नास्ति तत्तु दैवाधीनः। सदा सुकर्मणः सुफलं प्राप्स्यति इत्येतद् तु न सत्यम्।किंतु तर्हि अकर्मण्यपि लिप्तः मा भवेत्। अतः अस्मिन् प्रसंगे गीतायामुक्तं यत्-

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि" ।।[xiv]

न कोपि मनुष्यः कर्म त्यक्त्वा क्षणमपि स्थातुं शक्यते। सर्वे स्वकर्म स्वधर्मञ्च समाचरन्ति। कर्माधीना नराः कर्म एव अधिवसन्ति। एतदेव नरस्य जीवनस्य आधारशिलारूपेण विराजते।गीतायामपि दृश्यते- "न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः"[xv]।। धीरपुरुषाः कदापि कस्यामपि परिस्थितौ न्यायोचितान्मार्गात् पराङ्मुखा न भवन्ति। तदेव कुर्वन्ति यन्न्यायोचितं भवति।

भर्तृहरिणा कथितं यत् कर्मवशादेव ब्रह्मा नियमितरूपेण जगन्निर्माति। विष्णुरपि दशषु मत्स्याद्यवतारेषु कष्टं सहते एवञ्च रुद्रः कपालजटितेन पाणिना भिक्षार्थं पर्यटति। अपिच सूर्यः प्रत्यहं निरवकाले वियति भ्रमणं करोति। येन कर्मविशेषेण एते नियुक्तास्तत्कर्म अवश्यमेव सर्वतो गुरुतरम्। अतः कर्मणो महिमा अवर्णनीया अकथनीया च। महाभारतस्य उद्योगपर्वे वर्णितं यत् रुद्रः-आदित्यः-वसुः-विश्वेदेवाः-सर्वाणि नक्षत्राण्यपि एते स्वकर्मणा एव प्रकाश्यन्ते- "तथा नक्षत्राणि कर्मणामुत्र भान्ति रुद्रादित्या वसवोऽथापि विश्वे"[xvi]। तत्रैव कथ्यते यत् ऋषयोऽपि वेदज्ञानेन ब्रह्मचर्येण कर्मणा चैव तेजस्विनो जायन्ते- "ब्रह्मविद्यां ब्रह्मचर्यं क्रियां च निषेवमाणा ऋषयोऽमुत्र भान्ति"। अपिच यदि नरस्य पूर्वजन्मसुकृतार्जितानि भाग्यानि न सन्ति चेत् तर्हि आकृत्या, कुलेन, शीलेन, विद्यया, सेवया वा नरो न किमपि लब्धुं शक्नोति, भाग्यानि भवन्ति चेत् तर्हि यथा यथोचितकाले वृक्षाः फलैः सुशोभिता जायन्ते तथा स नरोऽपि कीर्त्यादिभिः शोभन्ते[xviii]। एतदेव ज्ञायते यत् नरः सत्कर्मणि यदेव प्राप्यते तदेव न किमपि वैभवेन लब्धुं शक्यते। समग्रजगत् कर्मण्येव उत्पद्यते प्रविलीयते च। महाभारतस्य अनुशासनपर्वे श्लोकमेकं परिदृश्यते यत्- "सर्वे कर्मवशा वयम्"[xix]।

पुनः सत्कर्मणः करणीयतायां प्रसंगे नीतिशतके एवम् गदितम्-

"या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः,
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय सत्क्रियां भगवतीं भोक्तुं फलं वाञ्छितं,
हे साधो! व्यसनैर्गुणेषु विपुलेष्वास्थां वृथा मा कृथाः"।।[xx]

सकलाभीष्टसिद्ध्यर्थं सत्कार्यकरणप्रक्रियाया अभ्यासो कर्तव्यः।यतः सा सत्क्रिया एव सकलगुणानाम् आकरः। या खलपुरुषान् साधून् करोति, मूर्खपुरुषान् विदुषः करोति, द्वेषिणो हितान् करोति, परोक्षं प्रत्यक्षं कुरुते एवं हालाहलमपि अमृतं कुरुते। अतो नश्वराणां गुणानामर्जने व्यर्थमेव प्रयासो न विधेय इत्यत्र स्पष्टम्। यदि अस्माभिः अविचारपूर्वको यत् किमपि कार्यं क्रियते तर्हि तस्य विषमपरिणामोऽपि तत्रैव परिदृश्यते। अतः सर्वं कार्यं विचार्यैव करणीयम्।तदा वयं निरापदा विपदमुक्ताश्च भविष्यामः। अन्यथा सहसा त्वरया वा कृतस्य कर्मणः फलमाजीवनं कष्टकरं भवति। सत्कर्मणो विमुखताऽपि नूनम् अतिमूर्खत्वं ज्ञापयति।यदि मनुष्य इमां कर्मभूमिं अवाप्य अपि संसारेऽस्मिन् तपो न चरति तर्हि स बहुमूल्ये वैडूर्यमये पात्रे महार्हं चन्दनकाष्ठं प्रज्वल्य तिलकषान् पचति इव अवभासते।मानवः साध्यमसाध्यं वा प्रयत्नं विदधातु , किन्तु कर्मवशाद् यद् भाव्यं तद् अवश्यमेव भविष्यति यच्चाभाव्यं तत्कथमपि न भविष्यति इति निश्चयः। तथाहि भर्तृहरिणा कथितम्-"नाऽभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः"। येन नरेण पूर्वं विपुलानि सुकृतानि कृतानि तेषां फलरूपतया तेन सर्वत्रैव समृद्धिर्लभ्यते एवञ्च सर्वोऽपि जनस्तस्यानुकूलो भवति। अपिच स नरो यत्र कुत्रापि गच्छतु तत्र तस्य आनन्द एव भवति।तेषां प्रभावेण मानव इहलोके परलोके च सुखी तथा तस्य सर्वकुशलो भवति।

निष्कर्षः-

कर्मणैव मानवः स्वनिर्धारितलक्ष्यं, सिद्धिं मोक्षञ्च अवाप्यते। अतः कर्मण्येव जगतः पर्यवसितः। स्वपरिकल्पितबुद्धिप्रदर्शितकर्मणा नरः आत्मपरिचयः सृज्यते। एतेन कर्मणा नरश्चैरो महापुरुषोऽपि वा भवेत्। सुकर्मनिष्ठनरः सुप्रतिष्ठितः। महाभारतस्य वनपर्वेऽवश्यकरणीयकर्मणि विषये कथितं यत् "अवश्यकरणीय च मा त्वां कालोऽत्यागदयम" (१५८.२१६) । सुभाषिते कर्मानुसारेण फलप्राप्तिर्विषय उक्तम् - कर्म तादृशं कुर्यात् येन भविष्ये नानुशोकः स्यात् । मनुष्यो यत् कर्म आचरति शुभम् अथवा अशुभं तदनुसारं कर्मफलं लभते। कर्तारं स्वकर्मफलं अवश्यमेव विन्दते। नरस्य कर्मफलप्राप्तये कर्तुः कर्मणश्च गुरुत्वपूर्णं स्थानं वर्तते। कर्मणः गुरुत्वम् अपरंपारम्। महापुरुषाः कर्मणा एव परमसिद्धा अभूवन्।विषयेऽस्मिन् गीतायां स्पष्टरूपेण चित्रितम् – "कर्मणैव हि संसिद्धिम्"। ईशोपनिषद्यपि प्रतिफलितम् यत् एतादृशः कर्म करणीयं येन कर्मणा मानवो निर्लिप्तो भवेत्। नीतिशतकेऽपि भर्तृहरिणा प्रोक्तं यन्मनुष्यस्य फलप्राप्तिः कर्माधीनं, बुद्धिश्च कर्मानुसारिणी भवति। तथापि नरस्य सुविचार्य्यैव कार्यं कर्तव्यम्। यतः सुकर्मणः परिणामोऽवश्यमेव सुफलम्। दुष्कर्मणः परिणामो दुष्फलमेव निश्चितम्। तदर्थं नरः सर्वदा सत्कर्म विधेयम्। कर्म विहाय न कोऽपि क्षणमपि स्थातुं शक्यते। कर्म उपरि विधेर्विधानमप्यवशम्। अर्थाद् विधिरपि कर्मवशगः। अतः मानवस्य सकलमनोरथसिद्ध्यर्थं सत्कर्मणोऽभ्यासो विधेयः। तत्सुकृतप्रभावादेव तस्य मनुष्यस्य न कोऽपि किमपि अनर्थं कर्तुं शक्नोति। सुकृतान्याचरणेन सर्वत्रैव समृद्धिर्लभ्यते। नीतिशतके सत्कर्मणो महत्वविषये प्रभावप्रसंगे परिणामसंबन्धे च यानि विशिष्टानि गुरुत्वपूर्णानि तत्वानि प्रदत्तानि तानि आधुनिकमानवजीवने अतीव मूल्यवत्तरानि।अतः सदा सुकृतान्याचरितव्यानि। सुकृतस्य वैशिष्ट्यम् अनिर्वचनीयम्।

सन्दर्भाः-

i अग्निपुराणम्, ३३७.३६
ii साहित्यदर्पणम्, ६.२१५
iii नीतिशतकम्, श्लो.७१
iv महाभारत, वन, २३६.२७
v महाभारत, शल्य, ५९.२२
vi ऋग्वेद, १०.२२.८
vii गीता, ३.८
viii नीतिशतकम्, श्लो.९४
ix नीतिशतकम्, श्लो.८९
x महाभारत, शान्ति, १५३.३८
xi नीतिशतकम्, श्लो.८४
xii तदेव, श्लो.९७
xiii गीता, ३.१९
ix तदेव, २.४७
x तदेव, ३.५
xi महाभारत,उद्योग, २९.१५
xii महाभारत,उद्योग, २९.१६
xiii नीतिशतकम्, श्लो.९५,९६
xiv महाभारत,अनु, १.७२
xv नीतिशतकम्, श्लो.९८
xvi तदेव, श्लो.१०१
xvii गीता,३.२०
xviii कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ।।(ईशोपनिषद्, श्लो.२)

सन्दर्भग्रन्थसूची-

१. उइल्सन्, एच्. एच्, ऋग्वेदसंहिता, नाग् पब्लिसर्स, दिल्ली, २०१५
२. गोयण्डक, जे., श्री मद्भगवद्गीता तत्त्वविवेचनी, गीताप्रेस, गोरखपुर, २०११
३. झा, तारिणीशः, त्रिपाठी घनश्यामश्च, अग्निपुराणम्, हिन्दी साहित्य सम्मेलन, प्रयागः, २००७
४. झा, नरेश, अष्टाध्यायी (शान्ति संस्कृत-हिन्दीव्याख्याविभूषिता), चौखम्बा सुरभारती प्रकाशन, वाराणसी, २०१७
५. झा, नरेश, नीतिशतकम्, चौखम्बाविद्याभवन, वाराणसी, २०१६
६. भक्तिवेदान्त, स्वामी प्रभूपाद, श्रीईशोपनिषद्, भक्तिवेदान्त बुक् ट्रष्ट, मायापुर, पश्चिम बंगाल, २०१८
७. विद्यालङ्कारः, सुभाषः, महाभारत कथा, प्रतिभा प्रकाशन, दिल्ली,२०१५
८. शर्मा, पाराशरः, दत्त योगेश्वरश्च, साहित्यदर्पणम् (द्वितीयखखण्डः), नाग पब्लिशर्स, दिल्ली, १९९९

****

13. ऋतुसंहारकाव्ये प्रथमसर्गे प्रतिपादितानां वनस्पतीनां आयुर्वेददृष्ट्या विवेचननम्

डॉ. नीरजतिवारी

असिस्टेंट प्रोफेसर, साहित्यविभागः

केन्द्रीयसंस्कृतविश्वविद्यालयः

लखनऊपरिसरः, विशालखण्डः 4, गोमतीनगरम् लखनऊ, 226010

Mob.: 9450530774 Email : neerajtiwaribhu@gmail.com

प्रस्तावना -

ऋतुसंहारः खण्डकाव्यं कविकुलगुरुकालिदासरचितकाव्येषु प्रथमः स्वीक्रियते। काव्यमिदं सुललितं माधुर्यसमन्वितञ्च अस्ति। अत्र षट्सर्गाः राजन्ते। **प्रथमसर्गे** - अष्टविंशतिः श्लोकाः सन्ति। प्रथमसर्गे ग्रीष्म ऋतोः वर्णनम् अस्ति। **द्वितीयसर्गे-** प्रावृड्वर्णनं राजते। अस्मिन् सर्गे नवविंशतिः श्लोकाः राजन्ते। **तृतीयसर्गे -** शरद्-ऋतोः वर्णनमस्ति। अत्र अष्टाविंशतिः श्लोकाः सन्ति। **चतुर्थसर्गे-** हेमन्तवर्णनमस्ति। अस्मिन् सर्गे नवदश श्लोकाः सन्ति। **पञ्चमसर्गे –**शिशिर-ऋतोः वर्णनं कविकुलगुरुकालिदासेन समुपस्थापितम्। अत्र षोडशश्लोकाः सन्ति। **षष्ठसर्गे -** ऋतूनां श्रेष्ठस्य वसन्तस्य ऋतोः वर्णनम् अवलोक्यते। अस्मिन् सर्गे अष्टाविंशतिश्लोकाः सन्ति। ऋतुसंहारस्य अन्तिमश्लोके कविना प्राकृतिकवर्णनेन सह सर्वेषां कल्याणस्य कामना कृता। यथा –

आम्री मञ्जुलमञ्जरी वरशरः सत्किंशुकं यद्धनुर्ज्या यस्यालिकुलम् कलङ्करहितं छत्रं सितांशुः सितम्।

मत्तेभो मलयानिलः परभृता यद्वन्दिनो लोकजित्सोऽयं वो वितरीतरीतु विनतुर्भद्रं वसन्तान्वितः।।[i]

एवं वर्णनेन स्पष्टं भवति यद् ऋतुसंहारो मुख्यरूपेण प्राकृतिकवर्णनयुक्तं खण्डकाव्यमस्ति। वनस्पतीनां सर्वाणि तत्वानि ऋतुसंहारे दरीदृश्यन्ते। अत एव अस्य काव्यस्य प्रतिष्ठा सम्पूर्णसंस्कृतवाङ्मये अस्ति। काव्यस्यास्य भाषा सुललिता सुमनोहराचाऽस्ति। सर्वाणि काव्यानि रससमन्वितानि सन्ति। एवं कथयितुं शक्यते यत् काव्यमिदं वनस्पतिविज्ञानदृष्ट्या महत्वपूर्णमस्ति।ऋतुसंहारखण्डकाव्ये विविधप्रसङ्गनिरूपणमाध्यमेन षड्विंशतिः (26) वनस्पतीनामुल्लेखो लभ्यते।

सम्प्रति ऋतुसंहारकाव्यस्य प्रथमसर्गे चन्दनं, मुस्तकं, कमलं, कुसुम्भं, कीचकः, शाल्मलिः, षड् वनस्पतीनां प्रतिपादनं वर्तते । द्वितीयसर्गे कमलं, कन्दली, बिम्बाफलं, कदम्बं, शालः, अर्जुनः, केतकी, केसरः, अगरुः, चन्दनं, मालती, बकुलः, द्वादशवनस्पतीनामुल्लेखो वर्तते। तृतीयसर्गे व्रीहिः, कमलं, सप्तपर्णः, मालती, काञ्चनारः, कदम्बं, कुटजः, अर्जुनः, शालः, अशोकः, बन्धूकः, द्वादशवनस्पतीनामुल्लेखो वर्तते। चतुर्थसर्गे गोधूमः, यवः, लोध्रः, व्रीहिः, कमलं, चन्दनं, अगरुः, प्रियङ्गुः, अष्टवनस्पतीनामुल्लेखो वर्तते। पञ्चमसर्गे ईक्षुः, व्रीहिः, चन्दनं, ताम्बूलं, अगरुः, कमलं, सप्तवनस्पतीनामुल्लेखो वर्तते। षष्ठसर्गे आम्रः, कमलं, कर्णिकारः, नवमल्लिका, चन्दनं, प्रियङ्गुः, केसरः, अगरुः, अशोकः, अतिमुक्तकः, कुरबकः, पलाशः, लोध्रः, कुन्दं, चतुर्दशवनस्पतीनामुल्लेखो वर्तते। अनेन प्रकारेण सम्पूर्णे ऋतुसंहारखण्डकाव्ये विविधप्रसङ्गनिरूपणमाध्यमेन षड्विंशतिः (26) वनस्पतीनां प्रतिपादनं वर्तते।किन्तु अत्र प्रथमसर्गस्थ वनस्पतीनां आयुर्वेददृष्ट्या विवेचनं क्रियते ।

विषयप्रवेशः-

सम्प्रति ऋतुसंहारकाव्यस्य प्रथमसर्गे चन्दनं, मुस्तकं, कमलं, कुसुम्भं, कीचकः, शाल्मलिः, आदि षट् वनस्पतयः इमानि सन्ति । तद्यथा -

1. चन्दनम् -

संस्कृतभाषायां नामानि –

चन्दनम्, गन्धसारं, महार्हं, श्वतेचन्दनं, भद्रश्रियं, श्रीखण्डं, मलयजं, गोशीर्षः, तिलपर्णकम्, इत्यादयः इति।[ii]

वनस्पतिपरिचयः –

चन्दनवृक्षः दीर्घाकारो भवति एवं पत्रं निम्बवृक्षपत्रसदृशो भवति, फलं वृत्ताकारं चर्णकान्नवत् भवति। अयं कर्नाटकप्रदेशेषु मलयपर्वतेषु च प्रचुरतया उत्पद्यते। पीतचन्दनं उत्तराखण्डेषु गन्धमादनपर्वतोपरि प्राप्यते। वर्षाकालादारभ्य शरदृतुपर्यन्तं अस्य पुष्पोद्गमः कालः वर्तते एतदनन्तरं फलं आयाति। चन्दनस्य बहुप्रजातयः अपि शास्त्रेषु निगदिताः वर्तन्ते। यथा -1. श्वेतचन्दनम् 2. पीतचन्दनम् 3. शवरचन्दनम् 4. रक्तचन्दनम् 5. पतङ्गचन्दनम् 6. बर्बरचन्दनम् 7. हरिचन्दनम्।[iii] परन्तु एषु सप्तषु मध्ये श्वेतचन्दनं सर्वोत्कृष्टं भवति।धन्वन्तरिणा निघण्टुग्रन्थे अपि एषां सप्तप्रजातीनां विषये चर्चा कृता वर्तते। अनेन प्रकारेण निघण्टुरत्नाकरकारेणापि चन्दनस्य भेदद्वयं निरूपितं वर्तते। तद्यथा -

चन्दनं द्विविधं प्रोक्तं वेदसुक्कडिसांज्ञिकम्। वेट्टं तु साईविस्फोटं स्वयं शुष्कं तु सुक्कडि।।[iv]

वस्तुतः उपर्युक्तस्य भेदद्वयस्य विषये विशिष्टप्रसङ्गोऽस्ति। यः मलयाचलस्य समीपे भवन्ति तद् वेट्टम् इति कथ्यते तथा वेट्टुनामकपर्वतोपरि यः भवति तत् चन्दनं वेट्टुं संज्ञयाभिधीयते। वेट्टचन्दनं आद्रं एवञ्च सुक्कडिचन्दनं शुष्कं भवति। अनयोः द्वयोः आयुर्वेदात्मकगुणः अग्रे आयुर्वेदविज्ञानप्रकरणे विवेचयामि।

काव्यात्मकमध्ययनविवेचनम् –

महाकविकालिदासः केवलं ऋतुसंहारकाव्ये एकादशस्थलेषु चन्दनवस्पतीनां विवेचनं विदधाति। तत्रादौ प्रथमसर्गे अस्मिन् श्लोके कान्तास्नेहामनाः पुरुषो वक्ति स्वप्रियतमां यदेतस्मिन् ग्रीष्मर्तौ चन्द्रमसः ज्योत्स्नया रात्रीणां तमांस्यपाकृतानि भवन्ति, तथाविधा रात्रयः, जलयन्त्रमन्दिरभवनानि, मणीनां प्रकारा, चन्दनपङ्कश्चैतानि सुखप्रदानि भवन्ति। अत एव जना इमानि वस्तूनि कामयन्ते।[v]

अपि च अस्मिन्नेव सर्गे अस्मिन् श्लोके नायकः तेषामुपकरणानां वर्णनं करोति येषामुपकरणानां प्रयोगं कृत्वा कामिन्यः स्वप्रियतमानां सन्तापमपाकुर्वन्ति। तथा हि ग्रीष्मर्तौ ताः स्वक्षौमवस्त्रमेखलामण्डितैः नितम्बमण्डलैः, चन्दनचर्चितैः हारालंकृतैः पयोधरैः, स्नानीयचूर्णसौगन्ध्यसुगन्धितैः कुन्तलकलापैश्च कामिनां पुरुषाणां निदाघमपाकुर्वन्ति।[vi]

एवञ्च अस्मिन्नेव सर्गे अस्मिञ्छ्लोके नायको वक्ति स्वप्रियतमां यत् रमणीनां चन्दनेनानुलेपिताः हिमवत् गौरवर्णाः वक्षोजाः सुवर्णरसनया मण्डिताः नितम्बभागाश्चावलोकनमात्रेणैव कामिनां हृदयेषु कामाग्निं संवर्द्धयन्ति।[vii]

अपि च अस्मिन्नेव सर्गे श्लोकेस्मिन् कविकल्पितो नायकः स्वप्रेयसीं प्रति तेषां वस्तूनामुल्लेखं करोति यानि वस्तूनि ग्रीष्मर्तौ कामावेगविजृम्भकाणि भवन्ति। स वक्ति यत् साम्प्रतम् चन्दनमिश्रितजलेनार्द्रीकृतानां व्यजनानां वायुभिः हारमण्डितकुचमण्डलसमर्पणैः वीणा मधुरध्वनेः मिश्रणेन मसृणसंगीतकध्वनिभिः ग्रीष्मर्तौ सुप्तोऽपि कामभावः विबोध्यते इव।[viii]

महाकविकालिदासः अत्र चन्दनस्य वैशिष्ट्यकारणात् विविधाख्यानमाध्यमेन् निरूपणं करोति। किन्तु अस्माकं कृते चन्दनस्य कानि कानि वैज्ञानिकरहस्यानि प्रयोजनानि च सन्ति इति प्रतिपादयामि।

आयुर्वेदात्मकं विवेचचम् –

आयुर्वेदशास्त्रे चन्दनस्य गुणानुप्रयोगविषये विविधाचार्यैः एवं प्रतिपादितं हि -

चन्दनं कटुतिक्तं च स्वादे किञ्चित् कषायवत्। मुखरूग्राशनं वृष्यं शीतलं कान्तिवर्द्धनम्।।
कामवृद्धिकरं लेपे रूक्षं सौरभ्यदं लघु। शीर्षरोगं श्रमश्लेष्मविषदाहास्रनाशनम्।।
स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम्। ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते।
बिना मलयमन्यत्र चन्दनं न प्ररोहति।।[ix]
चन्दनं शीतलं रूक्षं तिक्तमाह्लादन लघु। श्रम शोषविष श्लेष्म तृष्णापित्तास्रदाहनुत्।।[x]
दाहपित्तज्वरच्छर्दिमोह तृष्णा विनाशनः। रक्त रूड मूत्र कृच्छ्रनः कासांश्चैव विनाशयेत्।।[xi]

धन्वन्तरिणा निघण्टुग्रन्थे चन्दनस्य सप्तप्रजातीनां गुणाः एवम् ऊचुः -

1. श्वेतचन्दनम् - **चन्दनं शीतलं स्वादु तिक्तं पित्तविनाशनम्** । 2. रक्तचन्दनम् – **रक्तोद्रेकहरं हन्ति पित्तकोपं सुदारुणम् ।** 3. पतंगचंदनम्– **कुचन्दनं तु तिक्तं स्यात् सुगन्धि व्रणरोपणम् ।** 4. पीतचन्दनम् – **कालीयकं पवित्राढयं शीतलं रक्तपित्तजित् ।** 5. बर्बरचन्दनः – **अथ बर्बरिकं श्वेतं निर्गन्धं बर्बरोद्भवम् । पित्तासृक्कफदाहघ्नं कृमिघ्नं गुरू रूक्षणम् ।**

अतः उपर्युक्तं आयुर्वेदविज्ञानात्मकं गुणं मानवसभ्यतायाः हिताय लाभाय च लभ्यते। अनेन प्रकाश्नरेण चन्दनवनस्पतीनां समसामयिकेऽपि प्रयत्नेन संरक्षणेन संवर्धनेन च प्रकृतिपर्यावरणस्य परिपालनेन सहैव समेषां कृते औषधनिर्माणकार्यार्थेऽपि सुलभैव सर्वत्र लब्धं भविष्यति।

2. मुस्तकम्

संस्कृतभाषायां नामानि –

मुस्तकं, मुस्तं, वारिदनामकं, कुरुविन्दं, नागरमुस्तकं, क्रोडकसेरुकं, भद्रमुस्तकं, गुन्द्रा इति।[xii]

वनस्पतिपरिचयः –

भारते सर्वत्र बहुलतायाः व्यवहारो भवति। मुस्तकस्य प्रकारद्वयं प्राप्यतेसामान्यक्षेत्रेषु मुस्तकरूपेण भवति एवञ्च पर्वतीयक्षेत्रेषु नागरमुस्तकरूपेण भवति। प्रायः वर्षर्तुः अस्योद्गमकालः वर्तते। अयं तृणजातीयो वनस्पतिः अस्ति। अस्य आकारः एकहस्तात् त्रिहस्तपरिमितं लम्बायमानो दृश्यते। पत्राणि उपरितनेषु बीतस्तिमात्रं लम्बानि अर्धाङ्गुलविस्तृतानि भवन्ति एवं पुष्पाणि अपि अत्रैव जायन्ते। फलं लघु आमलकफलसदृशं उत्पद्यते।

काव्यात्मकमध्ययनविवेचनम् –

महाकविना कालिदासेन केवलं मुस्तकवनस्पतीनां वर्णनं ऋतुसंहारकाव्ये वारमेकं कृतम्। तत्रादौ ग्रीष्मऋतुवर्णननामके प्रथमसर्गे मुस्तकस्य प्रसङ्गः लिखितं यत् नायकः स्वनायिकां वक्ति यत् ग्रीष्मातिशयेन वराहयूथोऽप्यत्यन्तमाकुलीमनुभवति। अयं शुष्ककर्दमयुः सरस्सु मुस्ताक्षतिं कर्तुं स्वमुखाग्रभागेन सरः खनन् पातालं प्रविविक्षतीति।[xiii]

वस्तुतः अत्र काव्येऽस्मिन् महाकविना काव्यकथासौन्दर्यनिरूपणे ग्रीष्मर्तोः वैशिष्ट्यप्रतिपादने मुस्तकवनस्पतीनामुल्लेखं करोति, परन्तु मुस्तकवनस्पतीनां वैज्ञानिकोपयोगः मानवानां कृते किमस्तीति विवेचयामि।

आयुर्वेदात्मकं विवेचनम् –

आयुषविज्ञानेषु मुस्तकस्य प्रयोगः विविधव्याधिनिवारणाय क्रियते। भावप्रकाशकारेण उक्तं यथा -

मुस्तकं कटु हिमं ग्राहि तिक्तं दीपनपाचनम्।

कषायं कफपित्तास्रतृड्ज्वरारुचिजन्तुहृत। अनूपदेशे यज्जातं मुस्तकं तत्प्रशस्यते।।[xiv]

अतः आयुर्वेदविज्ञानात्मकमध्ययनेन ज्ञायते यद् अस्माकं कृते मुस्तकः परमोपयोगी वर्तते।

3. कमलम्

संस्कृतभाषायां नामानि –

नलिन, अरविन्द, महोत्पल, सहस्रपत्र, कमल, शतपत्र, कुशेशय, पङ्केरुह, तामरस, सारस, सरसीरुह, बिसप्रसून, राजीव, पुष्कर,अम्भोरुह।[xv]

वनस्पतिपरिचयः -

शास्त्रप्रमाणानुसारं कमलस्य त्रीणि भेदानि सन्ति। रक्तकमल-श्वेतकमल-नीलकमलश्च।तद्यथा- श्वेतकमलस्य कृते पुण्डरीक, रक्तकमलस्य कृते कोकनद, नीलकमलस्य कृते इन्दीवरं इति भेदानुसारं संज्ञा वर्तते।[xvi] एतेषां सर्वेषां भेदानामुपयोगसन्दर्भस्य प्रयोगविज्ञानं आयुर्विज्ञानस्य विवेचनक्रमे करिष्यामि। वस्तुतः कमलम् शीतोष्णप्रदेशेषु प्रायः सर्वत्र सरोवरेषु भवति, अस्य मूलं सरोवरस्थपंके एव प्रसरति। पत्रं द्वादशांगुलतः षडत्रिंशत् अंगुलपरिमितं वृत्ताकारं भवति। पुष्पाणि प्रायः ग्रीष्मवर्षर्तौ च विकसन्ति। स्वल्पकालव्यतीतानन्तरं पुष्पस्य गर्भे बीजानि भवन्ति, तेषामेव हिन्दीभाषायां कमलगट्टा, संस्कृतभाषायां पद्मबीज, मराठीभाषायां कमलकाकडी, गुजरातीभाषायां पावडी इति कथ्यते। अनेन प्रकारेण शास्त्रेषु कमलस्य विविधाः पर्यायाः एवं रूपेण प्राप्यन्ते। यथा - कमलम्, नवपत्रं, संवर्तिका, कर्णिका, किञ्जल्कम्, मृडालम्, स्थलकमलम्, कुमुदम्, कुमुदिनी, कल्हारम् इति एतेषां प्रयोगविज्ञानं आयुर्वेदविज्ञानधिया भिन्ना-भिन्ना वर्तन्ते।

काव्यात्मकमध्ययनविवेचनम् -

अथ च ऋतुसंहारकाव्यस्य ग्रीष्मऋतुवर्णननामके प्रथमसर्गे तत्रादौ श्लोकेऽस्मिन् कमलनालस्य वर्णनं वर्तते। अत्र कविनिबद्धो वक्ता नायकः स्वप्रियतमां ग्रीष्मकाले, गजसमूहेन सरसः क्रियमाणां दुर्दशां दर्शयन् वक्ति यत् अत्र सरसि परस्परं पीडयन्तैः गजैः सरसः सम्पूर्णमृणालदण्डमुत्खातितम्, एतेषामुत्पातेन जलस्था मीनाः विपन्नाः संजाताः, सरसि विद्यमानाः निखिला सारसपंक्तिश्चोत्पातिता वर्त्तते। इत्थं गजानामुपद्रवेण कासारस्य सम्पूर्णा श्रीरेव विनष्टप्राया वर्त्तते। सम्पूर्णः कासार एव कर्दममयः संजातः।[xvii]

अस्मिन्नेव सर्गे अनेन श्लोकेन साकं कविनिवद्धो वक्ता नायकः स्वप्रियतमां प्रति ग्रीष्मर्तोः वर्णनस्योपसंहारं करोति। बहुषु श्लोकेषु वनेषु प्रसृमरस्य दावाग्नेः विनाशलीलायाः वर्णनं कृत्वाऽन्ते सः ग्रीष्मकाले यानि वस्तूनि सुखकराणि भवन्ति तेषां वर्णनं करोति। स वक्ति यत् साम्प्रतं पाटलपुष्पाणि विकसितानि सन्ति मधुरा-मोदभराणि, कमलान्यपि पुष्करिणीषु सन्ति विकसितानि, अतएव त्वम् चन्द्रहारेणाञ्चितसौभाग्यसम्पन्नविलासिनीभिः साकं सुललितानि गीतानि गायन्ती सती क्षपाः क्षपयस्व।[xviii]

महाकविना काव्येऽस्मिन् काव्यकथान्तर्गते काव्यसौन्दर्याय विविधप्रसङ्गेषु कमलस्य विवेचनं क्रियते, परन्तु चराचरजीवानां कृते कमलस्य कानि कानि आयुर्वेदात्मकानि तथ्यानि तत्त्वानि रहस्यानि प्रयोगाश्च सन्तीति सविस्तरं विचारयामि।

आयुर्वेदात्मकं विवेचनम् –

आयुषशास्त्रे कमलस्य विविधप्रजातीनां तथा च एतस्य अवयवानां गुणानुप्रयोगविषये विस्तारेण वर्णनं लभ्यते। तत्रादौ कमलस्य गुणाः निरूप्यन्ते। यथा -

कमलं शीतलं वयं मधुरं कफपित्तजित्। तृष्णादाहालविस्फोटविषवीसर्पनाशनम् ॥[xix]

अथ नामोल्लेखपूर्वकं कमलभेदाँस्तद्गुणाँश्चाह -

विशेषतः सितं पनं पुण्डरीकमिति स्मृतम्। रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥४

धवलं कमलं शीतं मधुरं कफपित्तजित्। तस्मादल्पगुणं किञ्चिदन्यतोत्पलादिकम् ॥[xx]

अनेन प्रकारेण पद्मिनी। तस्या लक्षणनामगुणानाह –

मूलनालदलोत्फुल्लफलैः समुदिता पुनः। पद्मिनी प्रोच्यते प्राबिसिन्यादि च सा स्मृता।।

आदिशब्दावलिनी कमलिनीत्यादि ॥

पद्मिनी शीतला गुर्वी मधुरा लवणा च सा। पित्तामुक्कफजुद्रूक्षा वातविष्टम्भकारिणी।।[xxi]

अथ नवपत्रादि। तस्य नामान्याह –

संवत्तिका नवदलं बीजकोशस्तु कर्णिका। किञ्जल्कः केशरः प्रोक्तो मकरन्दो रसः स्मृतः।

पद्मनालं मृणालं स्यात्तथा बिसमिति स्मृतम् ॥

संवर्तिका हिमा तिक्ता कषाया दाहतृटप्रणुत्। मूत्रकृच्छ्रगुदव्याधिरक्तपित्तविनाशिनी ॥[xxii]

अथ कर्णिका (बीजकोशः)। तस्या गुणानाह –

अस्य कर्णिका तिक्ता कषाया मधुरा हिमा। मुखवैशद्यकुल्लध्वी तृष्णाऽत्रकफपित्तनुत् ॥[xxiii]

अथ किञ्जल्कः (कमलकेशरः)। तस्य गुणानाह –

किल्कः शीतलो वृष्यः कषायो ग्राहकोऽपिसः। कफपित्ततृषादाहरक्ताशेविषशोथजित् ॥[xxiv]..

अथ मृणालं शालूकञ्च। तयोर्गुणानाह –

मृणालं शीतलं वृष्यं पित्तदाहाजिद् गुरु ॥

दुर्जरं स्वादुपाकश्च स्तन्यानिलकफप्रदम्। संग्राहि मधुरं रूक्ष शालूकमपि तद्गुणम् ॥[xxv]

अथ स्थलकमलम्। तस्य नामगुणानाह –

पद्मचारिण्यतिथराऽव्यथा पद्मा च शारदा। पद्माऽनुष्णा कटुस्तिक्ता कषाया कफवातजित्।

मूत्रकृच्छ्राश्मशूलघ्नो श्वासकासविषापहा ॥[xxvi]

चतुर्धा स्थलपमानि सेवन्ती गुलदावदी। नैपाली च गुलाबश्च बकुला कदम्बकः ॥ १ ॥

अथ कुमुदम् " कमोदनी " इति लोके। तस्य नामानि गुणांचाह-

श्वेतं कुवलयं प्रोक्तं कुमुदं करवं तथा। कुमुदं पिच्छिलं स्निग्धं मधुरं हलादि शीतलम् ॥[xxvii]

अथ कुमुदिनी। तस्या नामगुणांश्चाह –

कुमुदती कैरविका तथा कुमुदिनीति च ॥सा तु मूलादिसर्वाङ्गरुक्ता समुदिता बुधैः।

पग्रिन्या ये गुणाः प्रोक्ताः कुमुदिन्याश्च ते स्मृताः॥[xxviii]

अथ कल्हारम्। तन्नामगुणानाह –

सौगन्धिकं तु कल्हारं हलकं रक्तसन्ध्यकम्। कल्हारं शीतलं ग्राहि विष्टम्भि गुरु रूक्षणम् ॥[xxix]

अत्र प्रतिपादितानि उपर्युक्तानि आयुर्वेदवैज्ञानिकाः सर्वे प्रयोगाः मनुष्याणां व्याधिशमनाय हिताय सुखाय च वर्तन्ते। अतः कमलवनस्पतीनां सर्वासां प्रजातीनां संरक्षणं सर्वविधप्रयत्नेन करणीयम्।

4. कुसुम्भम्

संस्कृतभाषायां नामानि –

कुसुम्भं, वह्निशिखं, वस्त्ररञ्जकम्, कुसुम्भं इति।[xxx]

वनस्पतिपरिचयः -

कुसुम्भलता भारते प्रायः सर्वत्र समुपलभ्यते। इयं लता एकतः त्रीफीटपरिमाणपरिमितं उच्चैः भवति। पत्राणि लम्बानि, परितः अखण्डितानि तिक्ष्णाग्रवर्तीनि एवं कंटकयुतानि भवन्ति। पुष्पाणि कषायवर्णकानि वृत्ताकारगुच्छेषु आयान्ति। फलं चतुष्कोणीयं भवति। बीजानि श्वेतचिक्कणानि एवं शंखाकृतिवत् भवन्ति। अस्य कृषेः आधारितानि भेदानि अनेकानि प्रभेदानि संजायते तथापि एषां वर्गीकरणं वर्गद्वयेषु कर्तुं शक्यते। एकः कंटकयुतः भवति अपरश्च अंकटकः भवति। कंटकयुतस्यापेक्षया अकंटकस्य पुष्पात् बहूत्तमः वर्णः निःसरति। कंटकयुता लता तैलदृष्ट्या सर्वोत्तमा वर्तते। अस्य पुष्पाणि केसरसदृशानि दृश्यन्ते तथा वणिगजनाः केसरेषु अस्य मिश्रणमपि कुर्वन्ति। सर्वोत्तमकिंजल्कः सुगंधितः एकरंगकः भवन्ति, किन्तु कुसुम्भकेसरस्य तन्तुः गन्धरहितः तथा छायायुक्तः भवति। अस्य पंचांगस्य (बीज-तैल-पुष्प-पत्र-मूलञ्च) चिकित्सा व्यवहारेषु उपयुज्यन्ते।

काव्यात्मकमध्ययनविवेचनम् –

कविकुलगुरुकालिदासः कुसुम्भवनस्पतीनां वर्णनं केवलं ऋतुसंहारकाव्ये स्थलद्वये प्रथमे सर्गे षष्ठसर्गे च निरूपयति। तत्रादौ प्रथमसर्गे अस्मिञ्छ्लोके कविनिबद्धो नायकः स्वप्रियतमायाः समक्षं ग्रीष्मर्तौ वने प्रदीप्तस्याग्नेः भीषणतायाः वर्णनं कुर्वन् वक्ति यत् विकसितकुसुम्भ सदृशा

दावाग्निशिखा रक्त-वर्णा वायोः साहाय्यमवाप्याति उद्दीप्ता भवति। सा पुष्पितवनवृक्षशिखां चुम्बितुमिव अत्युन्नता भवतीति प्रतीयते। तेन सर्वत्र धरित्री वनप्रान्तस्य भवति परिदग्धा।[xxxi]

महाकविना काव्येऽस्मिन् कुसुम्भवनस्पतीनां सन्दर्भवशात् तदगुणमभिलक्ष्य वर्णनं विहितम्,परन्तु कुसुम्भवनस्पतीनां मध्ये के के रहस्यात्मकाः आयुर्वेदवैज्ञानिकाः गुणाः वैशिष्ट्याश्च वर्तन्ते तानि विचारयामि।

आयुर्वेदात्मकं विवेचचम्–

औषधशास्त्रेषु कुसुम्भस्य अनेकानि प्रयोगधर्माणि वर्णितनि सन्ति। यथा भावप्रकाशकारैः निरूपितं हि - **कुसुम्भं वातलं कृच्छ्ररक्तपित्तकफापहम् ॥**[xxxii]

एतदतिरिक्तं शास्त्रेषु राज्ञाम् अहर्निशस्वास्थ्यलाभाय कृतेअस्य तैलस्य मर्दनप्रयोगः लभ्यते। यथा -

अथ कौसुम्भतैलेन वर्षाभूरजसाऽपि वा। लिप्तपादः पुमान् रेतो न जहाति रतेऽद्भुतम्।।[xxxiii]

अनेन प्रकारेण कुसुम्भस्यगुणानामायुर्वेदविज्ञानात्मकमध्ययनेन कथयितुं शक्यते यत् अस्माकं सृष्टौ प्रकृतिप्रदत्तः अयं वनस्पतिः वर्तते। अस्माकं सर्वेषां एतेषी संरक्षणं संवर्धनं च निजदायित्वं अस्ति। अतः प्रयत्नेनैतत् संरक्षणीयम्।

5. कीचकः

संस्कृतभाषायां नामानि –

वंशः, त्वकसारः, कर्मारः, त्वचिसारः, तृणध्वजः, शतपर्वा, यवफलं, वेणु, मस्करः, तेजनः इति।[xxxiv]

वनस्पतिपरिचयः -

वनस्पतिविज्ञानदृष्ट्या अयम् उष्णप्रदेशेषु सर्वत्रसुलभरूपेण लभ्यते। विशेषतः उत्कल-बिहार-उत्तरप्रदेश-आसाम-बङ्गादि एवं हिमालयस्य परिवर्तिक्षेत्रेषु प्राप्तं भवति। प्रायः त्रिंशत्वत्वारिंशत्फीटपरिमाणपरिमितमारभ्यशतफीटपरिमाणं यावतं दीर्घं एवं पञ्चतः सप्ताङ्गुलपरिमितं स्थूलं भवति, अस्य पत्रं सार्धमेकाङ्गुलविस्तृतं तथा पञ्च-षष्ठाङ्गुलपरिमितं लम्बं भवति। अथ च केषुचिद् वंशेषु जीर्णानन्तरं एवं कानिचिद् जीर्णात् पूर्वं पुष्पाणि फलानि च समागच्छति, एवं अस्य गर्भे वंशलोचनमपि प्राप्यते यस्य आयुर्वेदविज्ञानात्मक उपयोगः शास्त्रेषु वर्णितो वर्तते। महाकविनापि वंशस्य हिमालयपर्वतस्य वर्णनक्रमे अस्य उल्लेखः कृतो वर्तते।

काव्यात्मकमध्ययनविवेचनम् -

अथ च ऋतुसंहारकाव्ये ग्रीष्मर्तोः वर्णननामके प्रथमसर्गे कीचकस्य प्रसङ्गे लिखितं हि नायकः कथयति स्वप्रियतमायाः सविधे ग्रीष्मर्तोः समृद्धस्य दावाग्नेः विनाशलीलायाः, तस्य सर्वजीवसन्तापकत्वं सर्वत्र प्रसृमरत्वं कारणेन शुष्कवंशस्थलीषु पटुनिनादैः च वर्णयति।[xxxv]

कविना काव्येऽस्मिन् कीचकवनस्पतीनां वर्णनं काव्यकथाप्रसङ्गात् निरूप्यते। किन्तु कीचकवनस्पतीनां अस्माकं जीवनस्य कृते का उपयोगः तथा का च आयुर्वेदता वर्तते इति विवेच्यते।

आयुर्वेदात्मकं विवेचनम्–

कीचकस्य औषधीयमुपयोग इत्थं प्राप्यते। यथा -

वंशोम्लः तुवरस्तिक्तः शीतल सारको मतः। वस्तिशुद्धिकरः स्वादुश्छेदनो भेदको मतः।।

कफं रक्त रूजं पित्तं, कुष्ठं शोथं व्रणं तथा। मूत्रकृच्छ्र प्रमेहार्शान् हान्ति चैव विनाशयेत्।।[xxxvi]

अथ च विषयेऽस्मिन् भावप्रकाशकारेणापि उक्तं वर्तते। यथा -

वंशः सरो हिमः स्वादुः कषायो बस्तिशोधनः। छेदनः कफपित्तघ्नः कुष्ठास्रव्रणशोथजित्।।[xxxvii]

अनेन प्रकारेण वंशस्य करीरयवयोर्गुणं प्रतिपादितं वर्तते। यथा -

तत्करीरः कटुः पाके रसे रूक्षे गुरुः सरः। कषायः कफकृत्स्वादुर्विदाही वातपित्तलः।।

तद्यवास्तु सरा रूक्षाः कषायाः कटुपाकिनः। वातपित्तकरा उष्णा बद्धमूत्राः कफापहाः।।[xxxviii]

कीचकस्य उपरोक्तम् आयुर्वेदविज्ञानात्मकं गुणानामध्ययनेन अस्माभिः ज्ञायते यत् कीचकस्य औषधनिर्माणदृष्ट्या उतवा पर्यावरणदृष्टया संरक्षणं नितान्तमावश्यकमस्ति।

6. शाल्मलिः

संस्कृतभाषायां नामानि –

कुत्सितशाल्मलिः, रोचनः, कूटशाल्मलिः,[xxxix] शाल्मलि, मोचा, पिच्छिला, पूरणी, रक्तपुष्पा, स्थिरायुः, कण्टकाढ्या, तूलिनी इति।[xl]

वनस्पतिपरिचयः -

शाल्मलिः वृक्षः भारतस्य पश्चिमदक्षिणारण्येषु एवं उष्णप्रदेशेषु लभ्यते। अयं वृक्षः पञ्चाशत्फीटपरिमाणतः शतफीटपरिमाणपरिमितं लम्बं भवति। वृक्षस्य शाखा परितः परितः विस्तृता भवति। पुरातनशाखा कण्टकरहिता भवति एवं नूतनशाखासु लघु-लघु कण्टकानि जायन्ते। पत्राणि पञ्चाङ्गुलमितलम्बायमानानिचतुरङ्गुलमितविस्तृतानि च भवन्ति। पुष्पाणि अल्पश्वेतानि अधिकाधिकानि रक्तवर्णकानि चतुरङ्गुलपरिमितंदीर्घाणि द्विरङ्गुलपरिमितंव्यासाकाराणि भवन्ति यस्याभ्यन्तरे प्रकाशयुतः कार्पास (रूई) मध्ये कृष्णवर्णकानि बीजानि तिष्ठन्ति। शाल्मलिवृक्षात् रक्तवर्णकः अपारदर्शीनिर्यासः अपि प्राप्यते यः दक्षिणभारतेषु हत्तिमाननामकः निर्यासः कथ्यते।

काव्यात्मकमध्ययनविवेचनम् –

कविकुलगुरुः महाकविकालिदासः शाल्मलीवनस्पतीनामुल्लेखः ऋतुसंहारकाव्येषु सकृदेव वर्णयति। तत्रादौ ग्रीष्मऋतुवर्णननामके प्रथमसर्गे महाकविः कालिदासः वनाग्नेः विशदं वर्णनं प्रस्तौति। कविनिबद्धो वक्ता नायकः स्वप्रियतमां वक्ति यत् साम्प्रतं ग्रीष्मर्तौ शाल्मलीनां वनेषु तु अग्निरयमतीव समृद्धिं गतो वर्त्तते।[xli]

काव्येऽस्मिन् काव्यकथासौन्दर्यनिरूपणप्रसङ्गे ग्रीष्मर्तोः वैशिष्ट्यप्रतिपादने च शाल्मलीवनस्पतीनामुल्लेखो वर्तते, परन्तु शाल्लमलीवनस्पतीनां आयुर्वेदवैज्ञानिकं वैशिष्ट्यं लोकस्य कृते किमस्तीति विचार्यते।

आयुर्वेदात्मकं विवेचनम् –

अथ शाल्मलिः तस्य गुणश्चाह -

शाल्मली शीतला स्वाद्वी रसे पाके रसायनी। श्लेष्मला पित्तवातास्रहारिणी रक्तपित्तजित् ॥[xlii]

अथ कूटशाल्मलिः तस्य गुणश्चाह-

कूटशाल्मलिकस्तिक्तः कटुकः कफवातनुत् ॥

भेद्युष्णः प्लीहजठरयकृद्गुल्मविषापहः।भूतानाहविबन्धास्रमेदः शूलकफापहः ॥[xliii]

अथ मोचरसः (निर्यासः) तस्य गुणश्चाह -

निर्यासः शाल्मलेः पिच्छा शाल्मलीवेष्टकोऽपि च।मोचास्त्रावोमोचरसो मोचनिर्यास इत्यपि ॥

मोचास्रवो हिमो ग्राही स्निग्धो वृष्यः कषायकः। प्रवाहिकाऽतिसारामकफपित्तास्रदाहनुत् ॥[xliv]

अनया धिया शाल्मलिः वनस्पतीनां एतावता आयुर्वेदविज्ञानात्मकं विवेचनेन गुणाः औषधशास्त्रेषु प्राप्यन्ते। अतः शाल्मलिवृक्षस्य साम्प्रतिकेऽपि प्रयत्नेन संरक्षणं संवर्धनं च भवेदिति।

उपसंहारः -

सम्प्रति ऋतुसंहारकाव्यस्य प्रथमसर्गे चन्दनं, मुस्तकं, कमलं, कुसुम्भं, कीचकः, शाल्मलिः, आदि षट् वनस्पतयः पूर्णरूपेण आयुर्वेददृष्टया उपयोगिनः सन्ति । अत्र प्रतिपादितानां वनस्पतीनां परिचयाणामध्ययनेन समसामयिके अस्य स्वरूपं स्थानञ्च ज्ञातुं शक्यते। अत्र प्रतिपादितानां वनस्पतीनां रसायनविज्ञानादृष्ट्या प्रतीयते यत् अत्र विद्यमानेन रसायनेन समसामयिकाऽसाध्यरोगनिवारणाय एलोपैथिक औषधनिर्माणं क्रियते । अत्र प्रतिपादितानां वनस्पतीनां आयुर्वेदविज्ञानात्मकं विवेचनेन प्रतीयते यत् समसामयिकेऽपि गृहे सुलभतयैव औषधं निर्माय सेवनं कर्तुं शक्यते। एवं धर्मविज्ञानादृष्टया कथयितुं शक्यते यत् अस्माकं जीवनं वनस्पतिं विना नैव प्रचलिष्यति। यज्ञे समिधारूपेण प्रयुज्यवृष्टिरन्नादि प्राप्तिः भवति। ऋतुसंहारकाव्यस्य प्रथमसर्गस्थं समागतं सम्पूर्णं वनस्पतिजातं प्रायः भारते सर्वत्र क्षेत्रगतभाषाप्रभेदेन लभ्यते।

अतः अत्र वर्णिताः वनस्पतयः भारतीया दृश्यन्ते।अत्रोद्धृते श्लोके शृङ्गारादिरसानां यथोचितं निर्वाहोऽस्ति। खण्डकाव्येऽस्मिन् कथावस्तु - कथोपकथनं पात्रचयनञ्च यथायोग्यं दृश्यते। अत्र वनस्पतीनां चित्रणं नैसर्गिकमस्ति। ऋतुसंहारकाव्यस्य प्रथमसर्गस्य श्लोके सर्वत्र पदानां समन्वयं कमनीयञ्चास्ति।

काव्यात्मकमध्ययनविवेचनेन श्लोके दृश्यते यत् प्रसादगुणस्य प्राधान्यम्, माधुर्योजगुणाभ्यां सह तस्य यथोचितं निर्वाहोऽस्ति।एवं वनस्पतीनां निरूपणे उपमादिकाव्यालङ्काराणां सावसरप्रयोगः वर्तते।

इत्थं निष्कर्षरूपेण वक्तुं समर्थोऽस्मि यत् **"ऋतुसंहारकाव्ये प्रथमसर्गे प्रतिपादितानां वनस्पतीनां आयुर्वेददृष्टया विवेचननम्"** विषयः सफलतामधिगच्छतीत्याशासे।

सन्दर्भसूची -

[i] ऋतुसंहारम् - 6.35
[ii] चन्दनं गन्धसारं व महार्हः श्वतेचन्दनम्।
भद्रश्रियं श्रीखण्डं मलयजं गोशीर्ष तिलपर्णकम्।। ध.नि.- पृ.122
श्रीखण्डं चन्दनं नम्री भद्रः श्रीस्तैलपर्णिकः।
गन्धसारी मलयजस्तथा चन्द्रातिश्च स।। बृ.नि.र.-पृ.94
[iii] बृ.नि.र.- पृ.98
[iv] शा.नि. कर्पूरादिवर्गः – पृ.18
[v] ऋतुसंहारम् – 1.2
[vi] ऋतुसंहारम् – 1.4
[vii] ऋतुसंहारम् – 1.6
[viii] ऋतुसंहारम् – 1.8
[ix] यज्ञमदुसूदनम् यज्ञविटपाध्यायः -पृ.14
[x] बृ.नि.र.- पृ. 94
[xi] शा.नि. कर्पूरादिवर्गः – पृ.17
[xii] मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकम्।
कुरुविन्दश्च संख्यातोऽपरः क्रोडकसेरुकः।।
भद्रमुस्ततञ्च गुन्द्रा च तथा नागरमुस्तकः। भा.प्र.नि.वटादिवर्गः- पृ.243
[xiii] ऋतुसंहारम् – 1.17
[xiv] भा.प्र.नि. वटादिवर्गः - पृ.243
[xv] वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम्। सहस्रपत्रं कमलं शतपत्रं कुशेशयम्।
पङ्केरुहं तामरसं सारसं सरसीरुहम्। बिसप्रसूनराजीवपुष्करााम्भोरुहाणि च।। भा.प्र.नि. पुष्पवर्गः-श्लो.1-2,
[xvi] विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम्।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम्।। भा.प्र.नि.पुष्पादिवर्गः – श्लो.4,
[xvii] ऋतुसंहारम् – 1.19
[xviii] ऋतुसंहारम् – 1.28
[xix] भा.प्र.नि. पुष्पवर्ग- श्लो. 3,
[xx] भा.प्र.नि. पुष्पवर्ग- श्लो. 4 - 5,
[xxi] भा.प्र.नि. पुष्पवर्ग- श्लो. 6 -7,
[xxii] भा.प्र.नि. पुष्पवर्ग- श्लो. 8 -9,
[xxiii] भा.प्र.नि. पुष्पवर्ग- श्लो. 10,
[xxiv] भा.प्र.नि. पुष्पवर्गः - श्लो. 11,
[xxv] भा.प्र.नि. पुष्पवर्गः - श्लो. 12-13,
[xxvi] भा.प्र.नि. पुष्पवर्गः - श्लो. 14,
[xxvii] भा.प्र.नि. पुष्पवर्गः - श्लो. 15,
[xxviii] भा.प्र.नि. पुष्पवर्गः - श्लो. 16-17,
[xxix] भा.प्र.नि. पुष्पवर्गः - श्लो. 18,
[xxx] स्यात्कुसुम्भं वह्निशिखंवस्त्ररञ्जकमित्यपि। भा.प्र.नि. श्लो.-192
[xxxi] ऋतुसंहारम् – 1.24
[xxxii] भा.प्र.नि.- श्लो.192, पृ.112
[xxxiii] Cosmetics & Perfumes in Sanskrit Literature A Study पृ.-277
[xxxiv] वंशस्त्वकसारकर्मारत्वचिसारतृणध्वजाः।
शतपर्वा यवफलो वेणुमस्करतेजनाः।। भा.प्र.नि.गुडूच्यादिवर्गः- श्लो.153,पृ.376
[xxxv] ऋतुसंहारम् – 1.25
[xxxvi] शा.नि. गुडूच्यादिवर्गः – पृ.362
[xxxvii] भा.प्र.नि गुडूच्यादिवर्गः - श्लो.154,
[xxxviii] भा.प्र.नि.गुडूच्यादिवर्गः - श्लो.155-156,
[xxxix] कुत्सितः शाल्मलिः प्रोक्तो रोचनः कूटशाल्मलिः। भा.प्र.नि. वटादिवर्गः- श्लो.58,
[xl] शाल्मलिस्तु भवेन्मोचा पिच्छिला पूरणीति च।
रक्तपुष्पा स्थिरायुश्च कण्टकाढ्या च तूलिनी।। भा.प्र.नि. वटादिवर्गः - श्लो.54,
[xli] ऋतुसंहारम् – 1.26
[xlii] भा.प्र.नि. वटादिवर्गः - श्लो. 55, पृ. 537
[xliii] भा.प्र.नि. वटादिवर्गः - श्लो. 58-59, पृ. 537
[xliv] भा.प्र.नि. वटादिवर्गः - श्लो.56-57, पृ.537

****

14. वास्तुशास्त्रे गृहनिर्माणसम्बद्धवनस्पतीनामुपयोग विमर्शः

अनुरागः
शोधार्थी (ज्योतिष-विभाग)
केन्द्रीय संस्कृत विश्वविद्यालयः
वेदव्यासपरिसर, बलाहरः ।

प्रस्तावना-

मानवजीवने वेदानां महत्वपूर्णं स्थानमस्ति । वेदाः षडङ्गेषु विभज्यन्ते। शिक्षा, कल्प, व्याकरणं, निरुक्तः, छन्दः, ज्योतिषं षड्वेदाङ्गानि सन्ति । ज्योतिषशास्त्रं वेदस्य चक्षुः इति मन्यते। ज्योतिषशास्त्रे सिद्धांत-संहिता-होराश्च त्रयः स्कन्धाः सन्ति। सिद्धांतस्कन्धे गणितीयसिद्धांतानां सोपपत्तिकं विवेचनं भवति। तदाधारेण होरास्कन्धे मानवजीवने घटितघटनानां व्यष्टिःरुपेण विचारः क्रियते। ज्योतिषशास्त्रस्य संहितास्कन्धे वनस्पतिविज्ञानं, वृष्टिविज्ञानं, मुहुर्तविज्ञानं, वास्तुविज्ञानादिविषयाणां विस्तृतविवेचनं प्राप्यते। उपरोक्तचर्चामाध्यमेन वक्तुं शक्नोमियत् ज्योतिषशास्त्रस्य क्षेत्रं बहुव्यापकः वर्तते । ज्योतिषस्य विविधविषयेषु वर्तमानकाले लोकव्यावहारिकः प्रसिद्धश्च वर्तते वास्तुशास्त्रम् । वास्तुशास्त्रे गृहनिर्माणसम्बद्धवनस्पतीनामुपयोगित्वविमर्शः अस्मिन् विषये वर्णनमस्ति। गृहनिर्माणे विभिन्नवस्तूनामूपयोगः भवति यथा- मृदा, बालुका, काष्ठः इत्यादि। तस्मिन्नेव गृहनिर्माणे कः काष्ठः उपयोगी भवति। गृहसमीपे कः वृक्षः रोपणीयः? अयमपि शोधस्य प्रमुखविन्दुः अस्ति। अस्मिन् विषये विभिन्नदैवज्ञानां मतमस्ति। वर्तमानकाले अस्माकं समक्षे पर्यावरणप्रदूषणस्य महती समस्या वर्तते । सम्पूर्णं पर्यावरणं प्रदूषितं जातम् । वायुप्रदूषणं प्राणीनां श्वासरप्रवासनेन रोगग्रस्तं करोति । येन प्राणिनः नाना-व्याधिमि हृदयरोगग्रस्ताः भवन्ति । अस्मात्कारणादेवबहवो मनुष्याः शुध्दवायोरभावे प्राणान् त्यज्यन्ति। वायुः अस्माकं जीवनम्।

सह जनाः प्राचीनकाले अस्माकं देशे पर्यावरणशुद्धतायै वनोपवनानां, वृक्षगुल्मलतादीनाम् रोपणं कुर्वन्ति स्म । वृक्षारोपणं न केवलं प्रदूषणं शमनं करोति अपितु प्राणवायुमपि ददाति, जलस्रोतांसि रक्षति । यथा वायुः अस्मभ्यं सुखशान्तिसम्पन्नतारोग्यता ददाति । अत एव वृक्षारोपणमवश्यमेव कर्तव्यम् । यथोक्तम् ऋग्वेदे-

वनस्पतिं वनं आस्थापयध्वं निषूदधिध्वम् अखनन्त उत्सम् ।[1]

वृक्ष- लता – गुल्मादीनां छायां बिना जलाशयाः वापीकूपतडागादि न शोभन्ते । अतएव जलाशयसमीपे वृक्षारोपणं करणीयम् ।

प्रान्तच्छायाविनिर्मुक्ता न मनोज्ञा जलाशयाः ।
यस्मादतो जलप्रान्तेष्वारामान् विनिवेशयेत् ।।[2]

सर्ववृक्षाणां रोपणार्थं मधुरा भूमि शुभदा । अतस्तस्यां भूमौ प्रथमं तिलान् वपेत् । तांस्तिलान् सञ्जात्कुसुमान् तत्रैव मर्दयेत् । एतद् भूमेः प्रथमं कार्यम् । उक्तं च

मृद्वीः भूः सर्ववृक्षाणां हिता तस्यां तिलान् वपेत् ।
पुष्पितांश्च मृद्नीयात् कर्मैतत् प्रथमं भुवः ।।[3]

गृहनिर्माणे गृहस्यसमीपे वा प्रशस्तऔषधियुता, द्रुमलतायुतः मधुरगन्धयुतः, शोभनः, स्निग्धा, सस्नेहा भूधरा प्रयोगं कुर्वन्ति या भूधरा प्राणिनां सदैव श्रियं ददाति ।[4]

गृहसमीपं के के वृक्षाः रोपणीयाः? अत्रोच्यते निम्बाशोकनागकेशरशिरीषप्रियङ्गवः एते वृक्षाः गृहस्य समीपे उद्याने उपवने वा प्रथमतो रोपणीयाः यतो हि एते माङ्गलिकवृक्षाः कथ्यन्ते ।[5]

बृहत्संहितायाम् वास्तुविद्याध्याये एवमेव उक्तम्- दक्षिणे प्लक्षः प्रतीच्ये वटवृक्षः उदीच्ये उदुम्बरः, प्राच्ये पिप्पलः अशुभं अर्थात् उदीच्ये प्लक्षः, प्राच्ये वटवृक्षः, याम्ये उदुम्बरः, प्रतीच्ये पिप्पलश्च शुभं भवति।[6] कण्टकिवृक्षाः खदिर, इत्यादयः गृहसमीपे यदा रोप्यते तदा शत्रुभयः भवति।

दुग्धयुक्तवृक्षाः गृहस्य समीपे रोप्यते तदा धननाशेम भवति । फलयुक्तवृक्षाः गृहस्य समीपे यदा रोप्यते तदा सन्ततिहानिः भवति । येषां वृक्षाणों काष्ठाः गृहे प्रयोगः अशुभो भवति । यदि कण्टकवृक्षान् छिन्द्यात् तेषां मध्ये अन्यान् पूजितान् वृक्षान् वपेत् यथा – पुन्नागाः. अशोकाः, पनसाः शमीशालौ तर्हि एतेषां दोषा न बाधन्ते ।[7]

---

[1] ऋग्वेद सांहिता 6.48.17
[2] बृहत्संहिता,वृक्षायुर्वेदाध्यायः,श्लोकसंख्या 1
[3] बृहत्संहिता,वृक्षायुर्वेदाध्यायः,श्लोक संक्या 2
[4] बृहत्संहिता, वास्तुविद्याध्यायः श्लेकसंख्या 86
[5] बृहद्वास्तुमाला वृक्षायुर्वेदाध्यायः श्लोकसंख्या 3
[6] बृहत्संहिता, वास्तु विद्याध्यायः, श्लोकसंख्या 83

वर्णानुसारेण शुभाशुभवृक्षाः कथ्यन्ते- देवदारुचन्दनशमीमधूका एते वृक्षाः ब्राह्मणेभ्यः सर्वेषु कार्येषु शुभं भवन्ति । खदिकवित्वार्जुनशिंशयाः एते वृक्षाः क्षत्रियेभ्यः शुभं भवन्ति । शलतूनीकसरलाः एते वृक्षाः राजगृहे शुभाः भवन्ति । खदिरसिन्धुस्पन्दन एते वृक्षाः वैश्यानां शुभदाः भवन्ति । तिन्दूकार्जुनशाशावैसराम्राः तथान्ये कण्टकाः वृक्षाः दुग्धयुक्तवृक्षाः शूद्राणां कृते शुभदाः भवन्ति ।[8]

देवदारुचन्दनशमीशिंशपाखादिरशालाः एते वृक्षाः सर्वदातिषु शुभं भवति । एकजात्या द्विजात्या त्रिजात्या वृक्षा वा सर्वेषु गृहेषु रोपणीयाः । यतो हि एते शुभदाः भवन्ति । अधिकजात्या वृक्षाः न रोपणीयाः । एकजातिवृक्षस्य यत् काष्ठगृहं तत् सर्वदुःखनियामकं, द्विजातिवृक्षस्यकाष्ठगृहं मध्यमम्, त्रिदातिवृक्षस्य काष्ठगृहमधमम् भवति ।[9]

सदुग्धकण्टका वृक्षाः गृहसमीपे न रोपणीयाः ।चम्पकपाटलकदलीजातीकेतक्यादयः वृक्षाः शुभदा भवन्ति । प्रहरान्तरं कस्य वृक्षस्य छाया गृहोपरि पतति चेत् तत् शुभाय न भवति । ब्रह्ममन्दिरात् पृष्ठतः विष्णुसूर्यशिवमन्दिराणामग्रे देवीमन्दिरं परितश्च गृहं न निर्मायते ।[10] सदुग्धवृक्षाः हानिकराः, सकण्टकाःशत्रुभयदाः फलयुक्ते वृक्षाः सन्ततिनाशकाः भवन्ति । पीतपुष्पयुक्ताः वृक्षाः गृहस्य समीपे अशुभा भवन्ति । एते सर्वे गृहस्य समीपे न रोपणीयाः।[11]

गृहस्य पूर्वबागे वटवृक्षः, दक्षिणभागे उदुम्बरः, प्रतीच्ये पिप्पलस्तथा उदीच्ये प्लक्षः वृक्षाः शुभं भवति । गृहस्य पूर्वस्यां दिशि अश्वत्थवृक्षः अग्निभयं ददाति । दक्षिणस्यां दिशि प्लक्षवृक्षः प्रमादं ददाति । पश्चिमदिशि वटवृक्षः शत्रुद्वारा शस्त्रघातं करोति । उत्तरस्यां दिशि उदुम्बरः व्याधिं करोति । एतद् वृक्षाः यदि गृहस्य समीपे विपरीतदिशि स्थिताः अशुभफलं ददाति ।[12]

विष्णुसंहितायां एवमेव कथितम् –

न्यग्रोधोदुम्बराश्वत्थप्लक्षा पूर्वादयः शुभाः ।

एतेव्यस्ताः समस्ताः वा शस्ता वामास्त्वकामदाः ।।[13]

अपि च – उदगादिषु प्रशस्ताः प्लक्षवटोदुम्बराश्वत्थाः ।[14]

गृहस्य पृष्ठतः श्रीवृक्षबिल्वादयः व्याधिं नाशयति । आमलक, देवदारु, पलाश, अशोक, चन्दन, केशर, खदिर, चम्पक, कदली, नागलता एते सर्वे वृक्षाः सर्वत्र शुभं भवति ।[15]

बृहद्वास्तुमालायामेवमेव उक्तम् - यत् वृक्षोपरि भूतवासः भवत स न रोप्यति । बिल्वः, शमी, अशोकः, मौलसिरी, पुन्नाग वृक्षाः अपि न छेतव्या । द्राक्षालता , चन्दनवृक्षः , पिप्पलीं , दाडिमः गृहस्य समीपे रोपणं शुभं भवति । गृहस्य उत्तरे कपित्थः, पूर्वे वटवृक्षः, दक्षिणे पाटलः, पश्चिमतः पीपलः शुभो भवति ।[16] पुन्नाग, फलदवृक्षः, निम्बः, दाडिमः, अशोकः, जाती, नागकेशरः, केशरः, चन्दनं, वचः, अपराजिता, विल्वः,आम्रः, भृङ्गः, नारिकेलवृक्षाः सर्वत्र शुभदा भवन्ति ।

निष्कर्षः-

वर्तमानकाले वृक्षारोपणं महापुण्यदायकं कार्यं वर्तते। वृक्षारोपणं न केवलं प्रदूषणशमनं करोति अपितु प्राणिनः शुद्धप्राणवायुः ददाति । वृक्षवनस्पतीनां रोपणं वायुप्रदूषणं महती हानिः भवति । यः जनः राजमार्गं, ग्राम्यसमीपे, अन्यमार्गं वा सुन्दरान् मनोहरान् वृक्षान् रोप्यतिकूपांश्चतडागान् निर्माति सः अन्तकाले स्वर्गं गच्छति । वृक्षारोपणेन लतारोपणेनसदा दानं यज्ञतुल्यं फलं प्राप्नोति ।

****

[7] बृहत्संहिता, वास्तु विद्याध्यायः, श्लोकसंख्या 84, 85,
[8] विश्वकर्मप्रकाशः 9. 1-4
[9] विश्वकर्मप्रकाशः 9.7-10
[10] बृहद्वास्तुमाला गृह पशुहृहनिर्माण चरणिविचारः श्लोक संख्या 9 पृष्ठ संख्या 125
[11] बृहद्वास्तुमाला,पशुगृहनिर्माणचरणविचारः, श्लोकसंख्या 10 पृ सं 125
[12] मनुष्यालयचन्द्रिका 1.22- 23
[13] विष्णुसंहिता 12.18
[14] बृहत्संहिता, वास्तुविद्याध्यायः, श्लोकसंख्या 83
[15] मनुष्यालयचन्द्रिका 1.24
[16] बृहद्वास्तुमाला पशुगृहनिर्माणचरणिविचारः श्लोकसंख्या 11 पृष्ठ संख्या 126

15. प्राकृतिकजलसरोवराणामौषधीय महत्त्वम्

सुशान्तकुमारः
शोधच्छात्र (ज्योतिष विभाग)
केन्द्रीयसंस्कृतविश्वविद्यालयः, वेदव्यासपरिसरः, बलाहरः

भूमिका-

क्षितिजलपावक गगन समीरा ।
पञ्चरचित यह अधम शरीरा ।।[1]

पञ्चतत्वैः निर्मितं मानवशरीरं एकमपि तत्वं विना अस्तित्वे नागच्छति । एतेषु पञ्चतत्वेषु जलतत्वमस्ति अन्यतममङ्गम्। जलतत्वं पृथ्व्यां मानवशरीरे च प्रायः अधिकमात्रेषु प्राप्यते। जलोत्पत्तिविषये पौराणिकमतानुसारं कथ्यते यत् सर्वप्रथममाकाशं तदनन्तरं वायु-अग्नि-जल-पृथ्व्यादितत्वानामुत्पत्तिः क्रमेण भवति । एवमाधुनिकभौतिकविज्ञानमतानुसारं जलोत्पत्तेः कारणं हाईड्रोजन + आक्सीजन इत्यनयोः पदार्थयोः मिश्रणं भवति । तत्र पौराणिकमतानुसारं वायुतेजयोः प्रक्रियया जलोत्पत्तिः भवति । यदि वयं वायुमित्युक्ते गैसानां समूहं तथा तेजमित्युक्ते विद्युतं मन्यते चेत् द्वयोः सिद्धान्तयोः किमपि अन्तरं नैव प्राप्यते ।अतएव जलोत्पत्तेः पौराणिकं सिद्धान्तं वैज्ञानिकैः अपि मन्यते ।जलोत्पतिः विषये श्रीमद्भगवतगीतायामपि वर्णनं प्राप्यते यथा-

अन्नाद् भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद् भवन्ति पर्जन्यो यज्ञः कर्मसमुद्भवः ।।[2]

एवञ्च जलावश्यकता विषये यथोक्तं-

धर्मार्थकाममोक्षेषु नाशुद्धस्य गतिर्मता ।
तस्माद्देहो मनश्चितं सर्वयत्नेन शोधयेत् ।।[3]

जलं विना मानवशरीस्य बाह्यशुद्धिः नैव भवितुं शक्यते । जलं प्रकृत्याः अभिन्नं घटकं वर्तते यतोहि प्राणिनां जीवनं पृथ्व्यां जलं विना सम्भवः नास्ति ।मानव शरीरे ७०% प्रतिशतं जलं वर्तते। जलाभावेन प्रायः मानवशरीरे रोगानामुत्पतिः जायते । एवञ्च जलस्य उचितमात्रायाः पानेन रोगात् मुक्तिः प्राप्तुं शक्यते । येन प्रकारेण जलं वृक्षाणां वृद्धौः जीवनपर्यन्तमावश्यकं वर्तते तथैव मानवजीवनस्य निर्वहणेऽपि जलमत्यावश्यकं वर्तते। जलं विना अस्माकं दैनिककार्यकलापः सम्पूर्णतां न प्राप्नोति । यथा भोजननिर्माणं, शारीरिकनिर्माल्यं, वस्त्रप्रक्षालनं, गृहनिर्माल्यार्थञ्च जलस्येवावश्यकता वर्तते। प्रायः मानवस्य सर्वाणि कार्याणि जलेनेव सिद्धयति।

जलप्राप्तेः साधनानि –

धर्म्यं यशस्य च वदाम्यतोऽहं दकार्गलं येन जलोपलब्धिः ।
पुंसां यथाङ्गेषु शिरास्तथैव क्षितावपि प्रोन्नतनिम्नसंस्थाः ।।
एकेन वर्णेन रसेन चाम्भश्च्युतं नभस्तो वसुधाविशेषात् ।
ननारसत्वं बहुवर्णतां च गतं परीक्ष्यं क्षितितुल्यमेव ।।[4]

प्रायः अस्मिन् संसारे पातुं योग्यजलं वृष्टिरूपेण पृथिव्यामागच्छति । तदेव जलं स्थानभेदात् विभिन्नरूपेण अस्माभिः प्राप्यन्ते । अस्मात् कारणादेव जलस्य स्वादेः गुणनतायाश्च वैविध्यं लोके दरीदृश्यते। एतस्मात् कारणात् जीवनरक्षकं जलं प्रकृत्यां त्रिभिधा उपलभ्यते।

१. **वृष्टिजलम्**
२. **भूपृष्ठीयजलम्**
३. **भूमिगतजलम्**

१. **वृष्टिजलम् –** जलप्राप्तेषु साधनेषु वृष्ट्याः जलं वर्तते अन्यतमः। वृष्टिकाले यदा प्रथमं वारं वृष्टिः भवति तदा वायुमण्डलीय रजकणैः युक्तं जलं अशुद्धतां प्राप्नोति। परञ्च यदा वृष्टिः निरन्तरं भवति चेत् वार द्वयं त्रयं वा शुद्धं जलं प्राप्यते । एतत् जलं प्राणिनां कृते शुद्धमुपयोगी च वर्तते।

२. **भूपृष्ठीयजलम्-** भूमेः पृष्ठीयक्षेत्रे यत् जलं प्राप्यते सैव जलं भूपृष्ठीयजलनाम्ना ज्ञायते । यथा नदी, तडागः, निर्झरः प्राकृतिकसरोवरः कृत्रिमसरोवरमित्यादयः रूपेण भूमौ उपलभ्यन्ते।

[1] रामचरितमानस
[2] श्रीमद्भगवद्गीता, तृतीयोध्यायः श्लो, १४
[3] जलविज्ञान, अध्याय १४, पृ.सं. ३०७
[4] बृहत्संहिता दकार्गलाध्यायः श्लो. सं. १-२

३. **भूमिगतजलम्–** जलमेतत् भूमिगर्भे वर्तते । जलमेतत् भूमेः खननं कृत्वा प्राप्यते ।एतत् भूमिगतं जलमन्य प्रकारकैः जलैः प्रायः शुद्धं वर्तते। यतोहि पृथ्वी स्वयमेव भूमिगतजलस्य शोधनं कृत्वा पूर्णरूपेण शुद्धं करोति । जलस्य शुद्धता विषये स्मृतिग्रन्थेष्वऽपि उक्तं यथा –

भूमिं स्पृष्ट्वा गतं तोयं यश्चाप्यन्योऽन्यविप्रुषः ।
भुक्त्वोच्छिष्टं तथा स्नेहं नोच्छिष्टं मनुरब्रवीत् ।।[5]

एतत् विभिन्नैः प्रकारकैः प्राप्तजलसाधनैः प्राकृतिकजलस्त्रोतानां जलं प्रायः औषधीयरूपेण शुद्धं वर्तते तथाऽपि कुत्रचिदेतत् प्रवहनजलमपि शुद्धमशुद्धपदार्थानां संयोगेन कुत्रचित शुद्धं कुत्रचित् अशुद्धं वा भवति। अनेन कारणेन तडाग-कूप-सरोवरादीनां जले शुद्धतायाः परिमापने वैभिन्नता दरीदृश्यते। आचार्यवराहमिहिरस्य जलप्राप्ति विषये मतं वर्तते यत् पृथिव्यां जलं द्विविधं प्राप्यते – कृत्रिमाकृत्रिम रूपेण। यथोक्तं बृहत्संहिताग्रन्थेषु –

सलिलोद्यानयुक्तेषु कृतेष्वकृतकेषु च ।
स्थानेष्वेतेषु सान्निध्यमुपगच्छन्ति देवताः ।।[6]

कृत्रिमजलम्- मानवनिर्मितं जलस्त्रोतं यथा कूपः-बाबडी-तडागःइत्यादयः कृत्रिमजलनाम्ना अभिज्ञायते।तत्रैव नदी-निर्झर-सरोवरादयः अकृत्रिमजलरूपेण ज्ञायते। अकृत्रिमजलमेव प्राकृतिकजलस्त्रोतरूपेणाऽपि ज्ञायते ।

प्रायः पृथिव्यां जलतत्वस्यैव आधिक्यं वर्तते तथाऽपि पेयजलं निरन्तरं ह्रासं प्रति गच्छति। पेयजलस्य ह्रासं दृष्ट्वा आधुनिकवैज्ञानिकाः विभिन्नरसायनप्रयोगेन अशुद्धजलं शुद्धं करोति । येन प्रकारेण प्राप्तजले प्राकृतिकगुणाः अपि नष्टाः भवन्ति। तते जलं शुद्धतां तु याति परञ्च स्वास्थ्यवर्धकं न भवति । यतोहि जलशुद्धतायाः विषये ये पौराणिकमताः सन्ति तेन प्रकारेण मानवः रसायनमुक्तः शुद्धजलं प्राकृतिकगुणैश्च युक्तं प्राप्तुं शक्नुवन्ति। अशुद्धजलस्य पानस्य प्रभावविषये उक्तं यथा-

व्यापन्नं परिहर्त्तव्यं सर्वदोषप्रकोपणम्।
तत् कुर्यात् स्नानपानाभ्यां तृष्णाध्मानोदरज्वरान् ।
कासाग्निमान्द्याभिष्यन्दिकण्डूगण्डादिकांस्तथा।।[7]

अर्थात् अशुद्धजलस्य प्रयोगेन एते विकाराः रोगाः वा जायन्ते। यथा- उदरविकारः-ज्वर-श्वास-कण्डु-चर्मरोगादयः। एवं प्रकारेण प्रयोगात् पूर्वं जलशुद्धिः आवश्यकं वर्तते। जलशुद्धता विषये संहिताग्रन्थेष्वपि वर्णनं दृश्यते। यथा –

अञ्जनमुस्तोशीरैः सराजकोशातकामलकचूर्णैः ।
कतकफलसमायुक्तैर्योगः कूपे प्रदातव्यः ।।
कलुषं कटुकं लवणं विरसं सलिलं यदि वा शुभगन्धि भवेत् ।
तदनेन भवत्यमलं सुरसं सुसुगन्धि गुणैरपरैश्च युतम् ।।[8]

अर्थात् जलशुद्धताकृते अञ्जन-मोथा-खस-राजकोशातक-आमलक-कतकादी फलानां चूर्णं उपयोगी वर्तते । एतेषां औषधीनां प्रयोगेन जले उत्पन्नविकाराणां (कडुवा-खारा-वेस्वाद-दुर्गन्ध) निराकरणं कृत्वा जलं मधुरं सुगन्धितञ्च करोति। जलमेतत् स्वास्थ्यवर्धकं वर्तते । एतस्मात् कारणात् प्राचीनाचार्यैः नदी-तडाग-कूप-निर्झर-सरोवरादीनां समीपे जामुन-वेंत-अर्जुन-महुआ-पिलखन-कदम्बादि वृक्षाणां रोपणस्यं वर्णनं अकृषत । चोक्तं बृहत्संहितायां

ककुभवटाम्रप्लक्षकदम्बैः सनिचुलजम्बूवेतसनीपैः ।
कुरबकतालाशोकमधूकैर्बकुलविमिश्रैश्चावृततीराम् ।।[9]

एते वृक्षाःआयुर्वेदे औषधीरूपेण अभिज्ञायते । एषां वृक्षाणां पार्श्वे गतं जलं स्वयमेव शुद्धतां प्राप्नोति यतोहि वृक्षमूलतः निसृतं जलं कूप-बाबडी-तडागादी पर्यन्तं गच्छति ।

निष्कर्षः अतः प्राकृतिकजलस्त्रोतानां जीर्णोद्धारं संरक्षणादि अस्मिन् काले मानवानां प्राथमिकं कर्त्तव्यं वर्तते ।एवञ्च पर्यावरणदृष्ट्या सरोवराणां पार्श्वे औषधीयवृक्षाणां रोपणं संरक्षणं च कृत्वैव मानवैः औषधीयगुणयुक्तं जलं प्राप्तुं शक्यते। सरोवराणां जीर्णोद्धारस्य अतीव महत्त्वं जायते । यथोक्तं अग्निपुराणे- **"वापीकूपतडागादेर्जीर्णोद्धारे महाफलम्" ।[10]** इति।

****

[5] जलविज्ञान, अध्यायः १४, पृ.सं. ३०८
[6] बृहत्संहिता, प्रसादलक्षणाध्यायः, श्लो. सं. ३
[7] जलविज्ञान, अध्यायः १४, पृ.सं. ३१०
[8] बृहत्संहिता, दकार्गलाध्यायः, श्लो. सं. १२१
[9] बृहत्संहिता, दकार्गलाध्यायः , श्लो. सं. ११९
[10] अग्निपुराण ३१/६

16. न्यायसिद्धान्तमुक्तावल्याः पदार्थोद्देशवादे दिनकरी-प्रभा-मञ्जूषाटीकानां समीक्षात्मकमध्ययनम्

सुव्रत-गायेनः
सहायकाध्यापकः
संस्कृतविभागस्य, चन्दननगरमहाविद्यालयस्य
Email : subratasans05@gmail.com
Contact : 6289677633

उपोद्घातः –

जन्मसंस्कारविद्यादेः शक्तेः स्वाध्यायकर्म्मणोः। ह्रासदर्शनतः...।।[i] इति विदितमेव विदुषां सुभाषितमुदयनाचार्याणाम् । अतो मनुजनूनां स्वाध्यायसंस्कारविद्यादिह्रासात् सुकुमारमतीनां सुखबोधाय अनायासशास्त्रसिद्धान्तावधारणेन विद्यासमृद्धये च सम्प्रति आकरग्रन्थानां व्याख्यानबन्धनिबन्धनप्रयासो विदुषाम्। परं नासौ मुनिर्यस्य मतं न भिन्नम्। तथात्वे सिद्धान्तमुक्तावल्याः टीकाकृतामपि मतेषु मिथो वैमत्यं विद्वद्विप्रतिपत्तिजनकं स्यादित्यत्र कः संशयः? विविधविबुधव्याख्यानेषु यद्यपि एकमेव समानं विषयमाश्रित्य व्याख्यातारस्तत्तद्ग्रन्थेषु तत्तत्सिद्धान्तानुगुणं मूलग्रन्थव्याख्यानपरास्तथापि व्याख्यातृबुद्धिवैभव्यान्मिथो वैमत्यं सुलभम्। तेषां परस्परसमीक्षणेन विना तादृशव्याख्यातृकर्कशतरगीर्वारिपिच्छिले अध्वनि न प्रवर्तते मतिमतां सतां मतिरिति तयोरत्र समीक्षणमाद्यं प्रयोजनम्। किञ्च तेषां समीक्षणेनैव मूलकृतामाशयः अपि स्फुटतरः स्यादिति द्वितीयमपि प्रयोजनं मनसि निधाय न्यायसिद्धान्तमुक्तावल्याः पदार्थोद्देशवादे दिनकरी-प्रभा-मञ्जूषाटीकानां समीक्षात्मकमध्ययनमिह मद्बन्धे निबध्यते समासतः।

न्यायसिद्धान्तमुक्तावल्याः निगूढतत्त्वप्रकाशार्थं नैकैर्विद्वद्भिर्नैकाः टीकाः आटीकिताः। टीकासु तासु महादेवप्रारब्धं दिनकरभट्टप्रपूरितं दिनकरीयं, रायश्रीनृसिंहशास्त्रिणः प्रभा, श्रीपट्टाभिरामशास्त्रिणं मञ्जूषा च सर्वा हि टीका अतिशय्य विद्योतन्तेतमाम्।

न्यायसिद्धान्तमुक्तावल्याः पदार्थोद्देशवादे दिनकरी-प्रभा-मञ्जूषाटीकानां समीक्षात्मकम् अध्ययनम् –

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम्।

समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः॥[ii]

इति कारिकया श्रीविश्वनाथन्यायपञ्चाननेन कारिकावल्यां पदार्थानामुद्देशः अकारि। एते सप्त पदार्थाः वैशेषिकशास्त्रेषु प्रसिद्धास्तथा न्यायशास्त्रेऽपि स्वीकृताः। तथाहि मुक्तावल्यामगादि –

पदार्थान् विभजते द्रव्यं गुण इति। अत्र सप्तमस्य अभावत्वकथनादेव षण्णां भावत्वं प्राप्तम्, तेन पृथगुपन्यासो न कृतः। एते च पदार्था वैशेषिकप्रसिद्धाः, नैयायिकानामप्यविरुद्धाः। प्रतिपादितं चैवमेव भाष्ये। अत एव चिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्ययोः अतिरिक्तपदार्थत्वम् आशङ्कितम्।[iii] इति।

नन्वन्यैः शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वेनाङ्गीकारात्कथमत्र सप्त पदार्था इत्युच्यते इति जिज्ञासाशमनाय मुक्तावल्यां विश्वनाथेन शक्तिसादृश्यादीनां पूर्वपक्षिपक्षानुसारं प्रतिपाद्यातिरिक्तपदार्थत्वं खण्डितम्। शक्ति-सादृश्यादीनामतिक्तपदार्थत्वं खण्डयता तेनागादि –

ननु कथमेते एव पदार्थाः, शक्तिसादृश्योरपि अतिरिक्तपदार्थत्वात्। तथाहि मण्यादिसमवहितेन वह्निना दाहो न जन्यते, तच्छुन्येन तु जन्यते।[iv] इत्यादि।

मौलमिदं वाक्यं व्याख्यातुकामेन दिनकरीकारेण भूमिराचयितुमुक्तम् –

मण्यादिसमवधाने सति वह्निना दाहोत्पत्तिवारणाय मण्यादेः कारणविघटकत्वरूपा प्रतिबन्धकता वाच्या। सा च वह्निनिष्ठदाहानुकूलशक्तिरूपकारणविघटकतयैव निर्वहति। मण्यादिप्रतिबन्धकत्वान्यथानुपपत्त्या सिद्धायाः शक्तेः षड्भावेषु अनन्तर्भूतत्वात् अतिरिक्तत्वमिति पदार्थाः सप्त कीर्तिताः इति मूलमयुक्तमित्यभिप्रायेण प्राभाकरः शङ्कते नन्विति। अतिरिक्त इति। सप्तपदार्थातिरिक्तेत्यर्थः।[v] इति।

तदाशयस्त्वित्थम् वह्निः दाहं प्रति कारणम्। परं चन्द्रकान्तमणिविशिष्टो वह्निः दाहं नोत्पादयितुं शक्नोति चन्द्रकान्तमणेः दाहं प्रति प्रतिबन्धकत्वात्। मणेः प्रतिबन्धकत्वं नाम वह्निनिष्ठदाहानुकूलशक्तिनाशकत्वम्। वह्नौ दाहानुकूलशक्तेरभावे तन्नाशकत्वरूपं प्रतिबन्धकत्वं मणेः नोपपद्यत इति वह्नौ दाहानुकूला शक्तिः स्वीकर्तव्या। सा च शक्तिः षट्सु भावेषु नान्तर्गच्छतीत्यतिरिक्तपदार्थत्वेन स्वीकरणीया। तेन पदार्थाः सप्त कीर्तिताः इति मूलमयुक्तमिति प्राभाकरमतमाश्रित्य विश्वनाथः शङ्कते ननु कथमेत एवेत्यादिनेति।

प्रभाकार स्तूक्तव्याख्यानं महादेवस्य न स्वीकरोति। तन्नये मौल आक्षेपस्तु शक्तिसादृश्ययोरतिरिक्तपदार्थत्वेन। परं शक्तेरतिरिक्तपदार्थत्वस्य मीमांसकसम्मतत्वे अपि सादृश्यस्यातिरिक्तपदार्थत्वस्य तदसम्मतत्वादालङ्कारिकसम्मतत्वाच्च भ्रमात् प्राभाकरश्शकते इत्युक्त्वा मौलाक्षेपस्य भूमी रचिता दिनकरीकृतेति दुष्टं महादेवव्याख्यानम्। तथाहि उक्तम् प्रभाकृता –

केचित्तु मण्यादिसमवहिते सति वह्निना दाहोत्पत्तिवारणाय मण्यादेः कारणविघटकत्वरूपप्रतिबन्धकता वाच्या, सा च वह्निनिष्ठदाहानुकूल शक्तिरूपकारणविघटकतयैव निर्वहतीति मण्यादिप्रतिबन्धकत्वान्यथानुपपत्त्या सिद्धायाशक्तेः षड्भावानन्तर्भूतत्वादतिरिक्तत्वमिति पदार्थाः सप्त कीर्तिता इति मूलमयुक्तमित्यभिप्रायेण प्राभाकरशङ्कते नन्वितीत्यवतरणिकामाहुः। तदसत्, सादृश्यस्यातिरिक्तपदार्थत्वाभावात्। उभयोरतिरिक्तपदार्थत्वव्यवस्थापकनन्वित्यदाग्रन्थस्य प्राभाकराभिप्रायकत्वासम्भवात्।[vi] इति।

अत्रेदं विचार्यते यत् मीमांसकदर्शने भट्टैः कुमारिलैः पञ्च पदार्था अङ्गीकृताः। ते हि – द्रव्यं, गुणः, कर्म, सामान्यम्, अभावश्च। परं प्राभाकरैः द्रव्यं, गुणः, कर्म, सामान्यं, समवायः, सादृश्यं, शक्तिः इत्येते अष्टौ पदार्थाः स्वीकृताः। प्राभाकरसम्प्रदायानुसारं ग्रथितायां प्रकरणपञ्चिकायां व्याख्यातेषु प्राभाकरसम्मतपदार्थेषु अनन्यं हि सादृश्यम्। तत्र शालिकानाथैः पूर्वपक्षखण्डनपुरस्सरं सादृश्यं पदार्थान्तरत्वेन प्रतिपादितम् –

किं पुनरिदं सादृश्यम्, नेदं द्रव्यगुणकर्मसामान्यसमवायविशेषाणामन्यतमम्। तेषां संग्रहे अस्यापाठात्। उच्यते विषयः अस्य वित्तिसिद्धौ भिन्नद्रव्यादिभावेभ्यः। इति।

सर्ववस्तूनि संविदेकशरणानि। अस्ति चेयं सदृशः इति संवित्। सा च सर्वैव विषयाव्यभिचारिणीति दर्शितं न्यायवीथ्याम्। अतस्संवित्स्वभावसिद्धं सादृश्यं न पाठाभावात् अपह्नवम् अर्हति। तच्च न द्रव्यं, गुणकर्मणोः अपि आश्रितत्वात्। गन्धादयः अपि सदृशबोधगोचरीभवन्ति, भवन्ति च कर्मण्यपि कर्मान्तरसदृशबुद्धिबोध्यानि। अत एव न गुणत्वं, नापि कर्मत्वम्। अनुवृत्तप्रत्ययनिमित्तत्वाभावाच्च न सामान्यम्। समवायस्तु सम्बन्धरूप इति न तत्र सादृश्यान्तर्भावः। विशेषाख्यं तु पदार्थं प्रमाणवादिनो नानुमन्यन्ते स हि पृथक्त्वादतिरिक्तो नानुमातुं शक्यते। पृथक्त्वं हि परमाणूनां स्थूलद्रव्यारम्भलक्षणकार्योन्नेयम्। तदतिरेकिणि तु विशेषे न किञ्चित्प्रमाणम्। न च परमाणुपृथक्त्वम् एव लिङ्गम्, नित्यत्वात् परमाणुपृथक्त्वस्य। कार्यं हि स्यात् कारणस्य लिङ्गं न च परमाण्वाश्रितं पृथक्त्वं कार्यम् इति प्रमेयपारायणे निर्णीतम्। अतः पदार्थान्तरमेवेदम् शक्तिवत् संख्यावच्चेति प्रमेयपारायणे अप्युक्तम्।[vii] इति।

अतः सादृश्यं न केवलमालङ्कारिकैः प्राभाकरैरप्यङ्गीकृतमिति तन्मतमाशङ्क्य पूर्वपक्षमतोपस्थापनं ग्रन्थकर्तुरिति व्याख्यानं **दिनकरीकृतो युक्तमेवेति मे मतिः।**

न्यायसिद्धान्तमुक्तावल्याः सादृश्यस्यातिरिक्तपदार्थत्वानुमाने दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनम् –

प्राभाकरमतानुसार पूर्वपक्षरूपेण सादृश्यस्य पदार्थान्तरत्वमुपस्थाप्य तन्निराकृतिः कृता विश्वनाथेन मुक्तावल्याम्। तत्र सादृश्यस्य तदैव पदार्थान्तरत्वं यदि नैयायिकसम्मतसप्तपदार्थानन्तर्भूतत्वमिति ग्रन्थकृता षड्भावानन्तर्भूक्तत्वं सादृश्यस्य प्रख्यापनार्थमुक्तम् –

"एवं सादृश्यमप्यतिरिक्तपदार्थः, तद्धि न षट्सु भावेष्वन्तर्भवति सामान्ये अपि सत्त्वात्, यथा गोत्वं नित्यं तथा अश्वत्वमपि नित्यमिति सादृश्यप्रतीतेः।"[viii] इति।

मूलवाक्यमिदं विश्वनाथस्य व्याख्यातुकामेन महादेवेन दिनकर्यामुक्तम् –

तद्धीति। तत् सादृश्यम्, हि हेतौ। सामान्ये अपीति। सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादित्यर्थः। तेन सामान्यत्वे न व्यभिचारः। व्यतिरेकित्वे सतीति विशेषणान्न प्रमेयत्वादौ व्यभिचारः।[ix] इति।

दिनकरीकारनये यस्मात् सादृश्यं षड्भावानन्तर्भूतं तथाभावानन्तर्भूतं च तस्मात् सादृश्यमतिरिक्तः पदार्थः तत्रानुमानं हि **सादृश्यं क्लृप्तसप्तपदार्थातिरिक्तम्, षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वात्** इति। उक्तानुमानस्थहेतुघटकीभूतस्य सत्यन्तभागस्य पक्षे सादृश्ये असिद्धिवारकम् अनुमानं हि **सादृश्यं षड्भावानन्तर्भूतम् सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्, गगनाभाववदिति**। अस्य अनुमानस्य हेतौ सामान्येतरवृत्तित्वे सतीति भागस्यानुपदानात्सामान्यत्वे व्यभिचारः। सामान्यवृत्तित्वमात्रोक्तौ द्रव्यत्वादौ व्यभिचारः। अतो विशिष्टहेतुनैव सादृश्ये षड्भावातिरिक्तत्वं साध्यम्। ननु सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादिति विशिष्टहेतोः साध्याभाववति प्रमेयत्वे सत्त्वाद्व्यभिचारापत्तिः। अतो हेत्वंशे व्यतिरेकित्वे सति इति विशेषणं योज्यमिति महादेवाभिप्रायः। व्यतिरेकित्वं ह्यत्यन्ताभावप्रतियोगित्वम्। तच्च प्रमेयत्वे नास्ति, प्रमेयत्वस्य केवलान्वयित्वेन अत्यन्ताभावाप्रतियोगित्वादिति भावः।

नृसिंहशास्त्रिणा नाङ्गीक्रियते दिनकरीमतम्। तन्नये सादृश्यं षड्भावानन्तर्भूतम् सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्, गगनाभाववदित्यनुमाने सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादिति हेतुर्न व्यभिचारदोषदुष्टः। तथाहि प्रमेयं हि प्रमाविषयः। तथा च प्रमेयत्वस्य प्रमाविषयत्वस्वरूपस्य विषयभेदात् भिन्नत्वाद् एकस्मिन् प्रमेयत्वे सामान्येतरवृत्तित्वसामान्यवृत्तित्वोभयवत्त्वात्मकहेतोरभावात्। तथाहि –

केचित्तु प्रमेयत्वे व्यभिचारवारणाय हेतौ व्यतिरेकित्वे सतीति विशेषणं देयममित्याहुः। तदसत्, प्रमेयत्वस्य प्रमाविषयत्वरूपस्य विषयभेदेन भिन्नतया निरुक्तोभयवत्त्वरूपहेतोरभावात्।[x] इति।

अन्यथापि दिनकरीमतचिखण्डिषया न्यगादि प्रभाकृता –

यदि विषयतासम्बन्धेन प्रमावत्त्वमेव प्रमेयत्वं, विषयतासम्बन्धेन सर्वत्र विद्यमानाया ईश्वरप्रमाव्यक्तेः निरुक्तवृत्तिताद्वयवत्त्वेन व्यभिचारस्तदवस्थ इत्युच्यते तदा व्यतिरेकित्वविशेषणदाने अपि समवेतत्वस्य प्रतियोगितासम्बन्धेन समवायवत्त्वरूपस्य तादृशहेतुमत्त्वेन व्यभिचारस्य दुर्वारत्वात्। यदि च प्रतियोगितायाः वृत्त्यनियामकतया तेन सम्बन्धेन समवायवत्त्वरूपसमवेतत्वाप्रसिद्ध्या तत्र व्यभिचारस्याप्रसक्तिरित्युच्यते तदा विषयताया अपि वृत्त्यनियामकतया तेन सम्बन्धेन प्रमावत्त्वरूपप्रमेययत्वासिद्ध्या तत्र व्यभिचाराभावेन हेतौ व्यतिरेकित्वे सतीति विशेषणदानवैयर्थ्यस्य दुर्वारत्वात्।[xi] इति।

उपसंहृतिः – अत्र प्रबन्धे सादृश्यस्यातिरिक्तपदार्थत्वं मीमांसकसम्मतम् इति दिनकरीमतं यत् प्रभाकृता भ्रममूलकत्वेन तिरस्कृतं तत्सविशदं निरूप्य प्रभाकृन्मतमेव भ्रममूलकमिति सयुक्ति उद्धृतिपुरस्सरं प्रतिपादितम्। किञ्च, टीकाकारयोरनयोर्दिनकरीकारमतं श्रेय इति दर्शितम्। तथा च, सादृश्यस्यातिरिक्तपदार्थत्वानुमाने दिनकरीप्रभामञ्जूषाणां समीक्षात्मकमध्ययनं विहितम् । तत्र **सादृश्यं क्लृप्तसप्तपदार्थातिरिक्तम्, षड्भावानन्तर्भूतत्वे सति अभावानन्तर्भूतत्वात्** इत्यनुमानस्थहेतुघटकीभूतस्य सत्यन्तभागस्य पक्षे सादृश्ये असिद्धिवारकम् अनुमानं हि **सादृश्यं षड्भावानन्तर्भूतम् सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वात्, गगनाभाववदिति**। अस्य चानुमानस्य हेतौ सामान्येतरवृत्तित्वे सतीति भागस्यानुपदानात्सामान्यत्वे इत्यत्र प्रमेयान्तर्भावेण व्यभिचारमाशङ्क्य व्यतिरेकित्वे सति इति विशेषणं योज्यमिति महादेवाभिप्रायः। परं प्रमेयत्वस्य प्रमाविषयत्वस्वरूपस्य विषयभेदात् भिन्नत्वाद् एकस्मिन् प्रमेयत्वे सामान्येतरवृत्तित्वसामान्यवृत्तित्वोभयवत्त्वात्मकहेतोरभावान्न व्यभिचारसन्देहलेश इति प्रभाकृन्नय इति तन्मतं सयुक्ति प्रतिपादितम्। इत्थमन्येषु अपि विषयेषु दिनकरीप्रभामञ्जूषाणां मतवैमत्यं लभते। परं बन्धविस्तारभियात्र नोल्लिख्यते तदिति शिवम्।

सहायकग्रन्थाः

न्यायपञ्चाननः, विश्वनाथः। कारिकावली (प्रभा-मञ्जूषा-दिनकरीय-रामरुद्रीय-गङ्गारामीय-सहिता)। सम्पा. शङ्कररामशास्त्री, वाराणसी: चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2016 (पुनर्मुद्रणम्)।

न्यायपञ्चाननः, विश्वनाथः। कारिकावली (मुक्तावली-दिनकरी-रामरुद्रीसनाथिता) । सम्पा. आत्मारामशर्मा, वाराणसी: चौखम्बा-संस्कृत-सिरिज्-अफिस्, 2012.

न्यायपञ्चाननः, विश्वनाथः। न्यायसिद्धान्तमुक्तावली (दिनकरी-हिन्दीव्याख्यासमेता) । सम्पा. राजारामशुक्लः, शिमला: इन्डियान्-इन्स्टिटिउट्-अव्-आड्भान्स्ड्-स्टाडिज्, 2015 (प्रथम-प्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। न्यायसिद्धान्तमुक्तावली (मुक्तावलीसंग्रहसहिता) । सम्पा. पञ्चाननशास्त्री, कलिकाता: महाबोधि-बुक्-एजेन्सिः, 2016 (पुनर्मुद्रणम्)।

न्यायपञ्चाननः, विश्वनाथः। न्यायसिद्धान्तमुक्तावली । सम्पा. श्रीकृष्णवल्लभाचार्यः, वाराणसी: चौखम्बा-संस्कृत-प्रतिष्ठानम्, 2014 (द्वितीयप्रकाशः)।

न्यायपञ्चाननः, विश्वनाथः। भाषापरिच्छेदः। सम्पा. आशुतोषन्यायाचार्य्यः, कलिकाता: विजयन, 1992.

शालिकनाथः, प्रकरणपञ्चिका । सम्पा. पी.टी.ए. सुब्रह्मण्य-शास्त्री, वनारसः काशी-हिन्दु-विश्वविद्यालयः, 1961.

तथ्यसूत्राणि

[i] न्यायकुसुमाञ्जलौ, द्वितीयाध्याये कारिका 3
[ii] न्यायसिद्धान्तमुक्तावल्यां, कारिका 2
[iii] श्रीकृष्णवल्लभाचार्यसम्पादितायां न्यायसिद्धान्तमुक्तावल्यां 24-26 पृष्ठे
[iv] पञ्चाननभट्टाचार्य्यशास्त्रिसम्पादिते भाषापरिच्छेदे 19-20 पृष्ठे
[v] श्रीशङ्कररामशास्त्रिसम्पादितायां कारिकावल्यां 54पृष्ठे
[vi] तत्रैव
[vii] सुब्रह्मणशास्त्रिसम्पादितायां प्रकरणपञ्चिकायां 266-268 पृष्ठे
[viii] पञ्चाननभट्टाचार्य्यशास्त्रिसम्पादिते भाषापरिच्छेदे 22-23पृष्ठे
[ix] श्रीशङ्कररामशास्त्रिसम्पादितायां कारिकावल्यां 58-59 पृष्ठे
[x] तत्रैव, 58 पृष्ठे
[xi] तत्रैव

****

17. व्युत्पत्तिवादानुसारेण लृडर्थविमर्शः

डॉ. सन्तु-सिंहः
सहायकाध्यापकः
संस्कृतविभागस्य, बाँकुड़ाविश्वविद्यालयस्य
Email : santusingha03@gmail.com
Contact : 6289677633

भट्टाचार्यैर्गदाधरैः प्रकृत्यर्थनिर्णायकः शक्तिवादः प्रत्ययार्थप्रतिपादकः व्युत्पत्तिवादश्च विरचितः। तत्र व्युत्पत्तिवादे सुपामर्थान् निरूप्य तिङामर्थास्तैः सविशदं व्याख्याताः। आचार्यैर्लडर्थं प्रतिपाद्य लृडर्थो न्यरूपि। ननु टकारानुबन्धानुसारं ङकारानुबन्धानुसारं च लट्, लिट्, लुट्, लृट्, लोट्,लङ्, विधिलिङ्, आशीर्लिङ्, लुङ्, लृङ् इति क्रममुज्झित्वा भट्टाचार्याणां लट्, लृट्, लुट्, लुङ्, लङ्, लिङ्, लोट् इति क्रमाश्रयणम् अयुक्तम् इति चेदुच्यते यत्केवलातीतत्वस्य लुङर्थस्य निरूपणानन्तरम् अनद्यतनत्वसहितस्य लङर्थस्य निरूपणे, ततश्च परोक्षत्वसहितस्य तस्य लिडर्थस्य निरूपणे लाघवम्। तथा च लृडर्थस्य केवलानुगतत्वस्य निरूपणात्परम् अनद्यतनत्वसहितस्य लुडर्थस्य निरूपणे एव लाघवमिति विचार्य भट्टाचार्यैः लट्, लृट्, लुट् इत्यादिक्रम आश्रितः। अत्र प्रकृते प्रबन्धे भट्टाचार्याणां मतानुसारं लृडर्थं निरूप्य कस्तत्र विशेष इति सविशदं समीक्षितम्।

गदाधरनये लृट्प्रत्ययस्यार्थो हि भविष्यत्त्वम्। तथाहि भगवता पाणिनिना लृट् शेषे च इति लृड्विधायकं सूत्रं सूत्रितम्। भविष्यति गम्यादयः इत्यतो भविष्यतीति अनुवर्तमाने लृड्विधायकसूत्रेण भविष्यदर्थे हि लृड् विधीयते। तच्च भविष्यत्त्वं नाम अनागतत्वम्। ननु कस्तावद् भविष्यदर्थ इति जिज्ञासायामुक्तं गदाधरैः –

वर्तमानप्रागभावप्रतियोगित्वं प्रतियोगितासम्बन्धेनान्वयी वर्तमानप्रागभावो वा लृट्प्रत्ययार्थः।[i] इति।

वर्तमानो यः प्रागभावः तत्प्रतियोगित्वम् अनागतत्वं भविष्यत्त्वं वा। यथा घटो भविष्यतीत्यत्र यो घटोत्पत्तिप्रागभावो वर्तमानः तत्प्रतियोगित्वं घटोत्पत्तावस्ति। अथवा प्रतियोगितासम्बन्धेनान्वयिवर्तमानप्रागभावत्वं भविष्यत्त्वम्। अत्र वर्तमानत्वं नाम शब्दप्रयोगाधिकरणक्षणरूपम्। तथा च प्रागभावे वर्तमानत्वं च शब्द्रयोगाधिकरणक्षणवृत्तित्वम्। तेन पक्ष्यति इत्यत्र शब्दप्रयोगाधिकरणक्षणरूपवर्तमानकालवृत्ति पाकानुकूलकृत्यभावीयप्रतियोगित्वं पाकानुकूलकृतावस्तीति प्रतियोगितासम्बन्धेन तादृशवर्तमानकालीनप्रागभावः पाकानुकूलकृतौ वर्तत इति लक्षणसमन्वयः।

उपर्युक्तयोः भविष्यदर्थपरिष्कारयोः प्रागभावघटितत्वात् प्रागभावानङ्गीकृतां मते अप्रसद्धिमाशङ्क्य तदघटिततया भविष्यत्स्वरूपं प्रपञ्चितम् –

प्रागभावानङ्गीकारे वर्तमानकालध्वंस एव तदर्थः[ii] इति।

वस्तुतस्तु दीधितिकृता सामान्यलक्षणप्रकरणे प्रागभावः खण्डितः। तथा चोक्तम् –

अथैवं जातो घट इत्यादिवदुत्पन्नो घटध्वंस इत्यादिविलक्षणप्रत्ययबलेन नाशोऽतिरिच्यतां न तु प्रागभावः[iii] इति।

जातो घट इति प्रत्यक्षबलात् यथा घटः सिद्ध्यति तथैव उत्पन्नः घटध्वंसः इति प्रत्यक्षबलात् ध्वंसः सिद्ध्यति। परन्तु **इह इदानीं घटप्रागभावः** इति प्रत्यक्षाभावात् प्रागभावः प्रत्यक्षप्रमाणेन नैव सिद्ध्यति। तथाहि दिनकर्यां दीधितिकृन्नय एवम् उपस्थापितः –

केचित्तु जातो घट इत्यादिवत् उत्पन्नो घटध्वंसः इति प्रत्यक्षबलेन नाशः अतिरिच्यते, न तु प्रागभावः। इह इदानीं घटप्रागभाव इति लोकानां प्रत्ययाभावात्।[iv] इति।

अतः दीधितिकृद्भिः वर्तमानप्रागभावप्रतियोगित्वस्य भविष्यत्वं नाङ्गीकृतम्। तथाहि सामान्यलक्षणाप्रकरणे दीधितौ उक्तम् – **भविष्यत्त्वं हि न वर्तमानप्रागभावप्रतियोगित्वम्**[v] इति। अतो गदाधरेण प्रागभावानङ्गीकर्तृणां दीधितिपादानां मतानुसारं भविष्यत्स्वरूपं प्रतिपादितम्।

ननु पच्यमाने चैत्रे भाविकालावच्छिन्नप्रकृतपाकक्रियानुकूलां कृतिमादाय पक्ष्यतीति प्रयोगापत्तिः। तुषविमोकरूपप्रथमक्रियाप्रभृति समाप्तिक्रियापर्यन्तकाले पचतीति व्यवहारः । पाकश्च तुषविमोकचुल्लीप्रज्वालनस्थाल्यधिरोहणाद्यनेकक्रियाकलापः । तत्र स्थाल्यधिरोहणानुकूलकृतिवर्तमानदशायां मण्डस्रावणाद्यनुकूलभाविकृतेः प्रागभावस्य सत्त्वात् पक्ष्यतीति प्रयोगः सम्भवति। न च धात्वर्थपाकानुकूलकृतित्वावच्छेदेन भविष्यत्त्वमन्वेतीति पाकारम्भदशायां पाकमध्यकाले पाककृतिसामान्यान्तर्गतायां मध्यकालीनकृतौ वा अनागतत्वबाधेन पक्ष्यतीति प्रयोगावरणं सम्भवतीति वाच्यम्। तथा सति पूर्वपूर्वपाकानुकूलकृतौ पाकानुकूलकृतित्वाक्रान्तायां भविष्यत्त्वबाधात् पक्ष्यमाणे अपि चैत्रे अयं पक्ष्यतीति प्रयोगानुपपत्तिः, पाकानुकूलकृतित्वावच्छेदेनानागतत्वस्य बाधात् । न च तत्तत्पाकानुकूकृतित्वावच्छेदेन भविष्यत्त्वान्वयान्नानुपपत्तिरिति वाच्यं तत्तत्पाकत्वेन पाकस्य पदादनुपस्थितेः । पदादनुपस्थितस्य शाब्दबोधे च न भानम् । नापि यत्किञ्चित्पाकानुकूलप्रथमकृतित्वावच्छेदेन अनागतत्वान्वयः, प्रथमत्वोपस्थापकपदाभावात् तत्तद्व्यक्तित्वमनन्तर्भाव्य यत्किञ्चित्त्वस्य दुर्वचत्वाच्चेति पाकारम्भदशायां पाकमध्यदशायां वा पचमाने पक्ष्यतीति प्रयोगापत्तिर्ध्रुवा भवतीति पूर्वपक्षिणामाक्षेपः।

अत्र भट्टाचार्यैः समाधिर्गदितो यत् वर्तमानप्रागभावप्रतियोगित्वं, प्रतियोगितासम्बन्धेन अन्वयी वर्तमानप्रागभावः, वर्तमानकालध्वंसो वा लृडर्थ इत्यत्र वर्तमानत्वं नाम वर्तमानकालवृत्तित्वम्। वर्तमानकालवृत्तित्वं नाम शब्दप्रयोगाधिकरणकालवृत्तित्वम्। अत्र च क्षणरूपः कालो बोध्यः। तेन

शब्दप्रयोगाधिकरणक्षणवृत्तिप्रागभावप्रतियोगित्वम् भविष्यत्त्वम् इति पर्यवसितम्। तथा च शब्दप्रयोगाधिकरणक्षणवृत्तिरूपवर्तमानप्रागभावस्य लृट्-प्रत्ययार्थत्वे स्वीकृते तस्य स्वविशिष्टकालवृत्तिकृतिजन्यपाकाननुकूलत्वविशिष्टप्रतियोगितासम्बन्धेनान्वयः बोध्य इति गदाधरसिद्धान्तः। तेन न पाकारम्भदशायां पाकमध्यदशायां वा पचमाने पक्ष्यतीति प्रयोगापत्तिः। तथाहि स्वं वर्तमानप्रागभावः, स्वविशिष्टकालः वर्तमानप्रागभावविशिष्टकालो वर्तमानकालः, तद्वृत्तिकृतिजन्यपाकाननुकूला भविष्यत्कालीना कृतिस्तथा वर्तमानप्रागभावप्रतियोगिनी। एवं स्वविशिष्टकालवृत्तिकृतिजन्यपाकाननुकूलत्वविशिष्टप्रतियोगितासम्बन्धेन भविष्यत्-कालिककृतौ वर्तमानप्रागभावस्यान्वयो बोध्यः।

तथा च पचमानकर्तृकपाकानुकूलोदीच्यकृतौ वर्तमानप्रागभावप्रतियोगितायाः सत्त्वेऽप्युक्तविशिष्टकालवृत्तिकृतिजन्यपाकाननुकूलत्वं नास्ति, तादृशपाकानुकूलत्वस्यैव सत्त्वादिति नोक्तोदीच्यकृतावुक्तसम्बन्धेन वर्तमानप्रागभावस्यान्वयः सम्भवतीति न पचमाने उक्ता पक्ष्यतीति प्रयोगापत्तिः। भविष्यत्पाककृतौ तु पचमानकर्तृकपाकाननुकूलत्वं वर्तमानप्रागभावप्रतियोगित्वं चास्ति। अत उक्तसम्बन्धेन वर्तमानप्रागभावस्य भविष्यत्पाककृतावन्वयः सम्भवति। अतो न पक्ष्यमाणे पक्ष्यतीति प्रयोगानुपपत्तिः।

वर्तमानकालध्वंसस्य शब्दप्रयोगाधिकरणक्षणरूपवर्तमानकालवृत्तिध्वंसस्य लृडर्थत्वे स्वपूर्वकालीनकृतिजन्यपाकाननुकूलत्वविशिष्टाधेयतासम्बन्धेन तस्य कृतावन्वयो बोध्य इति गादाधरसिद्धान्तः। अत्र स्वं वर्तमानकालध्वंसः, वर्तमानकालध्वंसपूर्वकालीनकृतिः वर्तमानकालीना कृतिः, तज्जन्यपाकाननुकूला भविष्यत्कालीना कृतिः तथा कालोपाधिवर्तमानकालध्वंसवृत्तिः। उक्तसम्बन्धेन भविष्यत्पाककृतौ वर्तमानकालध्वंसान्वयसम्भवान्न पक्ष्यमाणे पक्ष्यतीति प्रयोगानुपपत्तिः। पचमानकर्तृकपाकानुकूलोदीच्यकृतौ तु पचमानकर्तृकपाकाननुकूलत्वस्य सम्बन्धघटकस्यासत्त्वान्न तादृशकृतौ वर्तमानकालध्वंसरूपस्य भविष्यत्कालस्यान्वयः सम्भवति। तेन न पचमानेऽपि न पक्ष्यतीति प्रयोगापत्तिः स्यात्। तथाहि गादाधरी गीरियम् –

अथ पचमानेऽप्युदीच्यपाकानुकूलकृतिमादाय पक्ष्यतीत्यादिप्रयोगापत्तिः। पाकानुकूलकृतित्वावच्छेदेन चानागतत्वस्वीकारो न सम्भवति पूर्वपूर्वपाकानुकूलकृतौ तद्बाधात् पक्ष्यमाणेऽपि पक्ष्यति इति प्रयोगानुपपत्तेः।

तत्तत्पाकानुकूलकृतित्वावच्छेदेनापि तदन्वयासम्भवः तत्तत्पाकत्वेन पदादनुपस्थितेः।

नापि यत्किञ्चित्पाकानुकूलाद्यकृतित्वावच्छेदेन तदन्वय आद्यत्वोपस्थापकपदाभावात्, तत्तद्व्यक्तिमनन्तर्भाव्य दुर्वचत्वाच्चेति चेन्न, प्रागभावस्य वर्तमानत्वं शब्दप्रयोगाधिकरणक्षणवृत्तित्वम्, वर्तमानप्रागभावस्य प्रत्ययार्थत्वे तस्य स्वविशिष्टकालवृत्तिकृतिजन्यपाकाननुकूलत्वविशिष्ट-प्रतियोगितासम्बन्धेन, वर्तमानकालध्वंसस्य तदर्थत्वे च स्वपूर्वकालीनकृतिजन्यपाकाननुकूलत्वविशिष्टाधेयतासम्बन्धेन कृत्यंशेऽन्वयोपगम उदीच्यकृतौ वर्तमानप्रागभावभावादेर्दर्शितविशिष्टसम्बन्धासत्त्वेनातिप्रसङ्गविरहात्।[vi] इति।

निगमनम् - एवं सर्वैरेव भविष्यत्सामान्यं लृडर्थत्वेन स्वीकृतम्। परं तदर्थघटकीभूतभविष्यन्निरूपणावसरे **वर्तमानप्रागभावप्रतियोगिसमयोत्पत्तिकत्वं भविष्यत्त्वम्** इत्येवं शाब्दिकैः प्रागभावघटकं भविष्यल्लक्षणमकारि। भट्टाचार्यैर्यथा वैयाकरणमतं स्वीकृतं तथा प्रागभावानङ्गीकर्तृणां नयानुसारमपि भविष्यल्लक्षणं निरूपितम्। तथाहि वर्तमानप्रागभावो वा लृट्प्रत्ययार्थः। प्रागभावानङ्गीकारे वर्तमानकालध्वंस एव तदर्थः। इति। तत्र वर्तमानकालध्वंसे चाधेयतासम्बन्धेन कृतेरन्वयो बोध्यः। तत्र ध्वंसस्य जन्यत्वेन जन्यमात्रं कालोपाधिरिति नियमात् कालोपाधित्वम्। कालोपाधौ कालिकसम्बन्धेन समकालीनपदार्थानां वृत्तित्वनियमादनागतकृतिरपि वर्तमानकालध्वंसात्मककालोपाधौ तिष्ठेदित्याधेयतासम्बन्धेनान्वयस्तस्याः। एवं भट्टाचार्यमतमत्र **वैयाकरणमतपरिपूरकतया वर्तत** इत्यत्र गदाधरो विशिष्यते। विना गदाधरमतं लृडर्थविषयकं नूनं न्यूनतादोषपत्तिरिति तद्दूरीकरणार्थं गदाधरमतं सर्वैरङ्गीकार्यम् इति गदाधरमतं विजयतेतमाम् इति दिक्।

सहायकग्रन्थाः

१. कारिकावली प्रभा-मञ्जूषा-दिनकरी-रामरुद्री-गङ्गारामीव्याख्यासहिता, श्रीशङ्कररामशास्त्रि-सम्पादिता, चौखम्बासंस्कृतप्रतिष्ठानम्, नवदेहली, पुनर्मुद्रितसंस्करणम्, 2010.

२. व्युत्पत्तिवादः (सुनन्दाव्याख्यासहितः), ड.सच्चिदानन्दमिश्रसम्पादितः, भारतीयविद्याप्रकाशनम्, दिल्ली, 2001.

३. व्युत्पत्तिवादः (सादर्शः), हरेरामत्रिपाठि-सम्पादितः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2011.

४. व्युत्पत्तिवादः(गूढार्थतत्त्वालोकः), धर्मदत्तझासम्पादितः, चौखम्बा कृष्णदास अकादमी, वनारस, 1978.

५. व्युत्पत्तिवादः (कृष्णम्भट्टी-दीपिका-प्रकाश-शास्त्रार्थकलादिव्याख्यायुतः), अचिन्त्यदास-सम्पादितः, न्यू भारतीय वुक् कोर्पोरेशन्, दिल्ली, 2004.

६. सामान्यलक्षणाप्रकरणम्, केशवद्विवेदि-सम्पादितम्, श्रीदक्षिणामूर्तिमठः, वाराणसी, 2009 विक्रमाब्दः।

तथ्यसूत्राणि

[i] सादर्शे व्युत्पत्तिवादे 293 - पृष्ठाङ्के
[ii] तत्र, 294 - पृष्ठाङ्के
[iii] सामान्यलक्षणप्रकरणे 219-22 पृष्ठाङ्के
[iv] कारिकावल्यां 154-156 पृष्ठाङ्के
[v] सामान्यलक्षणाप्रकरणे 203 - पृष्ठाङ्के
[vi] सादर्शे व्युत्पत्तिवादे 294-296 पृष्ठाङ्के

18. लक्षणाया वृत्तित्वावृत्तित्वविमर्शः

प्रलय नन्दी
शोधच्छात्रः, रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्था
बेलुडमठम्, हावडा, पश्चिमवङ्गः
Email: prolay.nandi.vedvid@gmail.com
Mob: 8609348552

निबन्धसंक्षेपः- वैयाकरणसिद्धान्तलघुमञ्जूषायां लक्षणानिरूपणावसरे नागेशाचार्यः शक्तावेव लक्षणामन्तर्भावयन् स्वमतसमर्थनाय "गङ्गायां मीनघोषौ" इति वाक्यमुदाहरति। वैयाकरणभूषणसारादिष्वपि लक्षणायाः पृथग्वृत्तित्वे गौरवं प्रदर्श्य शक्तावन्तर्भावः सिद्धान्तितः। परन्तु न्यायशास्त्रादिषु लक्षणाया वृत्तित्वं स्वीकृतं सप्रपञ्चं लक्षणास्वरूपञ्च प्रतिपादितम्। एवं लक्षणायाः पृथग्वृत्तित्वे सम्प्रदायेषु परस्परं विरोधः स्फुट एव। निबन्धेऽस्मिन् तत्तसम्प्रदायानुमतमतान्युपस्थाप्य कतमः पक्षः समाश्रयणीय इति युक्त्योपपाद्यते।

मूलशब्दाः – वृत्तिः, शक्तिः, अभिधा, लक्षणा, प्रतीतिः, शाब्दबोधः, कार्यकारणभावः।

उपोद्घातः - वाग्व्यवहारप्रक्रियायां प्रथमतस्तिस्रो वृत्तयः समुपलभ्यन्ते। अर्थप्रतिपादकः शब्दनिष्ठव्यापारो वृत्तिरित्युच्यते। तत्र सङ्केतापेक्षयार्थावगमनशक्तिरभिधेत्युच्यते, वृत्तिसामान्यस्य अभिधावृत्तेश्च शास्त्रेषु शक्तिरिति प्रयोगः प्रायिकः। मुख्यार्थबाधादिसहकार्यपेक्षयार्थप्रतिभासनशक्तिर्लक्षणेत्युच्यते। अभिधेयादिव्यतिरिक्तार्थप्रतिपादनपरा व्यञ्जनावृत्तिः। तुरीया तात्पर्यवृत्तिरपि प्रधानतो भाट्टमीमांसकैः प्रतिपादिता, परन्तु तात्पर्यवृत्तिर्न शब्दशक्तिरपि तु वाक्यशक्तिरिति नेयं सर्वसम्प्रदायसमादृता। अभिधेयाभिधायिकाभिधा सर्वशास्त्रसम्मता, परन्तु लक्षणाव्यञ्जनयोर्विषये शास्त्रेषु वैचित्र्यं परिलक्ष्यते। लक्षणाविषयकवैचित्र्यमस्मदालोच्यविषयः। स्वज्ञाप्यसम्बन्धो लक्षणेति मीमांसकानुमतं लक्षणास्वरूपम्, तच्च न्यायशास्त्रादिविरुद्धम्। "शक्यसम्बन्धो लक्षणे"ति नैयायिकनिर्णीतं लक्षणालक्षणम्[1], तल्लक्षणं साहित्यसम्मतमपि[2], परन्तु साहित्यिकैः शक्यसम्बन्धात्मकलक्षणायाः शक्यतावच्छेदकारोपरूप आशयः प्रकाशितः[3]। सोऽयमाशयो शब्दशास्त्रेऽपि समादृतः परन्तु लक्षणायाः पृथग्वृत्तित्वं निराकृत्य शक्तावेवास्या अन्तर्भावः सिद्धान्तित इति वैयाकरणानां विशेषः। लघुनिबन्धेऽस्मिन् भिन्नसम्प्रदायरीत्या लक्षणास्वरूपमुल्लिख्यास्या वृत्तित्वावृत्तित्वविषयको विचारः प्रस्तूयते।

लक्षणावृत्तिः- "गङ्गायां मीन" इत्युच्यमाने गङ्गापदाभिधेयभगीरथरथखातावच्छिन्नजलप्रवाहरूपशक्यार्थस्य मीनपदार्थेन वाधाभावात्तात्पर्योपपत्तेर्न यत्नान्तरापेक्षा। परन्तु शैत्यपावनत्वाद्यभीष्टधर्मप्रतीतये "गङ्गायां घोष" इति प्रयुज्यमाने आभीरपल्ल्यात्मकघोषपदार्थेन गङ्गापदाभिधेयभगीरथरथखातावच्छिन्नजलप्रवाहात्मकशक्यार्थस्य बाधेन तात्पर्यानुपपत्तेर्यत्नान्तरापेक्षानुभवसिद्धा। तदेतद्यत्नान्तरं शास्त्रेषु लक्षणा, भक्तिः, अप्रसिद्धशक्तिरिति व्यवह्रियते। सम्प्रति नानामतानुगुणं लक्षणास्वरूपं प्रतिपाद्यते।

न्यायनयः- शक्यार्थसम्बन्धो लक्षणेति न्यायनये लक्षणास्वरूपम्। तदुच्यते विश्वनाथपञ्चाननाचार्यैः- "लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः[4]" इति। अत्र प्रथमांशो लक्षणास्वरूपपरः। शक्तिप्रतिपाद्यो वाच्यार्थापर्यायः शक्यार्थः, अस्य सम्बन्धो लक्षणेत्याशयः। शक्यसम्बन्धात्मकलक्षणायाः प्रवृत्तौ बीजञ्च तात्पर्यानुपपत्तिः। तात्पर्यं वक्तुरिच्छाविशेषः, अनुपपत्तिर्बाधः। एवञ्च तात्पर्यानुपपत्तिर्लक्षणाबीजम्। "गङ्गायां घोष" इत्युच्यमाने वाक्यस्य श्रोतुः गङ्गाप्रवाहवृत्त्याभीरपल्लीति बोधो भवति। ततो वक्तुः तात्पर्यस्य बाधो भवति, गङ्गातटवृत्तिर्घोष इति तात्पर्येण वाक्यस्य प्रयुज्यमानत्वात्। एवञ्च तात्पर्यबाधरूपलक्षणाबीजस्य सत्त्वाद्बाधपरिहाराय गङ्गापदे शक्यसम्बन्धात्मकलक्षणाप्रवृत्तिः। शक्यो गङ्गाप्रवाहः, गङ्गातटरूपार्थेनास्य सामीप्यसम्बन्धः, सामीप्यसम्बन्धवशाच्च गङ्गातटरूपार्थप्रतीतिः। ततश्च गङ्गातटवृत्त्याभीरपल्लीति वक्तृतात्पर्यमुपपद्यत इति न्यायरीतिः। अत्र मते वृत्तिर्नाम अर्थबोधानुकूलः पदपदार्थसम्बन्धः[5], सामीप्यादिसम्बन्धात्मिका लक्षणापि वृत्तिरेव। गदाधरभट्टाचार्येणाप्युक्तं शक्तिवादे- "सङ्केतो लक्षणा चार्थे पदवृत्तिरि"ति[6]। एवञ्च शक्यसम्बन्ध एव लक्षणा, लक्षणापि काचिद्वृत्तिरिति न्यायनयः।

वेदान्तनिर्णयः- लक्षणा न पदमात्रवृत्तिः, वाक्यवृत्तिरपीति वेदान्ते विशेषः। लक्षणा शक्यसम्बन्धात्मिका, तात्पर्यानुपपत्तिश्च लक्षणाबीजमिति वेदान्तेऽपि सम्मतम्। परन्तु लक्षणाप्रतिपाद्यो यथा पदार्थस्तथा वाक्यार्थोऽपीति विशेषः। "गङ्गायां घोष" इत्यत्र गङ्गापदबोध्यः शक्यो गङ्गाप्रवाहः, शक्यसम्बन्धः सामीप्यं लक्षणा, अनया लक्षणया गङ्गाशब्दो गङ्गातटरूपार्थमुपस्थापयति ततस्तात्पर्योपपत्तिः। परन्तु न्यायादिदिशा "गभीरायां नद्यां घोष" इत्यादौ निर्वाहो

---

1 "लक्षणा शक्यसम्बन्धस्तात्पर्यानुपपत्तितः।" (दिनकरीरामरुद्रीसहिता न्यायसिद्धान्तमुक्तावली, कारिका-82)
2 "शक्यसम्बन्धो लक्षणा", (रसगङ्गाधरः, पृष्ठम्-145)
3 "सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम।", (साहित्यदर्पणः, पृष्ठम्–36)
4 दिनकरीरामरुद्रीसहिता न्यायसिद्धान्तमुक्तावली(पृष्ठम्-285)
5 "अर्थस्मृत्यनुकूलः पदपदार्थसम्बन्धः शक्तिः" (तर्कसंग्रहः, शब्दखण्डम्)
6 शक्तिवादः, पृष्ठम्-1

न सम्भवति। "गभीरायां नद्यां घोष" इत्यत्र गभीरपदाद्गभीरपदार्थस्य नदीपदान्नदीपदार्थस्योपस्थितिः। गभीरपदार्थस्य नदीपदार्थेन सहाभेदान्वयः, ततो गभीराभिन्ननदीति बोधः। अयम्बोधो "गभीरायां नद्यामि"ति पदसमुदायेन जायते, परन्तु अस्यार्थस्य घोषपदार्थेन सहान्वये तात्पर्यं नोपपद्यते। तात्पर्यानुपपत्तिश्च लक्षणाप्रवृत्तिः। अत्र शक्यार्थो गभीराभिन्ननदीति, तद्बोधको "गभीरायां नद्यामि"ति पदसमुदायः। लक्षणायाः पदमात्रवृत्तित्वे प्रकृतस्थले लक्षणाया अप्रवृत्तौ तात्पर्योपपत्त्यसम्भवः। अतः पदवत्पदसमुदायेऽपि लक्षणाङ्गीकर्तव्येत्याशयः। शक्यसम्बन्ध एव लक्षणा, शक्यपदेनात्र स्वशक्तिज्ञाप्यं विवक्षितम्। पदार्थो यथा शक्तिज्ञाप्यस्तथा पदार्थज्ञानद्वारा वाक्यार्थोऽपि शक्तिज्ञाप्य एव[7]। वाक्यमत्र पदसमुदायः, ततश्च गभीराभिन्ननदीरूपार्थः शक्य एव। स्वशक्यसम्बन्ध इति लक्षणायाः स्वरूपं फलितम्। स्वं "गभीरायां नद्यामि"ति पदसमुदायः, तद्बोध्यो गभीराभिन्ननदीरूपशक्यार्थः, अस्य तटेन सह सामीप्यसम्बन्धः। ततश्च स्वशक्यसामीप्यसम्बन्धरूपलक्षणावृत्त्या गभीराभिन्ननदीतटरूपलक्ष्यार्थस्योपस्थितौ गभीराभिन्ननदीतटवृत्तिर्घोष इति तात्पर्यमुपपद्यते। शाब्दबोधानुकूलः पदपदार्थसम्बन्धो वृत्तिरिति वेदान्तसम्मतं वृत्तिस्वरूपम्। एवञ्च लक्षणायाः सम्बन्धात्मकत्वं वृत्तित्वञ्च वेदान्तिभिः सिद्धान्तितम्।

मीमांसाशयः- लक्षणास्वरूपनिर्णये वेदान्तमीमांसयोः मतैक्यं परिलक्ष्यते। मीमांसका अपि पदवाक्ययोरुभयोरपि लक्षणावृत्तिमङ्गीकुर्वन्ति। स्वशक्यसम्बन्ध इति वेदान्तोक्तं लक्षणास्वरूपम्, स्वज्ञाप्यसम्बन्ध इति मीमांसकानुमतं लक्षणास्वरूपम्। वाक्यार्थस्य शक्यत्वं शक्तिज्ञाप्यत्वं वा मीमांसकैर्नानुमन्यत इति विशेषः। पदार्थानां शक्यत्वात्पदार्थज्ञानद्वारा वाक्यार्थस्यापि शक्यत्वं वेदान्ते प्रतिपादितम्, तत्र वाक्ये साक्षात्शक्तिर्नाङ्गीकृता। एवं मीमांसकैरपि वाक्ये शक्तिर्नाङ्गीक्रियते, प्रत्येकं पदैः स्वपदार्थोपस्थितौ समभिव्याहारादेव परस्परसम्बन्धरूपस्य वाक्यार्थस्य प्रतिपत्तिरिति तदाशयः। ततो वाक्यार्थो वाक्यज्ञाप्यो न तु वाक्यशक्य इति प्रतिपादनभेदादेव लक्षणास्वरूपगतो भेदोऽवबोध्यः। "अनन्यलभ्यो हि शब्दार्थः", "स एव हि शब्दस्यार्थो यः प्रकारान्तरेण न लभ्यत"- इति शब्दार्थोपस्थितिनियमान्न हि वाक्ये वाक्यार्थोपस्थापिका शक्तिरिति मीमांसाहृदयम्। एवञ्च स्वज्ञाप्यसम्बन्ध इति प्रकृते लक्षणास्वरूपं फलितम्। स्वं वाक्यं "गभीरायां नद्यामि"ति पदसमुदायः, तद्बोध्यः गभीराभिन्ननदीरूपार्थः, अस्य तटेन सामीप्यसम्बन्धः। ततश्च स्वबोध्यसामीप्यसम्बन्धात्मकलक्षणावृत्त्या गभीराभिन्ननदीतटरूपलक्ष्यार्थोपस्थितौ गभीराभिन्ननदीतटवृत्तिर्घोष इति वाक्यसन्दर्भे मीमांसानुमतो लक्षणालक्षणसमन्वयो बोध्यः। एवं स्वबोध्यसम्बन्धो लक्षणा, सा चाभिधावद्वृत्तिरपीति मीमांसासम्मतिः।

साहित्यसमयः- जगन्नाथाचार्यो रसगङ्गाधरे लक्षणास्वरूपं प्रतिपादयति- "शक्यसम्बन्धो लक्षणे"[8]ति। न्यायशास्त्रादिनिरूपितं लक्षणास्वरूपमेवात्र स्वीकृतम्, परन्तु लक्षणास्वरूपाशयप्रतिपत्तिस्तथा लक्ष्यार्थोपस्थितिक्रमनिर्णयोऽत्र विशेषः। आचार्यो मम्मटः काव्यप्रकाशे लक्षणां निरूपयति-

"मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्।

अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया।।[9]" इति।

मुख्यार्थस्य बाधे, मुख्यार्थस्य योगे च रूढितः प्रयोजनाद्वा यया वृत्त्या मुख्यभिन्नोऽन्योऽर्थः प्रतिपाद्यते सा वृत्तिः लक्षणेति कारिकाशयः। अभिधया प्रतिपाद्यमानानां मुख्यार्थानां परस्परमन्वयेन तात्पर्यवृत्त्याखण्डवाक्यार्थोपस्थित्यभावे मुख्यार्थबाधः, तदैव लक्षणायाः प्रवृत्तिः। लक्षणाप्रवृत्तौ रूढिरथवा प्रयोजनं कारणं भवति। किञ्च लक्षणया प्रतिपाद्यमानो यो मुख्यभिन्नार्थस्तेन लक्षणीयार्थेन मुख्यार्थस्य साक्षात् सम्बन्धो दृश्यते। एवञ्च- मुख्यार्थबाधः, लक्षणीयार्थेन मुख्यार्थस्य साक्षात्सम्बन्धस्तथा रूढिप्रयोजनान्यतरदिति लक्षणास्थले हेतुत्रयं दृश्यते। अत्र मुख्यार्थबाधमुख्यार्थयोगयोर्दण्डचक्रादिन्यायेन मिलितयोरेव कारणत्वं, रूढिप्रयोजनयोस्तु तृणारणिमणिन्यायेन प्रत्येकमेव कारणत्वमिति विशेषः। "गङ्गायां घोष" इत्यत्र लक्षणया गङ्गातीररूपलक्ष्यार्थस्य प्रतीतौ गङ्गाप्रवाहे आभीरपल्ल्यवस्थानासम्भवाद् मुख्यार्थबाधः, गङ्गाप्रवाहरूपमुख्यार्थगतशैत्यपावनत्वादिधर्माणां गङ्गातीररूपलक्ष्यार्थे प्रतीतिरूपप्रयोजनं तथा गङ्गातीरात्मकलक्षणीयार्थेन प्रवाहात्मकमुख्यार्थस्य सामीप्यात्मकसाक्षात्सम्बन्ध इत्यंशत्रयं समुपलभ्यते। अत्र लक्षणीयार्थो मुख्यार्थसम्बन्ध्यपि मुख्यार्थभिन्न एव भवति। लक्षणावृत्त्या रूढिप्रयोजनान्यतरानुगुणं मुख्यार्थभिन्नार्थः समुपस्थाप्यते, ततश्चोपस्थितानामर्थानां परस्परमन्वये शाब्दबोधो जायत इति भावः। अथ मुख्यार्थबाधे सति लक्षणा, अर्थाद् मुख्यार्थानामुपस्थित्यनन्तरमेव लक्षणाप्रवृत्तिः सम्भवति। अतो लक्षणावृत्तेः पूर्वमवश्यमेवाभिधायाः प्रवृत्तिर्भवति, अत एव "अभिधापुच्छभूता लक्षणा" इति विद्वांसोऽभिवदन्ति। अत्र मतेऽपि वृत्तिः पदपदार्थसम्बन्धरूपा एव। ततः शक्यार्थसम्बन्धो लक्षणेति सम्बन्धात्मकत्वाल्लक्षणापि वृत्तिरिति साहित्यसमयः।

शाब्दिकाशयः-लक्षणास्वरूपविषये वैयाकरणनिकाये नैके विशेषाः परिलक्ष्यन्ते। शाब्दिकैर्लक्षणाया वृत्तित्वाभावः सिद्धान्तितः। तत्र प्राचीनवैयाकरणा लक्षणायाः साक्षादभावमेव प्रतिपादयन्ति। शक्तिग्राहकशिरोमणिना व्यवहारेण यथा मुख्यार्थस्योपपत्तिर्जायते तथा लक्ष्यार्थोऽपि उपपद्यते। अतो लक्ष्यार्थप्रतीतये पृथक् लक्षणावृत्त्याः स्वीकारोऽनावश्यक इति प्राचीनाशयः। जलप्रवाहरूपार्थप्रतीतये यथा गङ्गापदप्रयागात्मको वृद्धव्यवहारो दृश्यते तथा गङ्गातीररूपार्थप्रतीतयेऽपि वृद्धैर्गङ्गापदं प्रयुज्यत एव। अतः शक्यलक्ष्ययोरुभयोरप्यर्थयोः गङ्गापदप्रयोगसम्भवात् जलप्रवाहरूपशक्यार्थ इव तीररूपलक्ष्यार्थेऽपि गङ्गापदस्य शक्तिः सिध्यति। एवञ्च शक्त्यैव मुख्यार्थवत् लक्ष्यार्थोऽपि बुध्यत इत्यतो लक्ष्यार्थोपपत्तये पृथक् लक्षणावृत्त्याः स्वीकारो न युक्तः। अपि च, लक्षणाया अनङ्गीकारे लाघवमपि। घटपदशक्तिमजानतः प्रत्यक्षेणापि घटरूपार्थावबोधाभावात् शाब्दबोधं प्रति

[7] मणिप्रभाशिखामणिसहिता वेदान्तपरिभाषा, पृष्ठम्-286

[8] रसगङ्गाधरः, पृष्ठम्-145

[9] काव्यप्रकाशः, कारिका-9

वृत्तिज्ञानाधीनपदजन्यपदार्थोपस्थितिः कारणम्। एवञ्च मुख्यार्थघटितशाब्दबोधं प्रति शक्तिज्ञानाधीनपदजन्यपदार्थोपस्थितिः कारणम्, लक्ष्यार्थघटितशाब्दबोधं प्रति लक्षणाधीनपदजन्यपदार्थोपस्थितिः कारणमिति पदजन्यपदार्थोपस्थितौ कार्यकारणभावद्वयं स्वीकार्यम्। लक्षणाभावे तु शक्तिज्ञानाधीनपदजन्यपदार्थोपस्थितिरूपेण एकेनैव कारणेन शक्यलक्ष्योभयबोधोपपत्तेः कार्यकारणभाव एक एवेति लाघवम्। किञ्च कार्यकारणभावद्वयकल्पने व्यभिचारस्तथा अनन्तकार्यकारणभावप्रसङ्गोऽपि। अतो लाघवाद् अदुष्टत्वाच्च लक्षणाभावपक्ष एव स्वीकर्तव्य इति लक्षणावृत्तेरभाव एव प्राचीनवैयाकरणैः सिद्धान्तितः। शाब्दबोधजनकज्ञानविषयपदपदार्थसम्बन्धत्वं वृत्तित्वमिति वृत्तिस्वरूपं प्राचीनैरपि स्वीकृतम्, परन्तु अत्र मते लक्षणैव न स्वीक्रियत इति न कापि लक्षणा नापि तस्या वृत्तित्वमिति प्राचीनवैयाकरणानामाशयः।

नव्यवैयाकरणानां मते लक्षणाया अस्तित्वमस्ति परन्तु वृत्तित्वं नास्तीति विशेषः। "सर्वे सर्वार्थवाचकाः" इति वचनात् शक्त्यैव शक्यलक्ष्योभयबोधापत्तेः लक्षणोच्छेदे इष्टापत्तिरिति प्राचीनैः समाहितम्। परन्तु –"योगिनां सर्वार्थवाचकत्वज्ञाने सत्यप्यस्मदादीनां तदभावात्[10]" व्यवहारेषु सङ्केतितान्यस्यार्थस्य बोधार्थं विलक्षणा वृत्तिः काचिदावश्यकीति नव्यवैयाकरणानां मतम्। अतो लक्षणेति अप्रसिद्धशक्तिविशेषः स्वीकृतः। शक्त्या मुख्यार्थोपस्थितिः ततः अन्वयसिद्धौ शाब्दबोध इति साधारणतः क्रमः। तत्र मुख्यार्थोपस्थित्यनन्तरम् अन्वयानुपपत्तौ मुख्यार्थस्य यः सम्बन्धस्तद्विषयकज्ञानेनोद्बुद्धो यः संस्कारविशेषस्ततो जायमाने बोधे लक्षणेति व्यवह्रियते। अन्वयानुपपत्तिर्वस्तुतः अन्वये सत्येव ज्ञायते, अतस्तात्पर्यानुपपत्तेरेव लक्षणाबीजत्वं न तु अन्वयानुपपत्तेः[11] इति अन्यत्रापि प्रतिपाद्यते। अथ नव्यमते लक्षणेति शक्तिविशेषः स्वीक्रियत इत्येतावता समायातम्, परन्तु अयं शक्तिविशेषः अप्रसिद्ध इति विशेषः। शाब्दबोधजनकज्ञानविषयपदपदार्थसम्बन्धस्य वृत्तित्वेन प्रसिद्धिः, नव्यमते तु शक्यतावच्छेदकारोप एव लक्षणा[12]। आरोपश्च न सम्बन्ध इति कृत्वा लक्षणाया वृत्तित्वमत्र निराकृतम्। एवञ्च "गङ्गायां घोषः" इत्यादौ गङ्गापदशक्यार्थो गङ्गाप्रवाहः, शक्यतावच्छेदकस्य प्रवाहत्वस्य गङ्गातीरे आरोपः क्रियते तदनु व्यञ्जनया गङ्गाप्रवाहगतशैत्यपावनत्वादिधर्मा अपि तीरे प्रतीयन्त इति नव्यानामाशयः। एवञ्च शक्यार्थेनैव शब्दस्य सम्बन्धो भवति, क्वचिद् निमित्तात् तात्पर्यं भिद्यते। अत उक्तं वाक्यपदीये – "अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः[13]।।" इति। अपि च लक्षणायाः शक्यतावच्छेकारोपात्मकत्वादेव "गङ्गायां मीनघोषौ" इत्यादौ द्वन्द्वसमास उपपद्यते। समुदायार्थस्य एकधर्मावच्छिन्नेनान्वये सत्येव द्वन्द्वः सिध्यति, ततः प्रकृते गङ्गातीरेऽपि प्रवाहत्वस्यारोपेण प्रवाहत्वैकधर्मावच्छिन्नेन गङ्गाप्रवाहेण मीनघोषसमुदायस्यान्वयाद् द्वन्द्वः सिध्यति। लक्षणाया आरोपरूपत्वेन स्वीकाराभावे तु प्रवाहत्वं तीरत्वमिति धर्मद्वयावच्छिन्नो गङ्गापदार्थ इति कृत्वा द्वन्द्वो नोपपद्येत इति भावः। किञ्च, लक्षणायाः पृथग्वृत्तित्वे मीनांशेऽभिधाया घोषांशे लक्षणाया इति वृत्तिद्वयस्य युगपदप्रवृत्तेः शाब्दबोधोऽपि न सम्भवेदिति बोध्यम्। अतो लक्षणेति कश्चिदप्रसिद्धशक्तिविशेषोऽस्ति परन्त्वस्या वृत्तित्वं नास्तीति नव्यवैयाकरणैः सिद्धान्तितम्।

विमर्शः- एतावता भिन्नानां सम्प्रदायानां मतानुसारं लक्षणायाः स्वरूपं तथा लक्षणाया वृत्तित्वं स्वीकृतं न वेति विषये आलोचनं प्रस्तुतम्। सम्प्रति तत्तन्मतदिशा लक्षणाया वृत्तित्वावृत्तित्वविषये विचारः प्रस्तूयते -

i. लक्षणायाः शक्तावन्तर्भावे सति शक्त्या पदार्थोपस्थितिः शक्यार्थबोधे कारणमित्यवेवम् एकमेव कार्यकारणभावेन शक्यलक्ष्योरुभयोरपि निर्वाहसम्भवः। लक्षणायाः पनुः पृथग्वृत्तित्वे तु लक्षणया पदजन्यपदार्थोपस्थितिः लक्ष्यार्थबोधे कारणमिति कार्यकारणभावान्तरस्य कल्पने गौरवमिति प्रतिपादितम्। परन्तु शक्यार्थप्रतीतौ पदप्रयोगानन्तरं यथा झटित्येवार्थबोधः शाब्दबोधश्च जायते, न तथा लक्ष्यार्थविषये दृश्यते। अत्र प्रथमस्तरे शक्यार्थस्य प्रतीतिः ततो मुख्यार्थबाधो तदनन्तरं लक्ष्यार्थप्रतीतिरिति मुख्यार्थबाधपुरःसरं शाब्दबोधो भवति। अपि च लक्ष्यार्थप्रतीतौ मुख्यार्थबाधः सर्वत्रैव दृश्यते, तस्मात् लक्षणास्थले तात्पर्याद्यनुपपत्तिप्रतिसन्धानपुरःसरं विलम्बेन बोधो भवति। कार्यकारणभावस्यैकत्वे शक्यलक्ष्ययोरुभयोर्विषये समाना पदार्थोपस्थितिप्रक्रिया उचिता, परन्तु लक्ष्यार्थविषये वैशिष्ट्यदर्शनात् अस्त्येव वैलक्षण्यम्। अतः अवश्यमेव पृथक्कार्यकारणभावः स्वीकर्तव्यः। उभयपक्षे साम्याच्च अस्तु लक्षणायाः पृथग्वृत्तित्वमपि।

ii. शक्यतावच्छेदकारोपो लक्षणेति यद्यप्युच्यते, वस्तुतो शक्यतावच्छेदकारोपः शक्यसम्बन्धस्यैव फलमिति न्यायादिमतेऽपि न वैलक्षण्यम्। शक्यार्थेन सह सम्बन्धसत्त्व एव तीराद्यर्थे शक्यतावच्छेदकस्य आरोपः सम्भवति। "सा शब्दस्यार्पिता स्वाभाविकेतरा ईश्वरानुद्भाविता वा शक्तिर्लक्षणा नाम"[14] इति व्याख्यया विश्वनाथाचार्य एतदेव सङ्केतयति। अपि च, अभिधा वाच्यवाचकसम्बन्धः, अस्य फलं सङ्केतितार्थबोधः; लक्षणा शक्यसम्बन्धः अस्य फलं लक्ष्यार्थबोधः – इत्येव युक्ततरम्। तथा सति व्यवस्थापि सम्यक् निर्वोढुं शक्यते।

iii. "गङ्गायां मीनघोषौ" - अत्र प्रकरणम् अन्वेषणीयम्। शङ्कामात्रोपस्थापनाय एवं प्रयोगो नोचितः। सर्वमेव वाक्यं सप्रकरणं भवति, जगति प्रकरणं विना किमपि वाक्यं न प्रवर्तते। "गङ्गायां घोषः" इत्यादि वाक्यमपि सप्रकरणमस्ति। किञ्चित्तत्र प्रकरणमस्ति, तादृशवाक्यप्रवृत्तौ। एवमालोच्यमाने "गङ्गायां मीनघोषौ" इत्यत्र किं प्रकरणमिति आदौ चिन्तनीयम्। यतो हि "गङ्गायां घोषः" इति वाक्ये वक्तुः मुख्यार्थबाधो भवत्विति विवक्षा स्पष्टतयास्ति, यतो ह्यत्र घोषस्य माहात्म्यं प्रकटनीयमस्ति, तद्दिशा एतादृशं वाक्यं वक्त्रा प्रयुक्तमस्ति। किन्तु प्रकरणं यदा भिन्नं भवति तदा कदाचित् मुख्यार्थबाधो न

---

10 वैयाकरणसिद्धान्तलघुमञ्जूषा, पृष्ठम्-199

11 "वस्तुतस्तात्पर्यानुपपत्तिरेव तद्बीजम्", वैयाकरणसिद्धान्तलघुमञ्जूषा, पृष्ठम्-191

12 "परे तु आरोपितशक्यतावच्छेदकरूपेण शक्त्यैव तत्पदवाच्यत्वेन प्रसिद्धान्यव्यक्तिबोधे व्यक्तिविशेषबोधे वा लक्षणेति व्यवहारः", वैयाकरणसिद्धान्तलघुमञ्जूषा, पृष्ठम्-217

13 वाक्यपदीयम्, द्वितीयकाण्डम्, कारिका-255

14 साहित्यदर्पणः, पृष्ठम्-36

भवति। यथा - महान् जलप्रवाहो वर्तते, येन पूर्णो ग्राम एव आप्लुतो जातोऽस्ति, जले ग्रामो मज्जन्नस्ति। तत्काले "गङ्गायां घोषः" इति वाक्यप्रयोगस्य मुख्यार्थबाधविवक्षा अवश्यमेव न भवति। एवं वक्तुर्विवक्षानुसारेण मुख्यार्थबाधादि भवति। अतो "गङ्गायां मीनघोषौ स्तः" इति वक्तुकामस्य कोऽभिप्राय इत्यन्तं प्रश्नार्हं भवति। यादृशं वाक्यं लोके वक्तुमेव न शक्यमस्ति तादृशं वाक्यं स्वीकृत्य आलोच्यमाने किमपि न लभ्यते। तस्मात् - "गङ्गायां मीनघोषौ" इति वक्तुराशयः प्रथमं स्पष्टीकरणीयः अस्ति, तत एव अत्रायमभिप्रायः, लक्षणा च प्रवर्तते अथवा न प्रवर्तते इत्यादि विभागेन वक्तुं शक्यते। बौद्धिकस्तरे यत्किञ्चित् स्फुरति ततः यः कश्चनार्थश्च परिकल्पयितुं शक्यः। परन्तु स एवार्थः प्रायोगिकस्तरे सम्भवति न वेति तु चिन्तनीयम्। व्यञ्जनावृत्तावपि "गतोऽस्तमर्कः" इत्यादिकं यद्वाक्यं तत्र "अयं व्यङ्ग्यार्थः" इति वक्तुं प्रकरणादिकमावश्यकमस्ति। प्रकरणं किञ्चिद्भवति, वस्तुतः सूर्योऽस्तं गच्छन्नेव तिष्ठति, कश्चिज्जनः कञ्चिज्जनं प्रति कथयति - "पश्यतु सूर्योऽस्तं गत" इति, तत्र अन्यार्थविवक्षैव नास्तीति कृत्वा, प्रकरणबलाद् अन्योऽर्थः विवक्षितो नास्तीति स्पष्टमनुभूयते। तस्मादत्र व्यङ्ग्यार्थोऽपि कश्चिन्न स्फुरति। एवं प्रकरणं वाक्यस्य अत्यन्तं प्रधानं नियामकं भवति, तेन लक्षणास्मिन् प्रकृतवाक्ये ग्राह्याथवा अग्राह्येति वयं प्रकरणेनैव निश्चयं प्राप्नुमः।

iv. "गौतमोऽप्याह – सहचरण – स्थान – तादर्थ्य – वृत्तमान – धारण – सामीप्य - योगसाधनाधिपत्येभ्यो ब्राह्मण-बालकटराजसक्तुचन्दन-गङ्गाशकटान्नपुरुषेष्वतद्भावेऽपि तदुपचारः"[15] इति वैयाकरणसिद्धान्तलघुमञ्जूषायां प्रतिपादितम्। अत्र अतद्भावेऽपि इत्यस्य तच्छब्दाशक्यत्वेऽपि इत्याशयः। तदुपचारः इत्यस्य तच्छब्दव्यवहारः इत्यर्थः, तच्छब्दशक्यत्वस्योपचार आरोपो वेति आशयः। एवं प्रतिपाद्य, गौतमाचार्येणापि लक्षणायाः शक्यतावच्छेदकारोपत्वस्वरूपत्वं स्वीकृतमिति शाब्दिकाः प्रतिपादयन्ति। एवम् "अत एव "पुंयोगादाख्यायाम्"(४/१/४८) इति सूत्रे भाष्ये गोपीत्यादौ गोपसम्बन्धिस्त्रीत्वेन लक्षणायां "तस्येदम्"(४/३/१२०) इति शास्त्रेण तादृशेऽर्थेऽण्प्रत्ययान्तस्यैव तादृशवाक्यस्यैव वा साधुत्वनियमादसाधुत्वापत्तिं दूषणमभिधाय "नावश्यमयमेवाभिसम्बन्धो भवति तस्येदमिति, किन्तु तन्मूलकः सोऽयमित्यप्यभिसम्बन्धोऽस्ति" इत्युक्त्वा "चतुर्भिः प्रकारैरतस्मिन् स इत्येतद्भवति तादर्थ्यात्, ताद्धर्म्यात्, तत्सामीप्यात्, तत्साहचर्यात्, मञ्चा हसन्ति, सिंहो माणवकः, गङ्गायां घोषः, यष्टीः प्रवेशय" इत्युक्तम्"[16] (२१७) इत्येवं भाष्यकारवचनमपि तत्र उद्धृतम्। तद्रीत्या च लक्षणायाः शक्यतावच्छदकारोपत्वेनैव बोधो भवतीति व्याख्यातम्। परन्तु गौतमाचार्याणां भाष्यकाराणाञ्च वचनस्य शक्यसम्बन्धस्य फलं शक्यतावच्छेदकारोप इत्यर्थे एव तात्पर्यमित्यपि व्याख्यतुं शक्यते। अतः शक्यतावच्छेदकारोप एव लक्षणा, अस्या न पृथग्वृत्तित्वमिति विषये आप्तवचनमपि किञ्चित् प्रमाणत्वेन स्वीकर्तुं न शक्यते।

v. पदतदर्थयोः सम्बन्ध एव शक्तिः वृत्तिरिति वा सर्वैरेव दार्शनिकैः स्वीकृतम्। शाब्दिकदिशा लक्षणायाः शक्यतावच्छेदकारोपत्वात्मकत्वस्वीकारे तु लक्षणायाः शक्तित्वेन व्यवहारो न सम्भवति, लक्ष्यस्थले शक्यतावच्छेदकस्य आरोपात्, आरोपस्य असम्बन्धात्मकत्वात्, असम्बन्धस्य च अशक्तित्वात्। परन्तु लक्षणायाः पृथग्वृत्तित्वं प्रसिद्धम्। अतः लक्ष्यार्थप्रतीतौ शक्यतावच्छेदकारोपस्य स्वीकारे न दोषः किन्तु लक्षणायाः शक्यतावच्छेदकारोपत्वमेव स्वरूपमिति स्वीकारे लोकव्यवहारविरोध इति बोध्यम्।

vi. वस्तुतः सम्बन्धे शक्तिरिति रूढिः, अतो लक्षणायाः सम्बन्धात्मकत्वं ततः पृथक् वृत्तित्वं शक्तित्वं वा - इति प्रतिपादने एव न कापि हानिः।

vii. अपि च - वाच्यार्थः, लक्ष्यार्थो व्यङ्ग्यार्थ इति भेदेऽपि अर्थ एक एव, तत्र उपाधिभेदात् वाच्यत्वादिभिः व्यवहारो भवति। एकैकस्य चार्थस्य भिन्नं वैशिष्ट्यं भवति, तन्मध्ये तत्तदर्थप्रतिपादकशक्तीनां स्वीकारः। अतो वाच्यर्थविषये यथा पृथग्वृत्तिः अभिधा, व्यङ्ग्यार्थविषये यथा व्यञ्जना पृथग्वृत्तिः तथैव लक्ष्यार्थविषयेऽपि लक्षणारूपपृथग्वृत्तेः स्वीकार एव युक्ततर इति तत्त्वममिति शम्।

परिशीलितग्रन्थसूची

1. वैयाकरणसिद्धान्तलघुमञ्जूषा, (प्रथमो भागः), आचार्यश्रीरामप्रसादत्रिपाठी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1990 ।
2. साहित्यदर्पणः लक्ष्मीटीकोपेता, आचार्यः कृष्णमोहनशास्त्री, चौखम्भा संस्कृत संस्थान, वाराणसी, वि.सं-2075।
3. शक्तिवादः, आचार्य दामोदरशास्त्री, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, 1986 ।
4. मीमांसान्यायप्रकाशः, अभ्यंकरोपाह्ववासुदेवशास्त्री, भाण्डारकर ओरियन्टल् रिसर्च सेन्टर, पूना, 1937 ।
5. शब्दशक्तिप्रकाशिका, प० ढुण्ढिराजशास्त्री, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, 1991 ।
6. ध्वन्यालोकः, पण्डितपट्टाभिरामशास्त्री, चौखम्बा संस्कृत सीरिज आफिस, वाराणसी, 1940 ।
7. भूषणसारतत्त्वप्रकाशिका, आचर्यः कं. वे. रामकृष्णमाचार्यः, राष्ट्रियसंस्कृतविद्यपीठम्, तिरुपतिः, 2010 ।
8. रसगङ्गाधरः (प्रथमो भागः), प० केदारनाथ ओझाः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1981 ।
9. वैयाकरणभूषणसारः, प्रो. आद्याप्रसादमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 2016 ।

****

[15] वैयाकरणसिद्धान्तलघुमञ्जूषा (प्रथमो भागः), पृष्ठम् - 228
[16] वैयाकरमसिद्धान्तलघुमञ्जूषा (प्रथमो भागः), पृष्ठम् - 217

19. स्तोत्रलक्षणम्, वेदान्तदेशिककृतदशावतारस्तोत्रञ्च भगवद्भक्तानामवतारोद्देश्यम्

Dr. B. Keshavaprapanna pandey

Assistant Professor, Dept of Sanskrit

Dwaraka Doss Goverdhan Doss Vaishnav college

Arumbakkam, Chennai – 106

Email- keshavaprapanna@gmail.com

Phone no - 8124970316

श्रियःपतिरवाप्तसमस्तकामः समस्तकल्याणगुणगणः जगज्जन्मादिकारणं परात्परः परमपुरुषः परब्रह्माभिधानः परमं पदमधितिष्ठन् चेतनोज्जिजीविषया सिसृक्षुस्तान् करणकलेबरैः संयोज्य विधिनिषेधपराणि शास्त्राणि तदुपदेष्टारमाचार्यं च प्रदाय शरणापन्नजीवेषु विद्यमानातिशयप्रीत्या श्रुत्यादिज्ञानमुपदिशति ।

तथापि स्वेच्छाप्रवृत्तिमतो विरुद्धानुष्ठानपरांश्च चेतनान् स्वधर्मे प्रवर्तयितुकामो भगवान् नरो नारायणश्च भूत्वा भूमावतीर्य शिष्याचार्यधर्मान् स्वयमनुष्ठाय प्रादर्शयत् । पुनश्च नैकधावततार तानेतान् सत्पथे प्रवर्तयितुं पौनःपुन्येन । तत्रापि असाधारणैः धर्मैरस्य परत्वं विज्ञाय अभाग्याश्चेतनाः सुदूरङ्गताः । ततश्च मनुष्यसजातीयोऽजनि रामकृष्णादिरूपेण । तत्रापि ते मनुष्यास्तं भगवन्तं नैवागणवन्, यतोऽसौ अतिमानुषैः समुद्रादिभिः व्यापारैः निहीनैरपि कपिस्नेहादिभिः कदाचित् स्वस्य परत्वं अन्यदावरत्वञ्च प्रकटीचकार । एवं सर्वथैव भगवत्प्रवृत्तिप्रतिकूलवृत्तान् चेतनान् पुनरुद्धर्तुकामः स भगवान् सुसूक्ष्मं विचिन्त्य नित्यधाम्नि विद्यमानान् कांश्चन नित्यचेतनान् विशेषतोऽभिवीक्ष्य, तानिमान् संसारिमध्ये प्रवेश्य, वश्यैरेव गजैः मत्तमतङ्गजान् इव एभिः महात्मभिरेव एतान् संसारविषयमग्नान् स्वायत्तीकर्तुं प्रायतत ।

ते तु भगवतो निर्हेतुककृपया सन्तीर्णतन्मायाः साक्षात्कृतयथावस्थित- तत्त्वहितपुरुषार्थज्ञानाः भगवत्पारतन्त्र्यकाष्ठानिष्ठाःनित्यानन्दानुभवयोग्यानपि संसारेषु नितरां क्लिश्यमानचेतनानुद्वीक्ष्य सुपथा प्रवर्त्य ननन्द भगवान्तं नन्दयन्ति नितराम् । एवं **'स्वासाध्ये कर्मणि सिद्धहस्ता इमे'**[1] इति किल भगवान् एतेषु आचार्यवरेषु विशेषतोऽनुरक्तो भवति । तेषु शठकोपादिद्वादशसूरयः, भगवद्रामानुजवेदान्तदेशिकप्रभृतय आचार्याः, भक्तिसिद्धान्तप्रवर्तकाः जयदेवादयो भगवद्भक्ताः प्रसिद्धा भवन्ति । प्रकृते तु आचार्यवेदान्तदेशिकैरनुगृहीतं दशावतारवैलक्षण्यं पश्यामः ।

स्तोत्रकाव्यस्य श्रेष्ठता-

सर्वास्वपि भाषासु स्तोत्रसाहित्यस्य त्वप्रतिमं किञ्चन स्थानं भवत्येव तत्रापि संस्कृतस्तोत्रसाहित्यस्य तु वैशिष्ट्यं वाचामगोचरम् । स्तोत्रकाव्येषु कवयो भक्तिभावेन भगवन्महिमवर्णनपुरस्सरं हृद्गतकोमलभावानां हृदयस्पर्शवर्णनम्, अभ्यर्थनां, शरणागतिं वा कृत्वा तं सन्तोषयन्ति स्वकीयया चामत्कारिण्यया वाण्या। तादृशेषु स्तोत्रेषु प्रायशः करुणशान्तरस एव प्राधान्येन दरीदृश्यते। तत्र स्तोत्राणि प्रायः भगवद्गुणानाश्रित्यैव भवन्ति अतस्तत्र करुणारसनिष्यन्दोऽधिकतया प्रकाशते । तत्र **"गुणिनिष्ठगुणाभिधानं स्तोत्रम्"**[2] इति स्तोत्रस्य लक्षणम् प्रोक्तम्। स्तोत्रं नाम गुणकीर्तनेन वर्ण्यस्य मनस आह्लादकरत्वम्। कस्यचित् स्थितस्य गुणस्य वर्णनम्, अपि च नैष्ठ्येण अविद्यमानस्य गुणस्य कीर्तनमपि स्तोत्रमिति वदन्ति केचित् परं भगवद्विषये नैवोपपद्यते हि तत् तस्य गुणाकरत्वात् । स्तोत्रसाहित्यं तु वेदादेव प्रारभ्यते। स्तोत्राणि पुरणेतिहासेषु बहूपलभ्यन्ते। अपि च काव्यनाटकेष्वपि स्तुतिपरकाः श्लोकाः स्तोत्राणि च उपलभ्यन्ते। अतः प्रायः काव्यनाटकेषु मङ्गलाचरणानि स्तुत्या एव प्रारभ्यन्ते आशीर्नमस्क्रियारूपेण ।

स्तोत्रलक्षणम् -

तत्र **स्तोत्रशब्दस्य व्युत्पत्तिः स्तूयते** इति स्तोत्रम्। अस्य स्तवः, स्तोत्रम्, नुति इत्यादयः पर्यायशब्दाः भवन्ति । स्तुधातोः स्तुति इत्यर्थः। तथा स्तुधातोः ष्ट्रन् इति प्रत्यये कृते 'स्तोत्रम्' इति कश्चन शब्दः निष्पन्नो भवति। अपि च अमरकोशानुसारं स्तुधातोः अप् प्रत्ययस्य योगे स्तव इति अर्थः अपि च स्तु धातोः क्तिन् प्रत्यये जाते स्तुतिः इत्येतादृशाः पर्यायशब्दाः जायन्ते नाम ।

वेदन्तदेशिकवैभवम् –

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी ।

वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि[3] ॥

1269 तमे वर्षेऽवतीर्णानां श्रीसम्प्रदाये प्रतिष्ठितवैष्णवाचार्यत्वेन ख्यातानां श्रीमद्वेदान्तदेशिकानां वैष्णवसंप्रदायपरकानि विरचितानि शतशः स्तोत्राणि श्रीसंप्रदाये महद्विशेषस्थानमावहन्ति । तत्र श्रीमद्वेदान्तदेशिकानां भगवत्स्तोत्राणि बहुषु प्रकारेषु रचितानि दृश्यन्ते । एतेषामाचार्यवर्याणां स्तोत्राणि प्रायशः

[1] गुरुपरम्परा.प्र पृ –सं -32
[2] वि.स.ना.व्याख्याने पृ.सं 55
[3] देशिक.स्तो.मा. 1

भक्तिपराणि अथवा श्रीमद्विशिष्टाद्वैतसिद्धान्तवर्णनपरकानि वा सन्ति । यथा श्रीरङ्गादिव्यक्षेत्रेषु अर्चारूपिणो भगवतः श्रीमन्नाराणस्य दिव्यस्वरूपमङ्गलविग्रहध्यानपराणि तत्क्षेत्रमाहात्म्यवर्णनपराणि श्रीरामकृष्णाद्यवतारस्तुतिपरकानि अपि च भगवतो नारायणस्य दिव्यमहिषीणां स्तोत्रपरकानि गुरुपरम्पराप्रभावपरकानि च स्तोत्राणि । एवं स्तोत्रसाहित्यं समस्ततया श्रीमद्वेदान्तदेशिकेन ओतप्रोतमिति कथने न तत्र काप्यतिशयोक्तिः । प्रायेण सर्वविधान्यपि स्तोत्राणि अचार्यैः प्रबोधितानीति स्पष्टमिह ।

तादृशेषु स्तोत्रेषु अखिलाण्डकोटिब्रह्माण्डनायकस्य अनेकदिव्यावतारस्य पुरुषोत्तमस्य परव्यूविभवान्तर्याम्यर्चादिरूपेषु विराजमानस्य श्रीमन्नारायणस्य वेदान्तदेशिककृतदशावतारस्तोत्राख्या संस्तुतिः तस्यैकैकमप्यवतारं संस्तुवन् श्रीवैष्णवसम्प्रदायजगति स्तोत्ररूपेण महता वैभवेण चकास्ति । एवं सुपद्यैरेतैः भगवान् स्तूयते इत्यतः स्तोत्रमिति निष्कर्षः भवति । तत्र भगवतः श्रीमन्नारायणस्य अनेकदिव्यनामसु **'स्तोत्रं स्तुतिः'** इति नाम विद्यते । यथा **"स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता"**[4] इति श्रीविष्णुसहस्रनामस्तोत्रे मुनिना व्यासेन प्रकीर्तितं दृष्टिगोचरीभवति

एवं श्रीमदाचार्यैः कृतेषु स्तोत्रेषु दशावतारस्तोत्रं न केवलं भगवतो नारयणस्यावतारवर्णनं करोति अपि तु तज्ज्ञान-बल-ऐश्वर्य-वीर्य-शक्ति-तेजःसौशील्य-वात्सल्य-मार्दव-आर्जव-कारुण्य-माधुर्य-गाम्भीर्य-चातुर्य-स्थैर्य-धैर्य-शौर्य-पराक्रम-कृतित्व-कृतज्ञताद्यसंख्येय-कल्याण-गुण-गणानपि नितरामास्वादयति इत्यतोऽस्यानितरसाधारणवैभवं लोकोत्तरत्वेन प्रकाशते ।

इदानीम् आचार्यानुगृहीतदशावतारस्तोत्रे विद्यमानं वैलक्षण्यमर्थप्रतिपादनपुरस्सरमुपस्थाप्यत इह । वेदान्तदेशिकप्रसादितदशावतारस्तोत्रपद्यानि चैकैकशः क्रमेणोपस्थाप्य पुनस्तद्विषयवैलक्षणस्यानुभवो भविष्यति । तत्र प्रथमे पद्ये देशिकेन्द्रो दशावतारस्तोत्रारम्भणात्प्राक् रङ्गे धामनि लब्धनिर्भररसैरध्यक्षितो निजकुलधनं कुलदैवतञ्च भगवान् रङ्गनाथो दशावतारत्वेन दशधा भूमिकां निर्वर्तयन् सदा भक्तगणेषु भूतिमातनोत्विति सम्प्रार्थयति ।

आद्यो मत्स्यावतारः –

निर्मग्नश्रुतिजालमार्गणदशादत्तक्षणैर्वीक्षणै-
रन्तस्तन्वदिवारविन्दमहनान्यौदन्वतीस्तामपाम् ।
निष्प्रत्यूहतरङ्गरिङ्गणमिथः प्रत्यूढपाथश्छटा-
डोलारोहसदोहलं भगवतो मात्स्यं वपुः पातु नः ॥[5] २॥

आचार्यो वेदान्तदेशिको भगवतो नारायणस्याद्यावतारं मात्स्यं वपुरनुभवन् मधुकैटभरक्षभ्यां समुद्रतले निगूढितसृष्ट्याधारभूतवेद राशीनामुद्धरणं, तत्र च तत्कृतलीलाश्च वर्णयित्वान्ततः समस्तप्राणिजातं पात्विति प्रार्थयते ।

कूर्मावतारः-

अव्यासुर्भुवनत्रयीमनिभृतं कण्डूयनैरद्रिणा
निद्राणस्य परस्य कूर्मवपुषो निश्वासवातोर्मयः ।
यद्विक्षेपणसंस्कृतोदधिपयः प्रेङ्खोलपर्यङ्किका-
नित्यारोहणनिर्वृतो विहरते देवः सहैव श्रिया[6] ॥2 ।।

द्वितीयेनानेन पद्येन वेदान्तदेशिको भगवतो नारायणस्य जयदेवानुभूतसमानमवतारमनुभवति । तस्य श्रिया सहानपायित्वमुपादयन् तत्पृष्ठधृतमन्दराचलेन तच्छरीरसुखकण्डूयनं तेन च महोदधौ त्रिलोकपरिपालनपूर्वकतत्सुखशयनमभिवर्णितम् ।

वराहावतारः-

गोपायेदनिशं जगन्ति कुहनापोत्री पवित्रीकृत-
ब्रह्माण्डप्रलयोर्मिघोषगुरुभिर्घोणारवैर्घुर्घुरैः ।
यद्दंष्ट्राङ्कुरकोटिगाढघटनानिष्कम्पनित्यस्थिति-
र्ब्रह्मस्तम्बमसौदसौ भगवतीमुस्तेवविश्वम्भरा[7] ॥ 3॥

अत्र तु देशिकाचार्यो लोकरक्षणार्थं महार्णवनिलीनायाः मह्या उद्धरणार्थं भगवत्कृतवराहावतारमनुभवति । भगवद्वराहमूर्तेः शुभ्रहृद्यदन्तस्य कस्मिंश्चित्कोणे देव्या मह्याः वालाग्रभाग इव स्थितिः तत्रैव च ब्रह्मादिस्तम्बपर्यन्तानां जीवानां रक्षणञ्च पर्युपपादि ।

[4] श्रीवि.सहस्रनाम्नि - 86
[5] वेदान्तदेशिककृत द.स्तोत्रे- 1
[6] वेदान्तदेशिककृत द.स्तो 2
[7] वेदान्तदेशिककृत द.स्तो 3

नृसिंहावतारः-

प्रत्यादिष्टपुरातनप्रहरणग्रामक्षणं पाणिजै-
रव्यात्लीणि जगन्त्यकुण्ठमहिमा वैकुण्ठकण्ठीरवः ।
यत्प्रादुर्भवनादवन्ध्यजठरायादृच्छिकाद्वेधसां-
या काचित्सहसा महासुरगृहस्थूणापितामह्यभूत्[8] ॥ 4 ॥

वामनावतारः -

श्लोकेनानेन देशिकेन्द्रस्तु अत्यन्तमत्यद्भुततया स्वभक्तप्रह्लादवाक्यं सत्यापयन्तं भगवन्तं नारसिंहम् अभिस्तौति तत्रैव च स्थाणौ सद्यो धृतनारसिंहदिव्यवपुः भगवतो दिव्यज्वलदुग्ररूपं तन्नखशोभाञ्च वर्णयति ।

व्रीडाविद्धवदान्यदानवयशोनासीग्धाटीभट-
स्त्रैयक्षं मुकुटं पुनन्नवतु नस्त्रैविक्रमो विक्रमः ।
यत्प्रस्तावसमुच्छ्रितध्वजवटीवृत्तान्तसिद्धान्तिभि-
स्स्रोतोभिः सुरसिन्धुरष्टसु दिशासौधेषु दोधूयते[9] ॥ 5

देशिकाचार्यो वामनावतारमनुभवन् त्रिविक्रमावतारेण तत्कृतबलिनिग्रहणं, ततः तत्पादारविन्दविन्दनिस्सृतमन्दकिन्याः जलप्रवाहेण शिवेनात्मनो शिरसि धारणादिकमुपवर्ण्य समस्तानपि प्राणिनो तच्चरणारविन्दाभ्यां पुनात्विति प्रार्थयते ।

परशुरामावतारः -

क्रोधाग्निं जमदग्निपीडनभवं सन्तर्पयिष्यन् क्रमाद्-
अक्षत्लामिह सन्ततक्षय इमां त्रिस्सप्तकृत्वः क्षितिम् ।
दत्वा कर्मणि दक्षिणां क्वचन तामास्कन्द्य सिन्धुं वसन्-
अब्रह्मण्यमपाकरोतु भगवानाब्रह्मकीटं मुनिः[10] ॥ 6 ॥

भगवतो नारायणस्य परशुरामावतारे गर्वितानां शात्रविरुद्धाचारनिष्ठानाम् अत्याचारिणां निष्करुणानां क्षत्रियाणां वधेन सञ्जातरक्तप्रवाहेण भूम्या अस्याः स्नपनम् अर्थात् तेषां शिरश्छेदेन भवस्यास्य तापनिराकरणं स्वीये पद्येऽस्मिन् वर्णयति ततो तादृशदुष्टदमनेन पुनर्धर्मसंस्थापनं कृतवते भगवते भार्गवाय जयो भूयादिति देशिकाचार्या अत्र वर्णयन्ति ततश्च कार्तवीर्यकृतपितृशिरश्छेदशोकसञ्जातक्रोधेन एकविंशतिकृत्वो भूमिममां क्षत्रियविहीनां विधायान्ते कस्मिंश्चिद्यागे सम्पूर्णां भूमिमिमां दक्षिणारूपेण समर्प्याद्यापि महेन्द्रगिरौ वसन्तं भगवन्तं परशुरामं प्रणम्याब्रह्मण्यमापाकर्तुं प्रार्थयते ।

रामावतारः -

पारावारपयोविशोषणकलापारीणकालानल-
ज्वालाजालविहारहारिविशिखव्यापारघोरक्रमः ।
सर्वावस्थसकृत्प्रपन्नजनतासंरक्षणैकव्रती
धर्मो विग्रहवानधर्मविरतिं धन्वी स धन्वीतु नः[11] ॥ 7 ॥

भगवतो नारायाणस्य दशावतारेषु रामावतारोऽयं पूर्णावातरत्वेनानुभाव्यते महर्षिभिः पूर्वाचार्यैः । "**रामो विग्रहवान् धर्मः**" इत्युक्तप्रकारेण भगवान् सक्षाद्धर्मस्वरूप एवाभिप्रेतः । तत्र **'सन्तमेनं ततो विदुरिति'[12]** इति श्रुत्युक्तरीत्या निरुपाधिकसत्पदवाच्यानां यान्यनुष्ठानानि तानि सर्वाण्यपि भगवति रामे मूर्तरूपान्यासन् । रामस्तु प्रमाणैकशरणः आस्तिकाग्रेसरः त्रैविद्यवृद्धः न प्रमाणपथात् मात्रयापि स्खालित्यं क्षमते सोढुमिति ज्ञायते रामायणादिना । तादृशवैभवोपेतं शास्त्रवन्द्यं महात्मभिराचरितानुष्ठानानां प्रामाणैकभूतं भगवन्तं रामम् आचार्यदेशिकः सप्तमावतारत्वेनाभिवर्णयन् तं दुष्टविनाशकं धन्विनं शरणागतसंरक्षणैकव्रतित्वेन सम्बोधयति । स्वयं भगवतैव उक्तञ्च यथा –

सकृदेव प्रपन्नाय तवास्मीति च याचते ।

---

[8] वेदान्तदेशिककृत द.स्तो 4
[9] वे.दा.कृ.द.स्तो 5
[10] वे दा कृ द स्तो 6
[11] वे दा कृ द स्तो 7
[12] तै उपनिषदि

अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं मम[13] ।।

मित्रभावेन सम्प्राप्तं न त्यजेयं कथञ्चन [14] ।।

इत्यादीनि वाक्यानि प्रमाणि ।

बलरामावतारः -

फक्कत्कौरवपट्टणप्रभृतयः प्रास्तप्रलम्बादय-

स्तालाङ्कास्यतथाविधा विहृतयस्तन्वन्तु भद्राणि नः ।

क्षीरं शर्करयेव याभिरपृथग्भूताः प्रभूतैर्गुणैः

आकौमारकमस्वदन्तजगते कृष्णस्य ताः केलयः[15] ॥ 8 ॥

भगवान् बलरामोऽष्टमावतारत्वेनाभिप्रेतः । भगवान् बलरामः स्वपराक्रमेण अधर्मिणो घोरानपि राक्षसान् लीलया यमपुरीं गमयति नाम, तादृशं बलरामं वीक्ष्य तद्भलाघातेन भीता या यमुना नदी हताभा भूय तद्वस्त्रे निगूहति स्म, तादृशविलक्षणमूर्तिं भगवन्तं बलरामम् अष्टमावतारत्वेन संभाव्य तं कौरवपट्टनभीकरत्वेन अपि च प्रलम्बादिराक्षसानां विनाशकत्वेन वर्णयति । तादृशः सदा कृष्णसयाहको भगवान् बलराम नः भद्राणि तनोतु इत्यनेन समापयति ।

कृष्णावतारः –

नाथायैव नमः पदं भवतु नश्चित्रैश्चरित्रक्रमै-

र्भूयोभिर्भुवनान्यमूनिकुहनागोपाय गोपायते ।

कालिन्दीरसिकाय कालियफणिस्फारस्फटावाटिका-

रङ्गोत्सङ्गविशङ्कचक्रमधुरापर्याय चर्यायते[16] ॥ 9 ॥

अस्मिन् पद्ये तु भगावान् कृष्णः नवमावतारत्वेनाङ्गीकृतः । भगवतो नारायणस्यायमप्यवतारः पूर्णावतारत्वेनास्मदाचार्यैः स्वस्वदिव्यग्रन्थेषु पुराणेतिहादिषु च वर्ण्यत इत्यत्र नास्ति संशीतिलेशतोऽपि । आचार्यदेशिकस्त्विह भगवतः श्रीकृष्णस्य कालिन्द्या नद्यास्तीरे तत्प्रवर्तितबाललीलाः, बालमित्रैस्सहाचरितदिव्यमधुरचेष्टितानि, परित्राणाय च साधूनां बाल्ये एव भगववत्कृतकंसादिराक्षसनिग्रहणं, यमुनास्थितं काळियफणिमर्दनादिकं मधुरतया वर्णयति । एवं भगवद्गीताचार्योपदिष्टचरमश्लोकविषयमपि सूक्ष्मतया दर्शयति, यत्र भगवान् **''अहन्त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः[17]''** इत्यादिवाक्येन शरणागतं स्वभक्तं सर्वपापेभ्यो मोक्षयिष्यामिति प्रतिजानीते ।

कल्कि-अवतारः -

भाविन्या दशया भवन्निह भवध्वंसाय नः कल्पतां

कल्की विष्णुयशस्सुतः कलिकथाकालुष्यकूलङ्कषः ।

निःशेषक्षतकण्टके क्षितितले धाराजलौघे ध्रुवं

धर्मं कार्तयुगं प्ररोहयति यन्निस्त्रिंशधाराधरः[18] ॥ 10 ॥

कल्क्यवतारस्तु भगवतो नारायणस्य दशावातारेष्वन्तिमावतारत्वेन परिगणितः यः कलियुगस्यान्ते भावितः । कल्क्यवतारोद्देश्यन्त्वत्र आततायिनां सर्वथा शास्त्रविरुद्धाचारनिष्ठानां दुष्टानां निग्रहणार्थमिति वर्णितम् । विष्णुयशसः पुत्रत्वेनावतीर्य खड्गकरो भगवान् कल्किः समस्तामपीमां भूमिं कलिदोषविहीनां विधाय पुनः धर्मं कार्तयुगं संस्थापयिष्यतीति बाढं स्पष्टयति ।

फलश्रुतिः

इच्छामीन-विहारकच्छप-महापोत्रिन् यदृच्छाहरे

रक्षावामन! रोषराम! करुणाकाकुत्स्थ! हेलाहलिन् ।

क्रीडावल्लभ! कल्कवाहन! दशाकल्किन्निति प्रत्यहं

---

[13] वा रा 6/18/33
[14] श्रीमद्रा.यु का 18/3/5
[15] वे.दे.कृ.द.स्तो 8
[16] वे दे कृ द स्तो 9
[17] भगद्गी.18/64
[18] वे.दे.कृ.द.स्तो 10

जल्पन्तः पुरुषाः पुनन्तु भुवनं पुण्यौघपण्यापणाः[19] ॥

इत्यनेन फलश्रुतिश्श्लोकेन आचार्यो दशावतारपठनेन भक्तेभ्यः जायमानस्य फलस्य विवेचनं करोति । तत्र दशावतारस्तोत्रास्यान्तेऽपि "**जल्पन्तः पुरुषाः पुनन्तु भुवनं पुण्यौघपण्यापणाः**" इति फलश्रुतिं श्रावयति देशिकेन्द्रः। आचार्यस्य भगवतो नारायणस्य दशमूर्तीनामनुग्रहःसदा भूयादिति कामनया विरम्यत इह ।

परिशीलितग्रन्थसूची –

1. देशिकप्रबन्धः
   प्रकाशनम्- श्रीरामदेशिकाचार्य,ओप्पलियप्पन्मन्दिरम्
   द्वितीयसंस्करणम्- 2003 (देवनागरीलिप्याम्)
   चेन्नै,तमिळ्नाडु – 600 004

2. वेदान्तदेशिककृतश्रीमद्रहस्यत्रयसारः
   प्रकाशंनम्-श्रीमत्पुण्डरीकपुराश्रमः
   प्र-संस्करणम्,1960,तञ्जोर् (T.N)

****

[19] वे.दे.कृ.द्.स्तो 13

20. महायानसम्प्रदाये पारमितानां महत्त्वम्

डॉ. प्रदीपकुमारद्विवेदी

बौद्धदर्शनविभाग:

के.सं.वि.वि., एकलव्यपरिसर:,

अगरतला, त्रिपुरा

महायानसाधकानां कृते बोधिचित्तग्रहणान्तरं पारमिताया: सेवनमावश्यकम् भवति। 'पारमिता' शब्दस्य अर्थ: पूर्णत्त्वमस्ति। अस्या: पालिरूपं 'पारमी' इति। अतो निर्वाणप्राप्त्यर्थं षट्पारमिताभावनाऽवश्यकरणीया उक्ता सौगतसाधनापद्धतौ। दानपारमिता, शीलपारमिता, क्षान्तिपारमिता, वीर्यपारमिता, ध्यानपारमिता, प्रज्ञापारमिता चेति षट्पारमिताः। आसां षण्णां पारमितानां साधनात: पूर्व करुणाभ्यास आवश्यक:। यतो हि करुणाभ्यास एव महायानसाधनापद्धतेर्मूलम्। करुणाया: स्वरूपमुपस्थापयता भिक्षुणा अवलोकितसिंहेन निगदितम्-

गुणानामद्वयं श्रेष्ठं विना चित्तेन भूषणम्।

साधूनां दयित नित्यं कारुण्यमिति कथ्यते।।[1]

एवं दया, कृपा, करुणोत्यनर्थान्तरं कोशप्रसिद्धम्। सर्वेषु भूतेषु करुणा मातेव हितकारिणी भवति। पुरुषा यां समाश्रित्योत्तमं सुखं प्राप्नुवन्ति-

कृपा सर्वेषु भूतेषु मातेव हितकारिणी।

यां समाश्रित्य पुरुषा: प्रयान्ति सुखमुत्तमम्।।[2]

देवा अपि एतादृशं दयावन्तं सदावृततं सर्वभूतहिते रतं जनं प्रणमन्ति। अत: सुखार्थिना करुणाभावना सेवितव्या।

मृद्वाशया हि ये मर्त्या: साधुवत काञ्चनोपमा:।

कारुण्यमक्षयं तेषां सदा मनसि वर्तते।।

ते च सत्त्वा: सदोद्युक्ता नित्यं धर्मपरायणा:।

येषां कारुण्यदीपेन हृदयं सम्प्रकाशितम्।।[3]

लोके हि कारुण्यमविनाशि धनं प्रोक्तं महर्षिभि: -

कारुण्यं मुनिभि: शस्त्रं कारुण्यं निर्मलं सर:।

कारुण्यं दोषनिर्घाति कारुण्यं धनमव्ययम्।।[4]

कारुण्यं सर्वदोषनिर्घाति गुणानाञ्च सर्वेषां भूषणम्। धैर्यपरायणे जन: कारुण्यनावमारुह्य महावेगं भवार्णवं लङ्घते। अतो दयारत्नं सदा सेव्यम्। सुखस्य मूलं कृपैव। हृदि यस्य कृपा नास्ति स दु:खी परिकीर्त्यते।

सर्वेषु भूतेषु करुणा हितकारिणी भवति, सन्त: सुखमुत्तमं प्राप्नुवन्ति, सदा सर्वभूतहिते रता: च भवन्ति। अथ च शीलवाक्करुणान्विता: जना: देवलोकमाप्नुवन्ति-

प्रयाति देवलोकं च शीलवान् करुणान्वित:।

कृपान्वित: स पुरुषो चन्द्रमा इव शोभते।।[5]

करुणाभ्यासं सम्पूर्य प्रथमा दानपारमिता भावयितव्या, अनया करुणाभ्यास: पूर्णो भवति, चित्तं च निर्मलं भवति। एवम् एकैकपारमितापूर्त्यनन्तरं क्रमशोऽन्या अपि पारमिता: भावनीया:। शुद्धाशुद्धदानस्य स्वरूपस्थापयता भिक्षुणा अवलोकितसिंहेनोक्तम्-

गुणद्वादशसंयुक्तं मलैर्द्वादशभिर्विना।

दानं भवति शुद्धं तद् विपरीतं सकल्मषम्।।[6]

---

[1] धर्मसमुच्चय:, करुणावर्ग:, का.- 17
[2] धर्मसमुच्चय:, करुणावर्ग:, का.- 01
[3] धर्मसमुच्चय:, करुणावर्ग:, का.- 9-10
[4] धर्मसमुच्चय:, करुणावर्ग:, का.- 13
[5] धर्मसमुच्चय:, करुणावर्ग:, का.- 4

1. दानपारमिता-

लोके हि धनबलमुत्तमं परिगणितम्। तेन धनेन यदि दानं न क्रियते तर्हि स धनवानपि पुरुषोऽधम एवोक्त:। दानं विना केवलाहारकांक्षिण: पुत्रदारावशानुगाश्च पुरुषा: लोभमात्सर्यमलिना भवचक्रे एव भ्राम्यन्ति। अतो लोभग्रन्थिविमोक्षाय याञ्चावक्षक्षयाय च दानमालम्बनीयम्, येन तमो निश्चयनाशो भवेत्। शीलेन परिभाविते दानाम्भसि नर: स्नात्वा दु:खस्य ज्ञानविस्तीर्णविमलं पारं यातुं समर्थ:। आत्मनो हितमिच्छता पुरुषेण स्वस्मै त्रयो दीपा अवश्यं प्रज्वालनीय: दानं, शीलं ज्ञानञ्चेति। यथोक्तम्-

पुरुषेण त्रयो दीपा: प्रज्वाल्या हितमिच्छता।

दानं शीलं तथा ज्ञानमेते दोषविनाशका:।।[7]

एवं दानी भवार्णवं तरति। दानं सुखानुगन्ता मार्ग:। यतो हि दानेन शीले ज्ञाने च मतिर्भवति। अत: शीलरक्षायै ज्ञानप्राप्त्यै, तृष्णानाशाय च साधकेन दाने रति: कार्या। तथाचोक्तम्-

शीलवानपि कालज्ञोऽज्ञानाद्(वा)परिमुच्यते।

दु:खनैर्याणिको मार्ग: शस्तोऽयं मुनिपुंगवै:।।[8]

अयञ्च मनुष्यलोक एव कर्मभूमि:। न देवा दानपतय: श्रुता:। फलभूमिस्तु सुरालय:। दानमाहात्म्येनैव सुरालय: प्राप्तुं शक्यते।

एवं दानमेव सदा प्रशस्तं कर्म। दानेनैव दु:खात् विमुक्तिर्जायते। यावत् तृष्णा तिष्ठन्ति, तावत् ज्ञानिनोऽपि दानशीला: न भवन्ति। लोके सर्वेषु दर्शनेषु सर्वेषु धर्मेषु च सुखावहं दानं एव प्रशस्तं कर्म विद्यते। दानस्य स्वरूपं प्रतिपादयता भगवता श्रीकृष्णेन उक्तम्-

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।

देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्।

यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुन:।

दीयते च परिक्लिष्टं तद्दानं राजसं स्मृतम्।।

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।

असत्कृतमवज्ञातं तत्तामसमुदाहृतम्।। [9]

सुखाय सर्वे जना: सचेष्टा: भवन्ति। सुखं विना दानं कदापि न सम्भाव्यते। दानवशादेव शीलवृद्धि: तृष्णानिवृत्तिश्च जायेते। अदानात् मृत: सन् प्रेतभूमिं सम्प्राप्य क्षुत्पिपासाभ्यां दह्यते। दानरत: सुधार्मिकश्च चक्रवर्तीराजा भवति। दातारो मात्सर्यमलवर्जिता: भवन्ति। अत: देवत्वं पूर्णत्वञ्च प्राप्त्यर्थं दाने स्वाभाविकीप्रवृत्ति: करणीया। लोक: दानेन प्रियत्वमाप्नोति, तुष्टिमधिगच्छति श्रीमान् च भवति जन:। गुरुभ्य: शोभनकर्मभ्य: यद् दीयते तत् सदा सुखाय एव भवति। दानरहित: पापाचारी भवति। दानं मातृवत् पितृवदेव नित्यं सुखावहं भवति-

पञ्चगत्युपपन्नानां सत्त्वानां स्वेन कर्मणा।

मातृवत् पितृवद् दृष्टं दानं नित्यं सुखावहम्।।[10]

इह लोके सुवर्णकंकणैर्युक्त: पुरुष: यदि ध्यानाध्ययननिर्मुक्तो दानशीलविवर्जितोऽस्ति, स जीवनापि मृतवदेव।[11] यस्य दानदीपने ज्ञानप्रदीपेन च हृदयं नावभासितं सोऽज्ञानी मनुष्यचर्मणाच्छन्नोऽपि तिर्यग्भूत एवात्र चरति। किं बहुना, दानहीनो च मर्त्य:, अपि त्वयं प्रेतिविग्रहवानेव मन्तव्य:। एवं दानशीलज्ञानयुतो गुणवानेवात्र लोके महीयते। एतदेव आलक्ष्योपसंहरति-

एतां भूमिमवस्थाप्य सत्त्वो दानरतो भवेत्।

दानशीलता नित्यं मुच्यन्ते भवसङ्कटात्।।[12]

बोधचर्यावतारग्रन्थे आर्यशान्तिदेवेन दानपारमिताविषये उक्तमस्ति-

---

[6] धर्मसमुच्चय:, दानवर्ग:, का.- 1
[7] धर्मसमुच्चय:, दानवर्ग:, का.- 7
[8] धर्मसमुच्चय:, दानवर्ग:, का.- 25
[9] श्रीमद्भगवद्गीता- 17/20, 21, 22
[10] धर्मसमुच्चय:, दानवर्ग:, का.- 47
[11] ज्ञानशीलविनिर्मुक्तो दानरत्नविवर्जित:।
जीवमानोऽपि पुरुषो मृत इत्यभिधीयते।। - धर्मसमुच्चय:, दानवर्ग:, का.- 43
[12] धर्मसमुच्चय:, दानवर्ग:, का.- 48

फलेन सह सर्वस्वत्यागचित्ताज्जनेऽखिले।

दानपारमिता प्रोक्ता तस्मात् सा चित्तमेव तु।।[13]

अर्थात्- सर्वस्वं बाह्याध्यात्मिकं सर्वं वस्तु दानं दानफलं च सर्वसत्त्वेभ्य: परित्यजतोऽभ्यासेन प्रकर्षगमनाद् यदा अपगतमात्सर्यमलं निरासङ्गतया चित्तमुत्पद्यते, तदा दानपारमिता निष्पन्न इत्युच्यते। तस्मात् सा दानपारमिता चित्तमेव, नान्या।

2. शीलपारमिता-

दौ:शील्यम् अशुभं रूपं शीलं तद्विरिति: द्विधा।

बुद्धेन प्रतिषिद्धाच्च परिशुद्धं चतुर्गुणम्।।[14]

एवमशुभं रूपं दौ:शील्यमित्युच्यते। दौ:शील्यविरतिरेव शीलम्। विरतिरस्ति विज्ञप्ति:, येन कर्मणा हेतुभूतेन विरतो भवति। अविज्ञप्ति: स्वविरति कार्यम्। भगवता प्रतिषिद्धात्कर्मणो विरतिरपि शीलम्। यथा विकालभोजनादि विरति:। शीलं परिशुद्धमस्ति, यत इदं चतुर्भिर्गुणै: युक्तम्। तच्च चतुर्गुणं न दौ:शीलविप्लुतं, न दौ:शील्यहेतु विप्लुतं, दौ:शील्यविपक्षस्य सुशीलताया आश्रमभूतं शान्त्याश्रय: दौ:शील्यहेतव: क्लेशा उपक्लेशा:।

वस्तुत: भावना हि चित्तं वासयति। शीलस्य फलं प्रधानत: स्वर्गं प्रहाणमार्गार्था च भावना। उक्तञ्च आचार्यवसुबन्धुना-

दानस्य पूरि: कृपया सर्वेभ्य: सर्वदानत:।

क्षान्तिशीलस्याङ्गच्छेदे सरागस्याप्य कोपत:।।[15]

एवं कृपापुर:सरं सर्वेभ्य: सर्वं दत्त्वा बोधिसत्त्वेन दानपारमिता पूरिता। सरागस्य (अवीतरागस्य) अपि बोधिसत्त्वस्य कोपं विना एव अङ्गच्छेद: क्षान्तिपारमिता: शीलपारमितायाश्च पूर्तयेऽभूत्।

आर्यशान्तिदेवेन उक्तं बोधिचर्यावतारे ग्रन्थे- चित्तमेव शीलपारमिता वर्तते-

मत्स्यादय: क्व नीयन्तां मारयेयं यतो न तान्।

लब्धे विरतिचित्ते तु शीलपारमिता मता।।[16]

अर्थात्- प्राणातिपातादिसर्वावद्यिवरतिचित्तमेव हि शीलम्, न पुन: तदाश्रयभूत-बाह्यविषयनिवृत्तिस्वभावम्। यदि पुन: वधादिविषयवस्तु-अभावेन तत् वधादि-अभावात्-शीलं स्यात्, तदा ते मत्स्यादय: क्व नीयन्तां यत्र तेषां दर्शनं न स्यात्। अन्यथा तद् वधादि-उपक्रमे शीलं न स्यात्। न च एवम्। तस्मात्तेषु विद्यमानेष्वपि लब्धे विरतिचित्ते निवृत्तिमनसिकारे शीलपारमिता मता सम्मता तत्स्वभावविदाम्; तस्मात् सा चित्तमेव शीलपारमिता।[17]

धनानामुत्तमं शीलं सूर्यो ज्योतिष्मतामिव।

विहाय गच्छति धनं शीलं स्थितमिवाग्रत:।।[18]

एवं शीलं सूर्य इव शोभते। यदि चेतनाभावितं दानं शीलं च परिरक्षितं स्यात् तर्हि तेन परिरक्षितेन शीले नैव तथा सुखं प्राप्तुं शक्यते यथा माता पित्रादिभिरपि न दातुं पार्यते। शीलवानेव निर्वाणसुखं प्राप्नोति। शीलेन परिरक्षितो जनो मृत्युकाल उपस्थिते न विभेति, यतो हि शीलं सर्वसौख्यप्रवर्तकमाद्यन्तकल्याणं च वर्तते। शीलवस्त्रेण येच्छन्नास्तेच्छन्ना: पुरुषा: मता:।

शीलं स्वर्गस्य सोपानमस्ति। शीलं निर्वाणसुखगामिकमिति धर्मज्ञै: सङ्केतितम्। अत: शीलवानसंख्यानि सौख्यान्युपभुनक्ति। अत: सर्वसौख्यदायकं शीलं सता पुरुषेणावश्यमेव भावयितव्यम्। एवं दान-शीलयुता दान्ता सर्वभूतहिते रता मैत्रीभावनया युक्ता देवसङ्गतिं यान्ति। शीलवाजिनमारूढा: पुरुषस्तत्त्वचिन्तका अन्ते: देवभवनं तु अवश्यं प्रयान्ति, यतो हि इह लौकिकं पारलौकिकं च सुखं शीलाचाराधीनमेव। अत एवोक्तम्-

स्वगृहं हि यथा मर्त्या: प्रविशान्ति गतव्यथा:।

तथा शीलसमाचारा: प्रयान्ति त्रिदिवं नर:।।

एतत् सुजीवितं श्रेष्ठं यच्छीलपरिरक्षणम्।

मरणानां परं मृत्यु: यच्छीलपरिवर्जनम्।।[19]

---

[13] बोधिचर्यावतार:, का.- 5/10
[14] धर्मसमुच्चय:, पृ.सं. - 203
[15] अभिधर्मकोश:, 4/111
[16] बोधिचर्यावतार:, का.- 5/11
[17] बोधिचर्यावतार:, पृ.सं. - 64
[18] धर्मसमुच्चय:, शीलवर्ग:, का.- 1

शीलं संसारोत्तरणाय प्लवभूतः। शीलाचरणस्य परिणामो निर्वाणसुखम्। परन्तु यः कश्चित् स्वर्गाकाङ्क्षयैव शीलमाचरति, तर्हि तस्य तृष्णाक्षयो न भवति, तेन निर्वाणं ततो दूरमेव स्यात्। अतः भौतिकसुखं प्रति निरपेक्षेण निर्वाणकाङ्क्षयैव शीलमाचरणीयम्-

शीलप्रशस्तसम्बुद्धैर्निवाणपुरगामिकम्।

आयुर्याति ध्रुवं धीमान् नित्यं शीलेन बृंहितम्।।[20]

तच्च शीलं त्रिविधम्- हीनम्, मध्यम् विशिष्टं च। तस्य फलमपि त्रिविधम्- हीनम्, मध्यम्, उत्तमं च। अप्रमादोषबृंहितं शीलं नित्यं सुखदम् इति शीलस्य धर्मता। शीलप्रभा सूर्यसहस्रप्रभामप्यत्येति। यो नरोत्तमः शीलं संरक्षति, स सुगतेन देशितं फलं प्राप्नोति एव।

शीलोद्भवा या विमला प्रभा भवति देहिनाम्।

न सा सूयर्सहस्रस्य संयुक्तस्य भविष्यति।।

शीलं सप्तविधं रम्यं यो रक्षति नरोत्तमः।

स कामं भुङ्क्ते फलं सुगतेन च देशितम्।।[21]

शीलं धनेषु सर्वोत्तमम्। मानवः शीलेन देवलोकं परमं सुखञ्च प्राप्नोति। दुष्चरितं परित्यजति मोहान्धसंसारात् विनिवृत्तो भवति। सदा कार्याकार्यतत्त्वज्ञः शीलवान् भवति। यदि शीलं परित्यजति जनः, तदा नरके गच्छति दुःखञ्चानुभवति। शीलस्य फलं विपुलं सुखमेव। शीलचारी क्षमावान् सुप्रसन्नो भवति। तस्मात् सुप्रसन्नेन मनसा शीलं रक्षणीयम्। मानवाः शीलमाश्रित्य सम्यक्-दर्शनतत्पराः जायन्ते। दानधर्मशीलाः शान्तिमधिगच्छन्ति। सत्यमेतद् यत् शीलाद्दते अन्यत् सुखसाधनं नास्ति। तस्मात् देवसुखं यदि अभीष्टं तर्हि शीलं समाचरेत्। शीलेन रक्षितः पुरुषो देवसानिध्यं गच्छति एव। अतो दौःशील्यं सदा वर्ज्यम्-

तस्माच्छीलं सदा कार्यं दानज्ञानतपोधनैः।

दौःशील्यं च सदा वर्ज्यं विषशस्त्रानलोपनम्।।[22]

3. क्षान्तिपारमिता-

क्षान्तिपारमिता विषये बोधिचर्यावतारग्रन्थकारेण आर्य-शान्तिदेवेन उक्तं, न चित्ताद् भिन्न क्षान्तिपारमितापि इति आह-

कियतो मारयिष्यामि दुर्जनान् गगनोपमान्।

मारिते क्रोधचित्ते तु मारिताः सर्वशत्रवः।।[23]

परापकारादिसम्भवेऽपि चित्तस्य अकोपनता क्षान्तिः। अन्यथा यदि सर्वशत्रूणां तद् विनिपातेन वैरनिर्यातनं कृतवतः केनचिद् वैराभावात् उपशान्तवैरस्य न कश्चिदपकारी स्यात्। इति मर्षणं क्षान्तिः। तदा एतदशक्यानुष्ठानम्। शत्रवो हि गगनसमत्वादपर्यन्ताः, तेषां मारणमशक्यम्। तस्मात् क्रोधादिनिवृत्तिचित्तमेव तेषामुपायेन मारणमिव, तत्कृतापकारस्यागणनात् जन्मजन्मान्तर-वैर-असम्भवात् च मारितप्रायास्ते।[24]

क्षान्तिः, क्षमा तितिक्षा चेति एकस्य एव अर्थस्य विभिन्नाः पर्यायाः। तितिक्षापि निर्वाणगामिनोऽत्यावश्यिकी साधना। तदेव विवृणोति-

क्षमावान् पुरुषः सर्वप्रियो भवति देहिनाम्।

पूज्यते दैवतैर्नित्यं तस्मात् क्षान्तिः परंतप।।[25]

क्षमा हि परमं तप इति भावः। क्षान्त्या यथा भूषितो भवति पुमान्, तथा नेतरैर्धनैरिति क्षान्तिधनं सर्वधनप्रधानम्। क्षमावन्त एव लोके वस्तुतो धनवन्तः भवन्ति। उक्तञ्च भिक्षुणा अवलोकितसिंहेन-

क्षान्तिधनं धनं शीलप्रज्ञावर्धनमेव च।

धनान्यन्यानि शस्तान्ति न हितस्य कथञ्चन।।[26]

क्रोधदोषैः विवर्जितः क्षमायुक्तो पुरुष इह लोक परत्र च सर्वत्र पूज्यते। सद्भिः अपि यशसा क्षमावानेव पूज्यते-

---

[19] धर्मसमुच्चयः, शीलवर्गः, का.- 51, 52
[20] धर्मसमुच्चयः, शीलवर्गः, का.- 15
[21] धर्मसमुच्चयः, शीलवर्गः, का.- 72, 73
[22] धर्मसमुच्चयः, शीलवर्गः, का.- 83
[23] बोधिचर्यावतारः, का.- 5/12
[24] बोधिचर्यावतारः, पू.सं. - 64
[25] धर्मसमुच्चयः, क्षान्तिवर्गः, का.- 2
[26] धर्मसमुच्चयः, क्षान्तिवर्गः, का.- 4

क्षमावान् पुरुषः सर्वैः क्रोधदोषैर्विवर्जितः।

यशसा पूज्यते नित्यमिह लोके परत्र च।।

पूज्यते सततं सद्भिर्यशसा चैव पूज्यते।

क्षमावान् पुरुषः सर्वस्तस्मात् क्षान्तिपरो भवेत्।।[27]

सर्वेषां धनानां सत्यपि विनाशे क्षान्तेः कदापि विनाशो न भवति। निखिलदोषशून्यः इहलोके परत्र च यशसामपि वर्धते। सर्वप्राणिप्रियः क्षमावान् भवति। क्रोधविषयस्य क्षान्ति एव परममौषधम्। सर्वेषां तपसां परमं तपः क्षान्तिरेव। दुःखविघातिका सुखावहा क्षान्ति। इयमेव स्वर्गसोपानभूताः। क्षान्तिरेव शिवात्मिका मातेव हितकारिणी सन्मार्गप्रदायिनी च। एतस्याः क्षमायाः माहात्म्यमेव वर्णितं धर्मसमुच्चयग्रन्थे-

सा गुणौधैः सदा पूर्णा शिवा भवति देहिनाम्।

सा प्रशस्ते सुखे प्राप्ते क्षान्तिः[28] कार्या प्रयत्नतः।

सर्वलोकस्य मातेव सन्मार्गमृतदीपिका।।

4. वीर्यपारमिता-

वीर्यपारमिता तु कुशलोत्साहस्वभावा अतिविस्पष्टं चित्तमेवेत्याह आर्यशान्तिदेवेन बोधिचर्यावतारग्रन्थे-

सहापि वाक्शरीराभ्यां मन्दवृत्तेर्न तत्फलम्।

यत्पटोरेककस्यापि चित्तस्यापि ब्रह्मतादिकम्।।[29]

वचनकायसहितस्यापि चितस्य कुशलपक्षे मन्दप्रचारस्य न तादृशं फलमुपजायते, यादृशं ध्यानादिविषये पटुप्रवृत्तेरेकाकिनोऽपि चित्तस्य फलं ब्रह्मभूयादिकम्। तस्मात् सा वीर्यपारमिता चित्तमेव।[30] मिलिन्दपञ्हपालिग्रन्थे उल्लेखमस्ति- भासितं पेतं, महाराज, भगवता- 'विरियवा खो, भिक्खवे, अरियसावको अकुसलं पजहति, कुसलं भावेति। सावज्जं पजहति, अनवज्जं भावेति; सुद्धमत्तानं परिहरती"ति।[31]

श्री शीलभिक्षु-अवलोकितसिंहः विवरीतुमिच्छति चतुर्थी वीर्यपारमिताम् (वीर्यम्= उत्साहः) - **देशाकालोपपन्नस्य क्रियातिथ्योचित्तस्य च।**

न्यायेनारभ्यमाणस्य वीर्यस्य[32] सकलं फलम्।।[33]

अर्थात् - न्यायदेशक्रियाहीना अधर्मेण विवर्जिताः वीर्येण परिवर्जिताः पुरुषस्य कार्यनिकराः सीदन्ति-

न्यादेशक्रियाहीना अधर्मेण विवर्जिताः।

सीदन्ति कार्यनिकरा वीर्येण परिवर्जिताः।।[34]

आरब्धवीर्याश्च निर्वाणरूपं भवजालमोक्षमधिगच्छन्ति। वीर्यवान् पुरुषो यानि कार्याण्यारभते, तानि समृद्धानि पूर्णानि च भवन्ति। लोकसम्मताः लोकोत्तराश्चार्थाः वीर्येणैव साधयितुं शक्यते। यथोक्तम्-

मन्दवीर्यं चिरोत्साहं सद्धर्मेण विवर्जितम्।

नरो विशति लोकं च शशाङ्कमिव कल्मषम्।।[35]

परन्तु मानवः वीर्येण सद्धर्मे प्रवृत्तो भवति। उत्साहस्य प्राप्तिरपि वीर्येणैव भवति। शक्त्या बोधितत्त्वस्य प्राप्तिः भवति। उक्तञ्च-

वीर्येणावाप्यते बोधिः स्ववीर्येण तथा मही।

अर्हत्त्वं वीर्यवद्भिश्च तस्मान्नाग्निसमागतिः।।[36]

---

[27] धर्मसमुच्चयः, क्षान्तिवर्गः, का.- 3, 5

[28] क्षान्तिस्त्रिविधा। तद्यथा - धर्मनिध्यानक्षान्तिः, दुःखाधिवासनाक्षान्तिः, परोपकारधर्मक्षान्तिश्चेति।
- नागार्जुनस्य धमर्सङ्ग्रहात्। (धर्मसमुच्चयः, पृ.सं.- 213)

[29] बोधिचर्यावतारः, का.- 5/15

[30] बोधिचर्यावतारः, पृ.सं.- 65

[31] मिलिन्दपञ्हपालि, महावग्गो विरियलक्खणपञ्हो।

[32] चेतसः समुत्साहो 'वीयम्'। पुष्यतिष्य-सम्बुद्धस्य एकपादे स्थित्वा सप्ताहोरात्रं स्तुतिः अस्य वीर्यपारमिता पूर्यते। वीर्यं त्रिविधम्। तद्यथा- संनाहवीर्यम्, प्रयोगवीर्यम् परिनिष्ठावीर्यम् च इति। (धर्मसमुच्चयः, पृ.सं.- 214)

[33] धर्मसमुच्चयः, वीर्यवर्गः, का. -1

[34] धर्मसमुच्चयः, पृ.सं.- 2

[35] धर्मसमुच्चयः, वीर्यवर्गः, का. - 6

जरामरणवर्जितमनुत्तमं स्थानं ज्ञानेन लभमानो नर: वीर्यशात् शान्तेन्द्रिय: जायते। स एव न रो यदि वीर्यधनो महोत्साहश्च भूत्वा आर्याष्टाङ्गमार्गेण ज्ञानं परिपालयति, सोऽन्ते परमां गतिं प्राप्नोति-

आर्याष्टाङ्गेन[37]मार्गेण न ज्ञानपरिपालित:।

वीर्यवत्तामहोत्साहो प्रयाति परमां गतिम्।।[38]

अत: साधकेन उत्तमस्थानप्राप्त्यर्थं वीर्यारम्भ मति: कार्या। भिक्षुणा अवलोकितसिंहेन उक्तम्-

तस्मात् देवान् गुणान् मत्वा वीर्यवान् नियतेन्द्रिय:।

वीर्यारम्भे मतिं कुर्यान्नास्ति वीर्यसमर्थनम्।।

वीर्यार्थी स्मृतिमान् यश्च नरो ज्ञानपरायण:।

प्रयात्यनुत्तमं स्थानं जरामरणवर्जितम्।।[39]

5. ध्यानपारमिता-

ध्यानपारमिता पञ्चमी। तां विवृणोति ध्यानम्-एकाग्रता। तथा चोक्तं भिक्षुणा अवलोकितसिंहेन-

असंसक्तमतेर्नित्यं नित्यं ध्यानविहारिण:।

विशुद्धमनसो नित्यमेकाग्रभिरतस्य च।।[40]

आचार्यशान्तिदेवस्य मतमस्ति ध्यानं तु चित्तैकाग्रतालक्षणं चित्तादन्यथा वक्तुमशक्यम् इति आह-

जपास्तपांसि सर्वाणि दीघर्कालकृतान्यपि।

अन्यचित्तेन मन्देन वृथैवेत्याह सर्ववित्।।[41]

अर्थात्- मन्त्राद्यार्वनलक्षण वचनव्यापारा जपा:। तपांसि च इन्द्रियदमनलक्षणा: कायिका:। तानि अतिबहुकालमभ्यस्तान्यपि अन्यत्र सक्तचित्तेन मिद्धाद्युपहितचित्तेन वा। समानपाटवविकलेन इत्यर्थ:। वृथैव निष्फलमेव, अत्यर्थकृशफलत्वात्, अभिमतार्थेऽनुपयोगाद्वा। पुत्रोऽप्यपुत्र एव, पुत्रकार्याकरणाद्यथा। इत्याह भगवान् सवर्ज्ञ:। तस्माद् ध्यानपारमितापि चित्तमेव।[42]

यस्य चित्तमन्यत्र न तदेकाग्रमस्ति, दोषास्तस्य कथमपि बाधका न भवितुमर्हन्ति। स

दोषभयनिर्मुक्तो भवति। तस्य चित्तमेकाग्रं भूत्वा विवेकम् अनुसरति, विवेकेन च स सर्वतर्कविनिर्मुक्तो भूत्वा स्वस्थो भवति। उक्तञ्च-

यस्यैकाग्रकरं चित्तं तस्य दोषा न बाधका:।

स दोषभयनिर्मुक्त: स्वस्थ इत्यभिधीयते।।

एकाग्राभिरतञ्चेतो विवेकमनुधावति।

सर्वतर्कविनिर्मुक्त: स्वस्थ इत्यभिधीयते।। [43]

ध्यानजं समाधिजं च चित्तम् एकाग्रतासुखं लभते। एकान्तमना: संक्षिप्तेन्द्रियश्च पुरुषो दोषनिचयविनिर्मुक्तो भवति। बुधो हि ज्ञानाम्भसा तृष्णाग्निनातिवृद्धं दोषजालं हन्ति। हत्वा च स विशुद्धस्तृष्णाविमुक्तो भवति।

ध्यानं निवार्णपुरगामी श्रेष्ठो मार्ग:। अत: योगी मनो निगृहयैव ध्यानजं सुखं लब्धुं शक्नोति। ध्यानजं सुखं निरुपमं भवति। यथोक्तम्-

तत्र स्थिता: नरा: श्रेष्ठा: श्रद्धावन्तो मनीषिण:।

प्रयान्ति परमं स्थानमशोकं हतकिल्विषम्।।

निर्विषस्कस्य तुष्टस्य निरागस्यापि धीमत:।

यत् सुखं ध्यानजं[44] भाति कुतस्तस्योपमा परा।।[45]

---

[36] धर्मसमुच्चय:, वीर्यवर्ग:, का.सं.-8

[37] सम्यग्दृष्टि:, सम्यक्सङ्कल्प:, सम्यग्वाक्, सक्यक्कर्मान्त:, सम्यगाजीव:, सम्यग्व्यायाम:, सम्यक्स्मृति:, सम्यक्समाधिश्चेति।

[38] धर्मसमुच्चय:, वीर्यवर्ग:, का.सं.-7

[39] धर्मसमुच्चय:, वीर्यवर्ग:, का.सं.-9, 10

[40] धर्मसमुच्चय:, ध्यानवर्ग:, का.सं.-1

[41] बोधिचर्यावतार:, का.सं.- 5/16

[42] बोधिचर्यावतार:, पृ.सं.- 65

[43] धर्मसमुच्चय:, ध्यानवर्ग:, का. -2,3

एवं परमं पदं प्राप्त्यर्थं ध्यानै: मन: कार्यम् इति निगदित भिक्षुणा अवलोकितसिंहेन-

एतत्सारं सुधीराणां योगिनां पारगामिनाम्।

यदेवेदं मन: श्रुत्वा प्रयान्ति पदमच्युतम्।।[46]

6. प्रज्ञापारमिता-

प्रज्ञा-विषये आचार्यशान्तिदेवेन उक्तं बोधिचर्यावतारे-प्रज्ञा तु निर्विवादा चित्तमेव।[47]

आचार्यवसुबन्धुना उक्तम् अभिधर्मकोशग्रन्थे- प्रज्ञाऽमला सानुचराऽभिधर्म:,[48] तत्र

प्रज्ञा=धर्मप्रविचय:। अमलेति अनास्रवा। सानुचरेति सपरिवारा। एवमनास्रव: पञ्चस्कन्धोऽभिधर्म इत्युक्तम्। सा प्रज्ञा त्रिविधा- श्रुतमयी, चिन्तामयी भावनामयी च। भिक्षुणा अवलोकितसिंहेन उक्तं-

धर्मानुसारिणी प्रज्ञा वीर्येण परिबृंहिता।

समाधिबलसंयुक्ता मातेव हितकारिणी।।[49]

सा हि सर्वान् नरान् गतिपञ्चकात् त्रायते। मृत्युकाले च सम्प्राप्ते न माता न पिता न च बान्ध्वास्तवमनुगन्तं शक्नुवन्ति, परं सा तमनुगच्छत्येव। ज्ञानी शीलकन्दरशोभनं प्रज्ञाशिखरम् आरुह्य सर्वं भवदोषं द्रष्टुं शक्नोति-

सा हि सन्त्रायते सर्वान् पुरुषान् गतिपञ्चकात्।

न माता न पिता तत्र गच्छन्तमनुगच्छति।।

प्रज्ञाशिखरगारुह्य शीलकन्दरशोभनम्।

भवदोषमिदं सर्वं पश्यति ज्ञानभूषण:।।[50]

ज्ञानी समाधिना प्रज्ञा लब्ध्वा भवसागरं तरति। ज्ञानं (प्रज्ञा) च दान-शील-तपोध्यानै: श्रेष्ठमुच्यते। महायने प्रसिद्धेषु अष्टसु मार्गेषु प्रज्ञा (सम्यग्ज्ञानम्) मोक्षप्रदोष्टमो मार्ग: श्रेष्ठ उक्त:-

चक्षुषां च परा दृष्टा प्रज्ञोक्ता या सुनिर्मला।

मार्गाणां चाष्टमो मार्ग: शिव: प्रोक्तस्तथागतै:।।[51]

सत्यचतुष्टये दु:खनिरोध: दु:खनिरोधगामिनीप्रतिपच्चेति द्वे सत्ये स्त:। सर्वा जन्मपद्धति: सर्वदोषनिर्वहश्च ज्ञानशस्त्रेण छेत्तुं शक्यौ नास्ति लोके ज्ञानात् पर: सहायवान् बन्धुभूत:।

प्रज्ञा समाधिबलसंयुक्ता सर्वथाहितकारिणी भवति। यत्र पितरौ न गच्छत:, तत्र प्रज्ञा गच्छति। दानशीलतपोध्यानै: प्रज्ञाया: प्राधान्यं वर्धते। प्रज्ञाबलमेव सर्वोत्कृष्टं बलम्। अमृतानां परं ज्ञानं श्रेयसामुत्तमं निधिभूतम्।

अत: गतस्पृहैरेव प्रज्ञा सेवनीया। अतो ज्ञानशीलयुता वीतरागा गतस्पृहा वृद्धास्तत्त्वमार्गनिदर्शका: सदैव सेव्या: पारमिता:।

सहायकग्रन्था: -

1. धर्मसमुच्चय:, भिक्षु अवलोकितसिंह:, सम्पादक: - विजयशङ्कर चौबे सम्पूर्णानन्दसंस्कृतविश्वविद्यालय: वाराणसी, 1883 तमे ख्रैस्ताब्दे।
2. बोधिचर्यावातर:, आर्यशान्तिदेव:, प्रधानसम्पादक: - स्वामिद्वारिकादासशास्त्रि, बौद्धभारती, वाराणसी- 2001 ई. ।
3. बौद्धधर्ममीमांसा, आचार्यबलदेव उपाध्याय, चौखम्बा विद्याभवन, वाराणसी-2011
4. अभिधर्मकोशम्, आचार्य वसुबन्धु, प्रधानसम्पादक: - स्वामिद्वारिकादासशास्त्रि, बौद्धभारती वाराणसी, -2008
5. मिलिन्दपञ्हपालि, भिक्षुनागसेन:, प्रधानसम्पादक: - स्वामिद्वारिकादासशास्त्रि, बौद्धभारती, वाराणसी- 2006
6. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर-2068 सं., (एक सौ नब्बेवां पुनर्मुद्रण)

---

[44] चत्वारिध्यानानि सन्ति। तद्यथा- सवितर्कं सविचारं प्रीतिसुखमिति प्रथमं ध्यानम्। अध्यात्मप्रमोदनात्प्रीतिसुखमिति द्वितीयम्। उपेक्षास्मृतिसंप्रजन्यसुखमिति तृतीयम्। उपेक्षास्मृतिपरिशुद्धिरदु:खसुखा वेदेनेति चतुर्थध्यानम् इति।

[45] धर्मसमुच्चय:, ध्यानवर्ग:, का. -12

[46] धर्मसमुच्चय:, ध्यानवर्ग:, का. -14

[47] बोधिचर्यावतार:, पृ.सं.- 65

[48] अभिधर्मकोशम्, 1/2

[49] धर्मसमुच्चय:, प्रज्ञावर्ग:, का.सं.-1

[50] धर्मसमुच्चय:, प्रज्ञावर्ग:, का.सं.-2,3

[51] धर्मसमुच्चय:, प्रज्ञावर्ग:, का.सं.-6

21. ज्योतिषशास्त्रस्कन्धभेदः तत्प्रतिपाद्यविषयविवेचनञ्च

डा. यज्ञदत्तः
सहायकाचार्यः,(ग्रेड)
केन्द्रीयसंस्कृतविश्वविद्यालयः
वेदव्यासपरिसरः, बलाहरः, हि.प्र.
Email – dryagyadutt@gmail.com

॥ॐ स्वस्तिश्रीगणेशाय नमः॥

अस्य महतो ज्योतिर्वृक्षस्य सन्ति त्रयः स्कन्धाः सिद्धान्तः संहिता होरा चेति। तथा हि नारदः –

सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम् ।
वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम् ॥ [1]

इति। तथा च ब्रह्मसिद्धान्तवचनम् –

स्कन्धत्रयात्मकं शास्त्रमाद्यं सिद्धान्तसंज्ञितम् ।
द्वितीयं जातकस्कन्धं तृतीयं संहिताह्वयम् [2] **॥**

इति। एवं ज्योतिश्शास्त्रस्य स्कन्धत्रयेण विभागः आर्षः वर्तते। परन्तु विभागस्य बुद्धिनिष्ठत्वात् गच्छता कालेन अस्मत्पूर्वाचार्याः ग्रन्थकर्तारः अन्यथापि विभागं कल्पयामासुः। भारतीयज्योतिषशास्त्रस्येतिहासाख्यग्रन्थस्य कर्ता शास्त्रस्यास्य पञ्च स्कन्धान् उल्लिलेख । यथा तद्वचनम् [3] - **सामान्यतो ज्योतिषं हि सिद्धान्तसंहिताहोराभेदेन त्रिस्कन्धमुच्यते तथैव तत्र कैरलिः शकुनश्चेति द्वौ भेदौ संयोज्येदं पञ्चस्कन्धमप्युच्यते। यथोक्तम्** –

पञ्चस्कन्धमिदं शास्त्रं होरागणितसंहिताः।
कैरलिः शकुनश्चैव .....॥

इति। ..... तस्य चाध्ययनं पञ्चधा विभागं कृत्वा कृतमत्र सिद्धान्त-संहिता-होरा-केरलि-शकुन-भेदेनेति [4] । पुनः तत्रैव ज्योतिषस्य मुख्यविभागाः त्रय एव इति अभिप्रैति – **तदित्थं हि ज्योतिषशास्त्रस्य त्रयो मुख्यविभागाः - तन्त्रम् , संहिता, होरा च** [5] इति। असौ तन्त्रमेव सिद्धान्तापरपर्यायत्वेन स्वीकरोति। तत्रापि प्रश्नमार्गकारः ज्योतिश्शास्त्रं प्रमाणं फलञ्चेति द्विधा विभज्य तत्र प्रमाणभागे सिद्धान्तस्कन्धं फलभागे होरासंहितास्कन्धावन्यौ अन्तर्भावयामास। तथा च तद्वचनम् –

प्रमाणफलभेदेन द्विविधं च भवेदिदम् ।
प्रमाणं गणितस्कन्धः स्कन्धावन्यौ फलात्मकौ [6] **॥**

इति। पुनश्च स एव षडङ्गेष्वन्यतमस्य ज्यौतिषस्यापि षड् अङ्गानि सन्ति इति प्रकल्प्य षोढा ज्योतिश्शास्त्रं विभाजयामास। तद्यथा -

जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि ।
अभिदधतीह षडङ्गान्याचार्या ज्यौतिषे महाशास्त्रे ॥ [7]

इति। अत्र **आचार्याः अभिदधति** इति वचनेन स्वयं विभागः तेन न प्रादर्शि, अपि तु तत्रापि तत्पूर्वाचार्याणां मतम् अवलम्ब्य एव तथा विभागः तेन कृतः इति ज्ञायते। परन्तु सम्प्रति उपलभ्यमानेषु ग्रन्थेषु षडङ्गविभागस्य परिकल्पनाभावात् स्वगुरुपरम्पराप्राप्तः एव इयं विभागपरिकल्पना इति ऊहितुं शक्यते।

एतेषु षट्सु ज्योतिषाङ्गेषु गोलः गणितञ्च सिद्धान्तस्कन्धे, निमित्तं संहितास्कन्धे (होरास्कन्धे च) जातकं प्रश्नः मुहूर्तश्च होरास्कन्धे अन्तर्भवति। उक्तमपि–

---

[1] नारदसंहिता – अ.१ , श्लो.४ पृ.सं. २,
[2] सूर्यसिद्धान्तः १ – अ.१ (अवतरणिकायाम्)
[3] भारतीयज्योतिषशास्त्रस्येतिहासः – पृ.सं.- ६,
[4] भारतीयज्योतिषशास्त्रस्येतिहासः – पृ.सं.- ६,
[5] भारतीयज्योतिषशास्त्रस्येतिहासः – पृ.सं.- ६,
[6] प्रश्नमार्गः – अ.१ श्लो.९ पृ.सं.२
[7] प्रश्नमार्गः – अ.१ श्लो.६ पृ.सं.२

गोलो गणितञ्चेति द्वितयं खलु गणितसञ्ज्ञिते स्कन्धे ।

होरासंहितयोरपि निमित्तमन्यत्रयञ्च होराख्ये ॥ [8] इति।

एवं त्रिषु स्कन्धेषु मुख्यतया सिद्धान्तस्कन्धे ग्रहगणितम् , संहितास्कन्धे प्रत्येकं जनपदस्य शुभाशुभफलम् , होरास्कन्धे प्रत्येकं जनस्य शुभाशुभफलं च प्रोच्यते। इत्थं स्कन्धत्रयव्यापृतस्य ज्योतिश्शास्त्रस्य विषयबाहुल्यं परिलक्ष्य महत्त्वं च दृष्ट्वा एव **गरुडपुराणे** -

ज्योतिश्चक्रं भुवो मानं गोलं प्रोवाच केशवः ।

चतुर्लक्षं ज्यौतिषस्य सारं रुद्राय सर्वशः [9] ॥

इति उक्तं वर्तते । अपि च –

लक्षं तु चतुरो वेदा लक्षमेकं तु भारतम्।

लक्षं व्याकरणं प्रोक्तं चतुर्लक्षं तु ज्यौतिषम्॥।

इति शौनकोक्तिरपि [10] श्रूयते। अत एव –

यथा शिखा मयूराणां नागाणां मणयो यथा।

तद्वद्वेदांगशास्त्राणां ज्योतिषं मूर्धनि स्थितम्॥ ।

इति लगधोक्तिः [11] सर्वात्मना सङ्गच्छते।

इदानीं स्कन्धत्रयप्रतिपाद्यविषयाः क्रमशः निरूप्यन्ते -

होरास्कन्धः – तत्र तावत् होरास्कन्धे सर्वप्रजानां प्राग्जन्मार्जितकर्मविपाकानां विज्ञापनं विषयः। आधानलग्नात् जन्मलग्नाद् प्रश्नलग्नाद्वा तत्कालग्रहस्थितिवशात् प्रतिव्यक्त्यनुभूयमानं शुभाशुभफलं स्कन्धेऽस्मिन् प्रोच्यते। बृहत्पाराशर-जैमिनीयसूत्र-बृहज्जातक-प्रश्न-निमित्त-सामुद्रिक-रमल-नाडीग्रन्थादयः बहुधा विविधप्रकारेण पूर्वकर्मप्रवाचकाः प्रसिद्धाः होराग्रन्थाः लोके दृश्यन्ते। स्कन्धस्यास्य विषयाः इमे भवन्ति –

आयुर्दायो दशाभेदा भेदश्चान्तर्दशासु च ।

अष्टवर्गः कर्मजीवो राजयोगश्च नाभसम् ॥

चान्द्रयोगा विग्रहाद्याः प्रव्रज्यायोगसम्भवाः ।

राशिशीलं दृष्टिफलं ग्रहभावफलं तथा ॥

आश्रयाख्याश्च ये योगाः योगास्सङ्कीर्णसम्भवाः ।

स्त्रीजातकं नष्टयोगा निर्याणं नष्टजातकम् ॥

द्रेक्काणाश्च क्रियायोगा द्वितीयस्कन्धसम्भवाः । [12] इति।

संहितास्कन्धः – ग्रहचार-दिग्दाह-भूकम्प-परिवेशेन्द्रचाप-प्रतिसूर्य-सद्योवर्षण-उल्कापातादिभिः उत्पातलक्षणैः एकैकस्मिन् भूखण्डे निवसतां सकलप्राणिनां कात्स्न्र्येन फलनिर्देशनमेव अस्य स्कन्धस्य प्रधानं विषयः। स्कन्धस्यास्य विषया इमे भवन्ति –

आदौ शास्त्रोपनयनं खेटचारोऽब्दलक्षणम् ॥

तिथिवासरनक्षत्रयोगतिथ्यर्धलक्षणम् ।

मुहूर्तोपग्रहास्सूर्यसङ्क्रातिर्गोचरक्रमः ॥

चन्द्रताराबलं चैव क्रियाः षोडशकर्मणाम् ।

क्षुरिकाबन्धनं यात्राप्रवेशस्सद्मलक्षणम् ॥

राजाभिषेचनं देवप्रतिष्ठा वस्त्रलक्षणम् ।

अग्न्याधानं मेघगर्भो निखिलोत्पातलक्षणम् ॥

---

[8] प्रश्नमार्गः– अ.१ श्लो.७ पृ.सं.२

[9] अयं श्लोकः शब्दकल्पद्रुमे प्रयोगस्थले उदाहृतः। शब्दकल्पद्रुमः – भा-२ पृ.सं. ५५०

[10] ज्योतिषसिद्धान्तसङ्ग्रहोद्धृतं शौनकोक्तर्ग्वेदीयचरणव्यूहपरिशिष्टवाक्यम् इति उल्लेखः तम्मयज्वविरचितायाः कामदोग्ध्याख्यायाः सूर्यसिद्धान्तटीकायाः सम्पादनम् अध्ययनञ्च इत्यस्मिन् शोधप्रबन्धे । पृ.सं . ७

[11] वेदाङ्गज्योतिषम् – आर्चज्योतिषम् , श्लो. ३५ , पृ.सं. २६ । याजुषज्योतिषम् , श्लो. ४ , पृ.सं. २७

[12] कल्पवल्ली – मध्यमाधिकारव्याख्यारम्भे,

तच्छान्तिमिश्रकाध्यायस्तृतीयस्कन्धसम्भवाः । [13] । इति।

तथैवोक्तं प्रश्नमार्गे –

जनपुष्टिक्षयवृष्टिद्विरदतुरङ्गादिसकलवस्तूनाम् ।
केतूल्कादीनां वा लक्षणमुदितं हि संहितास्कन्धे [14]॥ इति।

वस्तुतस्तु **तत्कात्स्न्योपनयस्य नाम मुनिभिः सङ्कीर्त्यते संहिता** [15] इति वराहवचनात् ज्योतिश्शास्त्रस्य सर्वविषयाणां सङ्ग्रहः एव संहिता इति साध्वी व्याख्या। संहिता इत्ययं शब्दोऽपि अमुमेवार्थं सूचयति[16]। तथापि सौकर्यार्थं होरासिद्धान्तयोः तत्तद्विषयान् विभज्य योंऽशः अवशिष्टः स एव संहिता इति व्यवहारार्थं स्वीकृतः। तत्र पराशर-गर्ग-नारद-देवल-वशिष्ठ-मनु-सारस्वत-बृहत्संहितादयः प्रमुखाः संहिताग्रन्थाः सन्ति। एषु संहिताग्रन्थेषु प्रायेण त्रिचतुराः ग्रन्थाः इदानीम् उपलभ्यन्ते।

सिद्धान्तस्कन्धः – सिद्धान्तस्कन्धे गणितद्वारा ग्रहाणां स्फुटीकरणमेव प्रधानं विषयः। स्कन्धस्यास्य विषया इमे भवन्ति –

ग्रहाणां मध्यमा भुक्तिस्स्फुटभुक्तिरनन्तरम् ।
दिक्साधनं ततश्छाया लग्नकालविनिर्णयम् ॥
चन्द्रार्कग्रहणं सम्यक्तयोश्च परिलेखनम् ।
समागमो युद्धभेदो विग्रहाणां युतिस्तथा ॥
उदयास्तमयज्ञानं चन्द्रशृङ्गोन्नतिम् ।
पातवैधृतयोर्ज्ञानं भूगोले यन्त्रलक्षणम् ॥
सिद्धान्तसंज्ञिते स्कन्धे विषयांश्च विदुर्बुधाः । [17] इति।

एवं कालक्षेत्रभेदः, अहर्गणानयनम् , मध्यस्पष्टग्रहानयनम् , गतिसाधनम् , तिथ्यादिगणितम् , स्फुटीकृतग्रहस्य छायाद्वारा परीक्षणम् , ग्रहणसाधनम् , ग्रहणपरिलेखनम् , ग्रहाणाम् उदयास्तौ, ग्रहनक्षत्रयुतिः, शृङ्गोन्नतिः, महापातः, ग्रहाणां कक्ष्याप्रमाणम् , भूपरिधिमानम् , भूभगोलस्वरूपम् , कालक्षेत्रवेधार्थं यन्त्रनिर्माणविधिः इत्येते विषयाः विस्तृतरूपेण सिद्धान्तस्कन्धे निरूप्यन्ते । एवम् आर्षग्रन्थेषु क्रमः। परञ्च मानुषग्रन्थेषु व्यक्तगणितम् अव्यक्तगणितं चेति द्विविधं ग्रहगणितोपयोगि गणितमपि अत्रैव प्रपञ्च्यते इति विशेषः।

॥शम्॥

****

[13] कल्पवल्ली - मध्यमाधिकारव्याख्यारम्भे,
[14] प्रश्नमार्गः – अ.१ श्लो.८ पृ.सं. ४,
[15] बृहत्संहिता [१] – अ. १ श्लो. ९ पृ.सं. ४,
[16] सन्धीयन्ते= सङ्गृह्यन्ते सर्वविषयाः अत्र इति संहिता।
[17] कल्पवल्ली – मध्यमाधिकारव्याख्यारम्भे,

22. योगवासिष्ठे मनस्तत्त्वम्

Dr. Darsana Roy

Assistant Professor (contract) in Yoga Dept

CSU, Ekalavya Campus, Agartala, Tripura

संस्कृतवाङ्मये योगवासिष्ठः भारतीयदर्शनेषु धर्मशास्त्रेषु तथा आचारशास्त्रेषु एकः अभिनवग्रन्थः। अद्वैतवेदान्तपरम्परायां योगवासिष्ठः महत्त्वपूर्णः आध्यात्मिकग्रन्थः।

जीवन्मुक्तत्वमस्मिंस्तुश्रुतेसमनुभूयते।

स्वयमेवयथापीर्तनीरोगत्वं वरौषधे।। - योगवासिष्ठ 3.8.15

अर्थात्, यथा उत्तमऔषधिसेवने स्वस्थशरीरं लभते तथा योगवासिष्ठः श्रवणेन जीवन्मुक्तविषये अनुभवः जायते। महाकविकालिदासः येन प्रकारेण उपमावर्णने विख्यातरासीत् तथा योगवासिष्ठकारोऽपि दर्शनशास्त्रमाधार्य स्वीयग्रन्थस्य प्रतिपादनाय समुचितप्रयासं प्रादर्शत। आदिकविवाल्मीकिविरचितं रामायणं केवलं रामायणमिति नाम्ना प्रसिद्धं परन्तु दार्शनिकचिन्तने योगवासिष्ठं महारामायणम् इति नाम्ना प्रसिद्धम्।

अस्य ग्रन्थस्य षट् प्रकरणानि सन्ति। यथा – वैराग्य,मुमुक्षव्यवहार,उत्पत्ति,स्थिति,उपशम,निर्वाणप्रकरणम् (पूर्वार्द्ध, उत्तरार्ध)।

अत्र कुलश्लोकसंख्या द्वात्रिंशत् सहस्राणि। महर्षिवाल्मीकिः योगवासिष्ठग्रन्थस्य रचयिता।

मोक्षोपायाभिधानेयं संहिता सारसंमिता।

त्रिंशत् द्वे च सहस्राणि ज्ञाता निर्वाणदायिनी।। - योगवासिष्ठः 2.27.7

'मनश्च मन्तव्यं च नारायणः' मनः मनुष्याणां प्रवृतौ कारणं भवति। तद्वारैव मानवस्य बन्धः मोक्षो वा जायते इत्यस्ति मनसः प्रामुख्यं मानवजीवने। अतएव भगवता श्रीकृष्णेन इन्द्रियाणां मनश्चास्मि इति तस्य श्रेष्ठत्वं ब्रह्मस्वरूपत्वश्च प्रपञ्चितम्।

मनस् शब्दः क्लीबलिङ्गात्मकः (मन्यते वुध्यतेऽनेनेति)। मन्यते अवबुध्यते ज्ञायते वा अनेन इति करणव्युत्पत्त्या मन ज्ञाने इति दिवादिकात् मनधातोः, मनु अवबोधने इति तनादिकात् मनुधातोवो सुन् प्रत्यये कृते मनः शब्दः निष्पद्यते। इतोऽपि विषयज्ञाने यत् साधनं भवति तदेव 'मन' इति मनः शब्दस्यार्थः सिद्ध्यति।

अस्माकं मनः अतीवचञ्चलम् आकाङ्खायुक्ताञ्च। महर्षिवासिष्ठेण उक्तं यत् यदा मनः शुद्धं भवति तदा जनाः कस्मिन्नपि अभीष्टविषये यादृशं चिन्तयन्ति, भानवाफलमपि तादृशं भवति। अतः अपरस्य मनसि यथा भावना आयाति स्वमनसि तथा नायाति। अतः सर्वदा सर्वाणि कर्माणि अस्माकं मनसि निभृतानि सन्ति। अस्माकं मुक्ति-बन्धन-उत्थान-पतन-जन्मादिविषयाः सर्वथा मनसि निभृताः, इति हेतोः योगविषये मनः केवलं सर्वेषु इन्द्रियेषु राजेव उल्लिखितः। स्कन्दपुराने उक्तम् –

पापासक्तं हि बन्धाय पुण्यासक्तं हि मुक्तये।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।।

अर्थात् मनः पापे आसक्तं भवति चेत् बन्धनम् एवञ्च पुण्ये संलग्नं भवति चेत् मोक्षः च प्राप्तुं शक्यते। वस्तुतः स्वयं मनः अस्माकं बन्धमोक्षयोः कारणम्। मनसः अस्तित्वं भवति बन्धनम्। मनसः अभावो मोक्षः कैवल्यं वा।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।

बन्धनं विषयासक्तं मुक्त्यै निर्विषयं मनः।। - त्रिपुरतापिन्योपनिषदः

अर्थात् मनः मनुष्यान् बध्नाति, पुनः निर्विषयकं मनः निर्मलताद्वारा मुक्तिं प्रददाति। महाभारते महर्षिवेदव्यासः योगवासिष्ठस्य मतानुसारेण उक्तम् –

द्वे पदे बन्धमोक्षाय निर्ममेति ममेति च।

ममेति बध्यते जन्तुर्निर्ममेति विमुच्यते।।

इतोऽपि भगवताकृष्णेन श्रीमद्भागवद्गीतायाम् उक्तं खलु –

चञ्चलं हि मनः कृष्ण प्रमाथि बलवदृढम्।

तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्।। - श्रीमद्भागवद्गीता 6.34

अर्थात् अस्माकं मनः सर्वदा चञ्चलं बलयुक्तञ्च। तस्य तु नियन्त्रणम् अतीव कष्टदायकं यथा वायोः बन्धनं न तु सहजम्। अतः अस्माकं मनसः वैशिष्ट्यं वायुवत् भवति।

मनसः विषये योगवासिष्ठग्रन्थे प्रसिद्धाः श्लोकाः सन्ति। यथा –

यदर्थप्रतिभानं तन्मन इत्यभिधीयते।

परस्य पुंस सङ्कल्पमयत्वं चित्तमुच्यते।।

चिन्निः स्पन्दो हि मलिनः कलङ्कविकलान्तरम्।

मन इत्युच्यते राम न जडं न च चिन्मयम्।।

अस्माकं मनः स्वतन्त्ररूपमेव। अतः स्वतन्त्रतापूर्वकं शरीरं रचयितुं शक्यते। देहभावं धारयित्वा अस्माकं मनः जगद्रूपम् इन्द्रजालं रचयति। श्लोकानुसारं वासिष्ठे कथयन्ति यत्

तत्स्वयं स्वैरमेवाशु संकल्पयति देहकम्।

तेनेयमिन्द्रजालश्रीर्विततेन वितन्यते।। - योगवासिष्ठ 3.4.79

अस्माकं जगतः मुख्यवाहकं मनः। त्रिगुणात्मिका प्रकृतिरिति हेतोः प्रकृतिसम्भवाः मानवा त्रिगुणविशिष्टाः। सर्वे विभिन्नगुणाधारेण चित्तात् विविधचिन्तनानि प्रकाशयन्ति। अतः योगवासिष्ठे उक्तं खलु –

मनो हि जगतां कर्तृ मनो हि पुरुषः स्मृतः। (3.91.4)

स्वरुपं सर्वकृत्त्वं च शक्तत्वं मनसो मुने ।। (3.91.16)

सर्वेषां भावनाचिन्तनादिकं भिन्नं भिन्नं भवति। एवं सर्वे जनाः एतादृशरूपेण तेषां भावनां कल्पनां च जगतः सन्मुखे प्रदर्शयन्ति। अस्मिन् विषये योगवासिष्ठे एकः श्लोकः उपवर्णितः। यथा –

चित्तमेव जगत्कर्तृ सङ्कल्पयति यद्यथा।

असत्सत्सदसच्चैव तत्तथा तस्य तिष्ठति।। (6-2.139.1)

इतोऽपि उक्तम् -

मनो यदनुसन्धत्ते तदेवाप्नोति तत्क्षणात्।

यथैतद्भावयेत्खान्तं तथैव भवति क्षणात्।। (2-3.91.52)

अर्थात् अस्माकं मनः यादृशीं उत्पादयति तदनुसारेण कर्माणि अपि कुर्वन्ति अनन्तरं तादृशकर्मफलम् अपि प्राप्नुवन्ति। अतः सर्वकर्मफलनिर्देष्ट मनः सर्वाधिकारिरूपेण सर्वोच्चे तिष्ठति।

मनः किम् ?

इत्युक्ते योगवासिष्ठे उक्तम् –

गतमेव कलङ्कत्वं कदाचित्कल्पनात्मकम्।

उन्मेषरूपिणी नाना तदैव हि मनः स्थिता।। (3.96.17)

अर्थात् शुद्धचेतनात्मा यदा स्पन्दनयुक्तः कल्पनात्मकरुपं धारयित्वा विषयेण आवृतं भवति तदा भवति मनः।

जगतः स्रष्टा मनः, मनः भवति स्वयं पुरुषः। मनसि सर्वशक्तिः विराजते। मनसि स्थितम् अभीष्टमवश्यमेव लब्धुं शक्यते। यादृशी भावना यस्य सिद्धिर्भवति तादृशी। चित्तस्याभ्यन्तरे या कल्पना दृश्यते सा तु बाह्यजगति अपि स्थिरफलयुक्ता प्रकट्यते।

अस्माकं मनः ब्रह्मरूपं धारयति। ब्रह्मा भवति संकल्पकारकः मनः। स्वीयकौशलेन मनः संसारं रचयितुं शक्यते। मनः भवति ब्रह्मणः स्वरूपं तथा ब्रह्मा भवति मनसः स्वरूपम्। मनसः रूपं धारयित्वा ब्रह्मा सृष्टिकार्यं करोति। श्लोकः उल्लेखितः यथा –

मन एव विरिञ्चित्वं तद्धि संकल्पनात्मकम्।

स्ववपुः स्फारतां नीत्वा मनसेदं वितन्यते।। (3.3.34)

विरिञ्चो मनसो रूपं विरिञ्चिस्य मनो वपुः।

मनस्तामिव यातेन ब्रह्मणा तन्यते जगत् ।। (3.3.35)

मनोनाशः – विवेकः, वैराग्यम्, आत्मचिन्तनम्, विचारणा तथा इन्द्रिय-संयमाभ्यासेन वासना क्षयीभूता भवति। वासनानाशात् मुक्तिः आगच्छति। तदा आशाप्रत्याशादि निष्करणं कृत्वा अस्माकं मनः स्व-प्रकृतिगतशान्तिं प्राप्नोति। यदा मनः स्पन्दनरहितं भवति तदा मनः न तिष्ठति, तत्तु मोक्षरूपं भवति। मनोनाशेन वासना त्यक्ता आत्मज्ञानं लभ्यते।

जलस्य तरङ्गस्य उत्पादनात्परं जलेन साकं विलीनं भवति अतः जलस्य तरङ्गः न दृश्यते तथैव संकल्पात् सृष्टजगदपि संकल्पस्य अभावेन विलीनं भवति। यथा मन्दाराचलं स्थिरीभूतात्परं क्षीरसागरः शान्तः अभवत् तथा मनसः संयमात्परं संसाररूपभ्रान्तेः शमनं भवति।

चित्तस्पन्दोत्थिता माया तद्भावे विलीयते।

पयः स्पन्दोत्थिता वीचिस्तदभावे विनश्यति।। (6.1.44.22)

संयमान्मनसः शान्तिमेति संसार विभ्रमः।

मन्दरेऽस्पन्दतां याते यथा क्षीरमहार्णवः।। (3.110.65)

सन्दर्भग्रन्थसूचीपत्रम्

- भारतीय दर्शन में योगवासिष्ठ का स्थान, सम्पादिका – राधा गुप्ता, परिमल प्रकाशन, दिल्ली, 2002
- योगवासिष्ठसुधा, स्वामी विष्णुशरणानन्दा, मानसी प्रकाशन, मेरठ, 1998
- योगवासिष्ठ में मुक्त का स्वरूप, सम्पादिका – डा. ललीता कुमारी जुनेजा, विद्यानिधि प्रकाशन, दिल्ली, 2010
- योगवासिष्ठ कथा, सम्पादक – रघुनाथ सिंह, कृष्णदास अकादेमी, वाराणसी, 1988
- The Vision and the way of Vasistha Darsana , Published by Samata Book Chennai, Second Edition, 2005

****

23. आत्मबोधप्रकरणग्रन्थस्य समीक्षात्मकमध्ययनम्

डॉ. योगेश पाण्डेयः
सहायकः अध्यापकः
केन्द्रीयसंस्कृतविश्वविद्यालयः,
वेदव्यासः परिसरः

अष्टषष्टिश्लोकात्मकः अद्वैतवेदान्तस्य अन्यतमः प्रकरणग्रन्थोऽयं शङ्कराचार्येण विरचितः। अद्वैतवेदान्तस्य सूक्ष्मातिसूक्ष्मतत्त्वस्य उपस्थापनेन अयं ग्रन्थः वेदान्तसंसारे महतीं भूमिकां परिपालयति। परं टीकोपटीकाभ्याम् अयं प्रकरणग्रन्थः प्रसिद्धिं गतः। सदशुद्धः बुद्धः मुक्तः सकलमपि मायामात्रमिद जगत् विसृज्य एतत् चितिमयं प्रथयति। तादृशाय नित्याय समरसघनाय आत्मने नमः इति आत्मबोधदीपिकायां ब्रह्मानन्दः। यदा वैनाशिकैः बौद्धैः महामूढैः श्रुतिशिरोगणो लुप्तः। तदा शङ्कराचार्यः अद्वैतविज्ञानम् आविश्चकार। अत्र मातेव पुत्रेषु दयालुः भगवान् शङ्कराचार्यः उत्तमप्रज्ञानां शास्त्रपयोनिधिम् अवगाह्य आत्मज्ञानरत्नम् अन्विष्यमाणानां कृते शारीरकभाष्यादिप्रस्थानत्रयं निर्माय तदवलोकने असमर्थानां मन्दमतीनां कृते अयं ग्रन्थः।

मङ्गलम् -

मङ्गलाचरणं शिष्टानुशासनम्। शिष्टाचारपरिपालने अग्रणीः शङ्कराचार्यः। आदिमे श्लोके शङ्कराचार्यः अनेन श्लोकेन ग्रन्थस्य अधिकारिणं सूचयति। केभ्योऽयम् ग्रन्थो विधीयते इति चेदुच्यते

"तपोभिः क्षीणपापानां शान्तानां वीतरागिणाम्।
मुमुक्षूणामपेक्ष्योऽयमात्मबोधो विधीयते॥"[i]इति

तपोभिः क्षीणपापानां शान्तानां वीतरागिणां मुमुक्षूणाम् अपेक्ष्य अयम् आत्मबोधो विधीयते। साधनचतुष्टयसम्पन्नस्यैवात्र अधिकारः। नित्यनैमित्तिकोपासनाद्यनुष्ठानरूपतपोभिः दूरितक्षयाणां प्रशान्तचित्तानां शान्तानाम् अक्षुब्धाशयानां वीतरागिणाम् इहमुत्रार्थफलभोगालिप्तूनां मुमुक्षूणां संसारग्रन्थिभेदेन कृताभिलाषाणां कृते अयम् आत्मबोधो ग्रन्थः। शङ्कराचार्यः एव तेभ्यः आत्मबोधम् उत्पाद्य मोक्षं कारयिष्यति इति तात्पर्यम्। अत्र प्रश्नो भवति शङ्कराचार्यः साक्षात् मङ्गलं तु नैव कृतवान्। तेन नास्तिकमतप्रवेशः इति चेत् - नैव। यत्र प्रपञ्चव्यवस्थादिकं प्रतिपिपायिषितम् अस्ति तत्रैव मङ्गलस्य अपेक्षितत्वातेन अस्य मङ्गलरूपत्वात्।

आत्मज्ञानात् मोक्षः

अधुना प्रश्नः उत्थाप्यते यत् सर्वेषु शास्त्रेषु जपतपःप्रभृतिभिः मोक्षसम्भवोल्लेखः चेत् अत्र केवलन् आत्मज्ञानात् मोक्षस्य सम्भवः कथम्। तदा उच्यते शङ्कराचार्यैः -

"बोधोऽन्यसाधनेभ्यो हि साक्षान्मोक्षैकसाधनम्।
पाकस्य बह्निवज्ज्ञानंविना मोक्षेन सिद्ध्यति॥"[ii] इति

यथा पाकादिकार्ये जलं ज्वलनसामग्री चेत्येषां व्यवहारः भवति चेदपि वह्निरेव तत्र मुख्यसाधनम्। तं विना पाकादिकार्यं नैव सम्भवेत्। तथैव मोक्षसाधने जपः तपः चेत्यादीनाम् आवश्यकतायां सत्यायामपि आत्मबोधः एव तत्र मुख्यं कारणम्। आत्मबोधात् आत्मज्ञानात् एव मुक्तिः। ज्ञानं विना मोक्षः नैव सिद्ध्यति। श्रुतिरपि - "ज्ञानादेव तु कैवल्यम्" इति, "ऋते ज्ञानान्न मुक्तिः" चेति। स्मृतिरपि वदति - "तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते"[iii] इति। तपसा केवलम् अन्तःकरणशुद्धिः। ततो विद्यया मुक्तिः।

जनकादीनां श्रेष्ठेन कर्मणा एव उच्चगतिप्राप्तिरिति तु प्रसिद्धम्। यदि कर्मणा एव आत्मगतिः तर्हि किम् आवश्यकम् आत्मज्ञानस्य इति चेत्। उच्यते -

"अविरोधितया कर्म नाविद्यां विनिवर्तयेत्।
विद्याऽविद्यां निहन्त्येव तेजस्तिमिरसंघवत्॥"[iv]इति

कर्मविद्ययोः मार्गः परस्परं विपरीतः। यदा तेजः तिमिरसङ्घं निहन्ति, तथैव ज्ञानम् अज्ञानं निवर्तते। कर्म अविरोधितया अविद्यां न विनिवर्तयेत्। विद्या अविद्यां निहन्ति।

आत्मा स्वयंप्रकाशः

"परिच्छिन्न इवाज्ञानात् तन्नाशे सति केवलः।
स्वयं प्रकाशते ह्यात्मा मेघापायेंऽशुमानिव॥"[v]इति

यदा सूर्यमण्डलं मेघमालया आच्छादितं भवति। तदा सूर्यज्योतिः यां दिशं गच्छति, तत्र मेघमालां विच्छिद्य स्वयं प्रकाशितो भवति सूर्यः। एवमेव ज्ञानाभावे अविद्यया जीवाः संसारे अस्मिन् आवर्तिताः भवन्ति। तदा साधने सति ज्ञानेन अज्ञानं निवर्त्यते। तदा मोक्षो लभ्यते।

ब्रह्माद्वैतता

"संसारः स्वप्नतुल्यो हि रागद्वेषादिसंकुलः।

स्वकाले सत्यवद्भाति प्रबोधे सत्यवद्भवेत्॥"[vi] इति

संसारस्तु साक्षात् दृश्यते, सत्यवत् प्रतीयते। तर्हि द्वैतभानस्य एव प्रतीतिः, न तु अद्वैतस्य। तर्हि ब्रह्मणः अद्वैतता कथं सिध्यति इति चेत्। रागद्वैषादिसंयुतः संसारः स्वप्नवत् तुल्यः। यदा वयं स्वप्नं पश्यामः तदा संसारं सत्यवत् वयं जानीमः। यदा प्रबोधः भवति तदा स्वप्नस्य मित्यात्वं प्रसज्यते। यावत् स्वप्नकालः तावदेव स्वप्नस्य सत्यता। प्रबोधे एव तस्य विनाशः। एवमेव अज्ञानेन एव अहमिदं ममेदं चेति द्वैतव्यवहारः। ज्ञाने सति तस्य विनाशः। तदा अद्वैतस्य प्रकाशः। यावत् सर्वाधिष्ठानम् अद्वयं ब्रह्म न ज्ञायते तावत् एव जगत् शुक्तिकारजतवत् सत्यं भाति।

ब्रह्मणि जगत्कल्पनम्

"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।

आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥" इति

अस्ति भाति प्रियं चेति आत्मनि अत एव नामरूपात्मके जगति अनुस्यूते अनुगते अनुगतत्वात् एव नित्ये त्रिकालाबाध्ये विष्णौ व्यापके ब्रह्मणि सर्वोपादानभूते सर्वाश्चतुरशीतिलक्षयोनिलक्षणाविविधाः अवयवसंख्यानसंस्थया नानाविधाः व्यक्तयः हाटके सुवर्णे कटककुण्डलादिवत् प्रकल्पिताः मिथ्याभूताः। तस्मादेव उक्तम् आत्मबोधे शङ्कराचार्येण -

"सच्चिदात्मन्यनुस्यूते नित्ये विष्णौ प्रकल्पिताः।

व्यक्तयो विविधाः सर्वा हाटके कटकादिवत्॥"[vii] इति

तदनन्यत्वम् आरम्भणशब्दादिभ्यः इति न्यायात्। "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[viii] इति श्रुतिमानमत्र प्रमाणम्। अधुना प्रश्नो भवति यत् प्रपञ्चस्य मिथ्याभूतत्वात्, जीवभेदः सत्यभूतत्वात् च कथं प्रपञ्चाधिष्ठानरूपस्य परमात्मनोऽद्वितीयत्वं सत्यत्वं च कथमुपपद्यते इति चेत् आचार्येण भणितं -

"यथाकाशे हृषीकेश नानोपाधिगतो विभुः।

तद्भेदाद्भिन्नवद्भाति तन्नाशे सति केवलः॥"[ix]इति

यथा विभुः आकाशः घटमठादिरूपनानोपाधिभेदात् भिन्नवत् प्रतीयते। उपाधिनाशे सति आकाशस्य एकत्वम् उपपद्यते। तद्वत् उपाधिवशात् एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलः निर्गुणः एकः सन् बहुधा प्रतीयते। किन्तु उपाधिनाशे सति एकः एव अवतिष्ठते।

ननु ब्रह्मचारी अहं ब्राह्मणोऽयं चेति जातिवर्णाश्रमादिभिः धर्मैः युक्तस्य आत्मनः कथम् असङ्गत्वम् अद्वितीयत्वं चोपचारः इति चेत् वदति -

"नानोपाधिवशादेव जातिनामाश्रयादयः।

आत्मन्यारोपितास्तोये रसवर्णादिभेदवत्॥"[x] इति

यथा नानोपाधिवशात् तोयं जलं रसवर्णादिभेदवत् नाना प्रतीयते। वस्तुतस्तु जलं तु एकमेव। उपाधिधर्माः तत्र आरोपिताः। तथैव जातिनामाश्रयादयः नानाविधाः धर्माः आत्मनि आरोप्यन्ते। वस्तुतस्तु ते धर्माः न कदापि आत्मानं प्रभावयन्ति। आत्मा निरवयवी अधर्मी च।

सृष्टिप्रपञ्चः

अन्ततो गत्वा दृश्यते यत् समस्तानां सृष्टिवाक्यानाम् अद्वैते एव तात्पर्यम्। समस्तानि सृष्टिवाक्यानि अद्वैते एव पर्यवसितानि। आत्मबोधेऽपि शङ्कराचार्येण स्ववचोभिः युक्त्या सृष्टिप्रपञ्चः आलोचितः। पञ्चीकृतमहाभूतसम्भवं कर्मसञ्चितं, सुखदुःखानां भोगायतनं शरीरम्[xi]। पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनं सूक्ष्मशरीरम्[xii]। अनाद्यविद्या अनिर्वाच्या कारणोपाधिः उच्यते। उपाधित्रितयात् अन्यः आत्मा। यथा स्फटिकः नीलवस्त्रादियोगेन तत्तन्मयः इव भाति। तथैव शुद्धात्मा पञ्चकोशादियोगेन तत्तन्मयः इव स्थितः। तण्डुलस्य स्वरूपतया प्रतीयमानतुषारादिभिः युक्तं तण्डुलं यथा अवघाततो मुसलावहननेन शुद्धं विवच्यते पृथक्क्रियते। तथा कोशैः अन्नमयादिभिः युक्तं तेषाम् अभ्यन्तरं शुद्धम् आत्मानं विविच्य पृथक्कृत्वा विजानीयात् इत्यर्थः[xiii]।

आत्मानात्मविवेकः

आत्मनो ब्रह्मरूपत्वेन सदा सर्वगतत्वात् किमिति स सर्वत्र न भासते इति चेत् समाधानत्वेन आह आचार्यः शङ्करः -

"सदा सर्वगतोऽप्यात्मा न सर्वत्रावभासते।

बुद्धवेवावभासतेत स्वच्छेषु प्रतिबिम्बवत्॥"[xiv] इति

सदा सर्वगतः आत्मा सर्वत्र न अवभासते। यथा स्वच्छेषु एव केवलं प्रतिबिम्बो दृश्यते न अस्वच्छेषु। तद्वदेव आत्मा स्वच्छबुद्धौ एव अवभासते, नान्यत्र। यथा सभायां स्थितः राजा सर्वेषां साक्षी प्रेरकः सन्नपि तेभ्यः भिन्नः। तथैव देहेन्द्रियमनोबुद्धिविलक्षणः आत्मा तद्वृत्तिसाक्षी। उच्यते च

"देहेन्द्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणम्।

तद्वृत्तिसाक्षिणं विद्यादात्मानं राजवत्सदा॥"[xv] इति

यथा अभ्रेषु धावस्तु सत्सु शशी धावन् इव दृश्यते। तथा एव अविवेकिनाम् इन्द्रियेषु व्यापृतेषु आत्मा व्यापारी इव दृश्यते। प्रोक्तं च -

"व्यापृतेष्विन्द्रियेष्वात्माव्यापारी वाऽविवेकिनाम्।

दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी॥"[xvi] इति

यथा जनाः सूर्यालोकम् आश्रित्य स्वकीयार्थेषु वर्तते। तथा देहेन्द्रियमनोधियः आत्मचैतन्यम् आश्रित्य स्वकीयार्थेषु प्रवर्तन्ते।

"आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः।

स्वकीयार्थेषु वर्तन्ते सूर्यालोक यथा जनाः॥"[xvii] इति

देहेन्द्रियगुणान् कर्माणि च अमले सच्चिदात्मनि अविवेकेन गगने नीलिमादिवत् अध्यस्यन्ति मन्दमतयः अविवेकिनः।

"देहेन्द्रियगुणान् कर्माण्यमले सच्चिदात्मनि।

अध्यस्यन्त्यविवेकेन गगने नीलिमादिवत्॥"[xviii] इति

परमात्मा जीवात्मा च

वस्तुतः जीवात्मा परमात्मना अभिन्नः एव। किन्तु अज्ञानात् जीवात्मा परमात्मनो भिन्नः। आत्मबोधे उच्यते शङ्कराचार्येण -

"आत्मनो विक्रिया नास्ति बुद्धेर्बोधे न जात्विति।

जीव सर्वमलं ज्ञात्वा द्रष्टेति मुह्यति॥"[xix]इति

परमात्मनः कदाचित् विक्रिया विकारो नास्ति। "निर्गुणं निष्कलं शान्तं निरवद्यं निरञ्जनम्"[xx] इति श्रुतेः। "अव्यक्तोऽयंमचिन्त्योऽयमविकार्योऽयमुच्यते"[xxi] इति स्मृतेः। बुद्धेः बोधः नास्ति। बुद्धेः कदाचित् बोधः नास्ति। जीवः सर्वमलं ज्ञात्वा कर्ता द्रष्टा इति मुह्यति। जीवः अन्तःकरणावच्छिन्नचेतनः सर्वजडचेतनात्मकम् अमलम् अत्यन्तांभेदेन ज्ञात्वा कर्ता अहं द्रष्टेति मुह्यति श्रान्तो भवति न तु विविक्तः आत्मनि स्वल्पः अपि विकारः इत्यर्थः।

"रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत्।

नाहं जीवः परात्मेति ज्ञातश्चेन्निर्भयो भवेत्॥"[xxii] इति

यथा महान्धकारे विकाररहितरज्ज्वादौ सर्पाद्यारोपणं कृत्वा पुमान् भयं प्राप्नोति। एवम् आत्मा अपि आत्मानं जीवं सद्वितीयं परिच्छिन्नं संसारिणं ज्ञात्वा मिथ्यैव निश्चित्य भयं नानाविधसंसारिकपीडानिमित्तं वहेत् प्राप्नुयात् इत्यर्थः।

एकः आत्मा बुद्ध्यादीन्द्रियाणि अवभासयति। यथा दीपः घटादिम् अवभासयति। किन्तु यथा घटेन दीपः न अवभास्यते। तथैव तैः जडैः बुद्ध्यादीन्द्रियैः आत्मा कदापि न अवभास्यते।

"नेति नेति" इति वाक्यतः निखिलोपाधीन् निषिध्य 'अहं ब्रह्मास्मि', 'तत्त्वमसि', 'अयमात्मा ब्रह्म','प्रज्ञानं ब्रह्म' चेत्यादिभिः महावाक्यैः जीवात्मपरमात्मनोः ऐक्यं ज्ञातव्यम्। यथा आविद्यिकं शरीरादि दृश्यं बुद्बुद्वत् क्षरमस्ति। न तथा ब्रह्म। तद्विलक्षणं च ब्रह्म निर्मलं पारमार्थिकम् अदृश्यम्। 'अप्राणो ह्यमनाः शुभ्रः' इत्यादिश्रुतिशासनात् आत्मनः दुःखरागद्वेषादयो न सन्ति। एतस्मात् ब्रह्मणः एव प्राणः मनः सर्वेन्द्रियाणि आकाशं वायुः अग्निः जलं चेति सर्वं जायते। अनेन ब्रह्मणः तटस्थलक्षणपि सूचितम्। उच्यते -

"निर्गुणो निष्क्रिया नित्यानिर्विकल्पो निरञ्जनः।

निर्विकारो निराकरो नित्यमुक्तोऽस्मि निर्मलः॥"[xxiii]इति

एवम् आत्मनात्मविवेकः ब्रह्म प्रत्यक्चैतन्यं सृष्टिः मोक्षः मोक्षसाधनानि आत्मा तद्विज्ञानं च सर्वं युक्तिपूर्णवचोभिः शङ्कराचार्येण आत्मबोधे प्रतिपादितम्। तेनैव अस्य वेदान्तप्रकरणग्रन्थस्य माहात्म्यं ध्वनितं भवति।

आश्रितग्रन्थसूची

- आचार्यः, बादरायणः, 2018 ब्रह्मसूत्रशाङ्करभाष्यम्, श्रीगोविन्दानन्दः (भाष्यरत्नप्रभाटीका), श्रीवाचस्पतिमिश्रः (भामतीटीका), आनन्दगिरिः (न्यायनिर्णयः), आचार्यजगदीशशास्त्री (सम्पादकः), कोलकाता: मोतीलाल बनारसीदासः, ISBN:- 978-81-208-0526-2
- मुरलीधरपाण्डेयः, 2016, शाङ्करवेदान्तकोशः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी
- शङ्कराचार्यः, 1978, सर्ववेदान्तसिद्धान्तसारसंग्रहः, पण्डित रामस्वरूपशर्मा (सम्पादकः), सनातन धर्म यन्त्रालय, मोरादावाद
- शङ्कराचार्यः, 2012, उपनिषद्भाष्यम् (खण्डः 1,2,3), एस. सुब्रह्मण्यशास्त्री (सम्पादकः), श्रीदक्षिणामूर्तिमठप्रकाशनम्, वाराणसी
- शङ्कराचार्यः, 2015, श्रीमद्भगवद्गीताभाष्यम् (खण्डः 1,2), श्रीमणिद्राविडशास्त्री (सम्पादकः), श्रीदक्षिणामूर्तिमठप्रकाशनम्, वाराणसी
- शङ्कराचार्यः, आत्मबोधः, निर्णयसागर मुद्रणालय, मुम्बईपुरी
- शङ्कराचार्यः, ईशादि नौ उपनिषत्, गीताप्रेस, गोरखपुरम्
- श्रीशङ्कराचार्यविरचितग्रन्थसङ्ग्रहः (प्रकरणग्रन्थाः), 1925, रा. रा. हरि रघुनाथ भागवत (संशोधकः), Ashtekar & Co, Poona.
- श्रीसदानन्दः, 2019, वेदान्तसारः, आचार्यः बदरीनाथशुक्लः (हिन्दीव्याख्यासहितः), मोतीलाल-बनारसीदासः, षष्ठसंस्करण, ISBN : 978-81-208-2393-8
- संस्कृत वाङ्मय का बृहद इतिहास (दशमखण्डः वेदान्तः),1996, श्री बलदेव-उपाध्यायः (सम्पादकः), उत्तर-प्रदेश-संस्कृत-संस्थान

तथ्यसूत्राणि

[i]आत्मबोधः १
[ii]आत्मबोधः २
[iii]मनुस्मृतिः १२/१०४
[iv]आत्मबोधः ३
[v]आत्मबोधः ४
[vi]आत्मबोधः ६
[vii]आत्मबोधः ८
[viii]छान्दोग्योपनिषत्
[ix]आत्मबोधः ९
[x]आत्मबोधः १०
[xi]आत्मबोधः ११
[xii]आत्मबोधः १२
[xiii]आत्मबोधः १५
[xiv]आत्मबोधः १६
[xv]आत्मबोधः १७
[xvi]आत्मबोधः १८
[xvii]आत्मबोधः १९
[xviii]आत्मबोधः २०
[xix]आत्मबोधः २५
[xx]श्वेताश्वतरोपनिषत् ६/१८
[xxi]गीता २/२५
[xxii]आत्मबोधः २६
[xxiii]आत्मबोधः ३४

****

24. ऋग्वेदे अलङ्कारवर्णनम्

डॉ. राहुल कुमार झा
सहायकाचार्यःस
वेदकर्मकाण्डपौरोहित्यविभागः
वेदव्यासपरिसरः, केन्द्रीयसंस्कृतविश्वविद्यालयः हि.प्र.

वेदमन्त्रेषु अलङ्काराणां छटा स्वीयां सूक्ष्ममर्मज्ञतां प्रकटयति । एते अलङ्काराः स्वतः आविर्भूता अलङ्काराः सन्ति । वैदिकाऽलङ्कारेषु यत्सौष्ठवं यत्पाटवं, यदार्जवं शोभते न तदन्यत्र प्राप्यते। वैदिकऋषिः कविष्वस्ति कविः । वैदिकमन्त्रेषु प्रयुक्ताऽलङ्काराः सौन्दर्यस्य कोमलां भावनां सम्यक् अभिजानात्येव न, तत्प्रकटीकरणेऽपि ते परमप्रवीणाः सौन्दर्याभिव्यक्तीकरणे तेषां सरलभावना दृश्यते। एते अलङ्काराः कविकथनं प्रभावशालीकरणे, प्रतिपाद्यविषयाणां रोचकचित्रार्पणे, हृदयगतभावम् आवर्जयितुञ्च सर्वथा समर्थाः सन्ति । रूपकन्तु वेदस्य कञ्चन प्रशंसनीयो बहुलप्रयुक्तालङ्कारोऽस्ति । वेदानां शैली एव रूपकमयी वर्त्तते । सुष्ठूपमानाम् एका सन्ततिः ऋग्वेदीयमन्त्रेषु उल्लसिता भवति। अन्यालङ्कारेषु अतिशयोक्ति-व्यतिरेक-समासोक्त्यादीनाम् अनेकेषाम् अपि अलङ्काराणाम् अत्र दर्शनं भवति । कवेः उपमा अतिप्रियोऽलङ्कारः इति प्रतीयते, यस्य शृङ्खलाऽतीव चारुतया विन्यस्ता कृताऽस्ति यथा -

अभ्रातेव पुंस एति प्रतीची गर्त्ता रुगिव सनये धनानाम् ।
जायेव पत्य उशती सुवासा उषा हस्रेवः निरिणीते अप्सा ॥[1]

उषा कदाचिद् भ्रातृहीना भगिनीव स्वदायभागम् अवाप्तुं पितृस्थानीयसूर्यस्य पार्श्वे समायाति, कदाचित्सुवस्त्रं धारणं कृत्वा पतिं स्वानुरागरज्जौ संयमनाय कमनीया कामिनीव स्वपत्युः सम्मुखे निजसौन्दर्यं प्रकटीकरोति। वैदिककविः स्वोपमानं सञ्चयितुं पार्श्ववर्त्तिनः पशुजीवनम् अपि अवलम्बनं करोति । सायंकाले गोचरभूम्यां प्रत्यागतानां गवां दृश्यस्तमतीव प्रियोऽस्ति । इन्द्रस्तुतौ अङ्गिरसहिरण्यस्तूपऋषेरुक्तिरियमस्ति यत् त्वष्ट्रानिर्मितेन स्वरयुक्तवज्रेण यदेन्द्रः पर्वताश्रितं वृत्रं जघान तदा रम्भणं कुर्वन्तीं समागतानां गवाम् इव जलानि समुद्रम् अनुजग्मुः यथा -

अहन्नहिपवते शिश्रियाणां त्वष्टास्मै वज्रं स्वयं ततक्ष ।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमवजग्मुरापः ॥[2]

अत्रत्या उपमा तत्सर्वमपि अतितरामेव समीचीनतया प्रकाशयन्ती लक्ष्यते, यन्निखिलं विशालैका पदपङ्क्तरपि नैतावत्या ललिततयाऽऽविर्भावयितुं सक्षमा अस्ति । वाश्रा धेनवः इत्यनेन पदेन वत्सदर्शनाऽऽकुलिताभिः नदीभिः धेनुभिः सह वृष्ट्याः साम्यं कृत्वा वैदिकऋषिः वेदपाठकानामग्रे वृष्ट्या आक्ष्यर्थवत्वं झञ्झावातेन सह वर्षणत्वं समुद्रं प्रति वेगेन प्रवहणशीलत्वं त्वरित्वञ्च अनेकविधस्थितेः अलङ्घ्यत्वञ्च इत्यादि बहून् भावान् समुपस्थापयति। हृदयवृत्तीनां मार्मिकाभिव्यक्तये वरुणसूक्तानाम् अनुशीलनं विशेषेण सहायकं भवति । महर्षिणा वसिष्ठेन एकस्मिन्नितान्त-भावप्रवणसूक्ते स्वकीयाराध्यदेवं वरुणं प्रति स्वकीयं कोमलोद्गारं प्रकटितम्। ऋषिः असौ आत्मानं पृच्छति - कदाऽहं वरुणेन सह मैत्रीमाप्स्यम्? क्रोधरहितो भूत्वा प्रसन्नचित्तेन वरुणः कदा मद्दत्तं हविष्यं ग्रहीष्यति? कदाऽहं प्रसन्नमनसा तस्य प्रसादं प्राप्स्यामि? इति ।

उतस्वया तन्वा संवदे तत्कदान्वन्तर्वरुणे भुवानि ।
किं मे हव्यमहृणानो जुषेत कदा मृडीकं सुमना अभिख्यम् ॥[3]

विदुषां मीमांसया वरुणकोपेन यदा सः अवगतः अभवत्, तदा सः कथयति- हे देव! पितृभिः कृतद्रोहान् अपेहि, तान् द्रोहान् विरोधान् च अपहियताम्, ये मया स्वशरीरेण कृताः । यथा पशून् अपहर्तारं चौरम् तथा रज्वा बद्धं वत्सं जनाः मुक्तं कुर्वन्ति, तथैव मम अपराधरज्वा बद्धं वसिष्ठम् अपि त्वं मोचय इति।

अव द्रुग्धानि पित्र्या सृज्या नोऽव या वयं चकृमा तनूभिः ।
अव राजन् पशुतृपं न वायुं सृजा वत्सं न दाम्नो वसिष्ठम् ॥[4]

आत्मसमर्पण-नम्रता-दीनता-अपराधस्वीकृत्यादिभिः भव्यभावनाभिः मण्डितं सूक्तमिदं तद्वैष्णव-भक्तानां वाणीं शङ्कतयन्ति, यस्यां ते सहस्रापराधं कृत्वाऽपि भगवता सहात्मसात्कर्त्तुं याचयन्ति। सूर्योदयस्य दृश्यमपि तं प्रियमस्ति । अस्यापि वर्णनं बहुविधाऽलङ्कारमाश्रित्य कृतं तेन । प्रभातवर्णनप्रसङ्गे सः कथयति यथा कोऽपि जनः कमपि चर्म नीत्वा जलाभ्यन्तरे स्थापयन्ति, तथैवोदिते सूर्ये तस्य किरणानि अन्धकारं निक्षिपन्ति यथा –

दविध्यतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्वन्तः॥[5]

---

[1] ऋग्वेदशाकलशाखा – १.१२४.७
[2] ऋग्वेदशाकलशाखा – १.३२.२
[3] ऋग्वेदशाकलशाखा – ७.८६.२
[4] ऋग्वेदशाकलशाखा – ७.८६.५

रूपकाणामपि बाहुल्यम् ऋग्वेदस्य मन्त्रेषु उपलब्धमस्ति । सूर्यः आकाशस्य स्वर्णिमो मणिरस्ति यथा - **दिवो रुक्म उरुचक्षा उदेत** । सूर्यस्तु तद्रञ्जितप्रस्तरखण्डमस्ति यदाकाशे स्थापितमस्ति यथा - **मध्ये दिवो निहितः पृश्निरश्मा** ।[6] अग्निः स्वप्रभया आकाशं स्पृशति स्पष्ट एवास्ति यदेते मन्त्रा अतिशयोक्तिमूलकाः सन्ति यथा - **धृतप्रतीको बृहता दिवि स्पृशा** ।[7] ऋग्वेदे अतिशयोक्त्या उदाहरणस्य प्रख्यातोऽयं मन्त्रोऽस्ति, सायणानुसारेण यस्मिन् यज्ञस्य अथवा पातञ्जल्यानुसारेण शब्दस्य अथवा राजशेखरानुसारेण काव्यस्य स्तुतिः कृता अस्ति -

चत्वारि शृङ्गास्त्रयोऽस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याम् आविवेश ।।[8]

अपरमप्युदाहरणमस्ति यथा -

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्नन्यो अभिचाकशीति ॥[9]

सुष्ठु पक्षधरौ, सहवासिनौ, समानख्यातौ, द्वौ पक्षिणौ एकस्यैव वृक्षस्योपरि स्थितौ, तयोरेकः सुस्वादुफलं भक्षयति, अपरस्तु अभुक्त्वैव विराजमानोऽस्ति। अत्र पक्षीद्वयस्य उपमानेन जीवात्मपरमात्मरूपम् उपमेयस्य सर्वथा निगरणत्वेन अतिशयोक्तिरस्ति । उत्तरार्द्धे पक्षीद्वयस्य स्वभावे वैभिन्येन व्यतिरेकाऽलङ्कारस्यापि गूढः सङ्केतो दृश्यते। व्यतिरेकस्य अपरमपि उदाहरणमृतचक्रस्य वर्णनमस्ति -

द्वादशारं नहि तज्जराय वर्वर्त्ति चक्रं परिधामृतस्य।[10]

उपनिषत्सु अपि अनेकेषाम् अलङ्काराणां दृष्टान्ताः प्राप्यन्ते। कठोपनिषदि रथस्य रूपकं शरीरमस्ति। ऋग्वेदे ऋतुवर्णनस्य अप्यनेके मन्त्रा सन्ति । पर्जन्यसूक्ते वर्षायाः नैसर्गिकं वर्णनमस्ति । मण्डूकसूक्तेऽपि वर्षाकालस्य एको रमणीयः दृश्योऽस्ति। अत्रैकस्य दर्दुरस्य शब्दं श्रुत्वा अपरोऽपि टरट्टरायते । ध्वनिरियं गुरुवचनं श्रुत्वा वेदध्वनिकतॄणां शिष्याणां पाठध्वनिरिव प्रतीतो भवति -

यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः।
सर्वं तदेषां समृधेव पर्व यत् सुवाचो वदतनाध्यपप्सु ॥[11]

अनेन प्रकारेण वेदेषु अलङ्काराणां प्रभाऽऽलोचकानां दृष्टिं बलादाकर्षति। उषादेव्याः समुपलब्धानि सूक्तानि काव्यदृष्ट्याऽपि नितान्तानि सरसानि सहजानि भव्यभावमण्डितानि च सन्ति। प्रभाते अरुणिमामण्डितं, सुवर्णच्छटाविच्छुरितं प्राचीनभूमण्डलं सर्वेषां ध्यानाकर्षणं करोति। वैदिकऋषिः तत्सौन्दर्यं प्रेमपूरितदृष्ट्या एव पश्यति । तद् दिव्यरूपं दृष्ट्वैव परिमुह्यति । उषादेवी मानवीस्वरूपे एव कविवल्लभा भवति चेद् उषा महान् स्वर्गलोकस्य एवाधिकारिणी मात्रम् एव भवेत्, तदाऽस्याः विश्वस्य उपरि ऊर्ध्वलोक एव स्वदिव्यच्छविना जगदाकर्षयन्ती स्वात्मन्येव दीव्यति, किञ्चात्र उषादेव्या सह वैदिकऋषेः अनन्यता प्रतिभाति । कस्यचन पदार्थस्य सम्यग्विलोकनं कृत्वा तस्य स्वाभाविकतया यद् यथायथवर्णनं, तदेव कलायाः उत्कृष्टत्वं स्मृतम्' । यद् रस्किन आह, तद् वैदिकऋषेः प्रकृतिवर्णने कृत्स्नतया अन्वर्थी भवति । तदीये प्रकृतिवर्णने, उषादेव्याः सौन्दर्यकथने च तस्य निरीक्षणनूतनता सहृदयताया उदात्तता, कल्पनाया अभिनवोन्मेषो च विद्योतते । तत्प्रकृतिश्रियस्तस्य प्रकृतिजनन्युत्सङ्गे शैशवादेव क्रीडनं वर्द्धनञ्च वेदयन्ति । अतः उषावर्णने प्रकृतिलक्ष्मी तथा विराजते यथा मणिमालायां स्वर्णसूत्रम् । उषा केवलं बाह्यसौन्दर्यस्यैव प्रतिमा नास्ति, प्रत्युत सा कवये आन्तरिकसुषमायाः अपि प्रतिमूर्त्तिरूपेण अवस्थिताऽस्ति । पद्मिन्युपमितत्वात्तस्याः सुकोमलत्वं कृशाङ्गत्वं सितत्वस्पर्शं सुखत्वादिकञ्च कियन्मनोज्ञभावेन पाठकस्य पुरतः समुपस्थितं भूत्वा तन्मनो नन्दयन्तीहेत्यपि ध्यानं कर्षयति। वैदिकऋषेः प्रतिभाचातुरी उषादेव्याः चरित्रचित्रणे अपि सर्वथैव कुशला। अतः कविः अत्र उषादेव्याः यच्चरित्रं चित्रयति, तत्सजीवतां प्राप्य हृदयावर्जकं च जायते। अत एव कविः कथयति - 'हे प्रकाशवति उषे ! त्वं कमनीया कन्या इव अत्यन्ताकर्षणमयी भूत्वा अभिमतफलदातुः सूर्यस्य पार्श्वे गच्छति तथा तत्र तत्सम्मुखे स्मिताननना तरुणीव स्ववक्षम् अनावृतं करोति । उक्तञ्च -

कन्येव तन्वा शाशदानां एषिदेवि देवमियक्षमाणम् ।
संस्मयमाना युवतिः पुरस्तादाविर्वक्षांसि कृणुसे विभाती ॥[12]

अत्र कवेर्मानवीकरणस्य भावना अतिप्रबलाऽस्ति । अत्र उषादेव्याः कुमारीरूपस्य कल्पना वर्त्तते । स्मितवदनायाः तस्याः सुन्दरस्वरूपं प्रकटयति । युवतिकन्यायाः कल्पना, सूर्यस्य समीपगमनस्य भावना कवेः व्यापकदृष्टित्वं ज्ञापयति । उषादेव्याः उपरि कृतान्या कल्पनाऽपि तथैव दृग्गोचरी भवति, उषा स्वप्रकाशेन संसारं तथैव संस्कृतं करोति यथा कोऽपि योद्धा स्वं शस्त्रं घर्षयित्वैव तं संस्करोति । एवं प्रकारेण ऋग्वेदे अलङ्काराणां वर्णनं दृष्टिपथे आगच्छति इति शम् ।

---

[5] ऋग्वेदशाकलशाखा – ४.१३.४
[6] ऋग्वेदशाकलशाखा – ५.४७.३
[7] ऋग्वेदशाकलशाखा – १.१.४८
[8] ऋग्वेदशाकलशाखा – ४.४८.३
[9] ऋग्वेदशाकलशाखा - १.१६४.२०
[10] ऋग्वेदशाकलशाखा – १.६४.११
[11] ऋग्वेदशाकलशाखा – ७.१०३.५
[12] ऋग्वेदशाकलशाखा – १.१२३.१०

25. वेदेषु पर्यावरणविज्ञानम् (Environment Sciences)

केशव कुमार पाण्डेयः

शोधच्छात्रः

केन्द्रीयसंस्कृतविश्वविद्यालयः

गङ्गानाथझापरिसरः, प्रयागराजः

प्रस्तावना-

वेदशब्दः विद् धातोः घञ् प्रत्ययेन निष्पन्नः भवति । अस्यार्थः भवति ज्ञानम् । विष्णुमित्रो वदति यथा - **विद्यन्ते ज्ञायन्ते लभन्ते एभिर्धर्मादि-पुरुषार्था इति वेदाः**[1]। विद् धातोः चत्वारो अर्थाः भवन्ति -विद् सत्तायाम्, विद् ज्ञाने, विद् विचारणे, विदलृ लाभे। मनुना वेदविषये उक्तं यथा - **वेदोऽखिलो धर्ममूलम् ।**[2] **सर्वज्ञानमयो हि सः।**[3] वेद एव समेषां ज्ञनानां मूल विद्यते । अयं हि ब्राह्मणानां निष्कारणो धर्मेति कथयति महाभाष्यकाराः - **ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।**[4] आचार्यसायणः यथा - **इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।**[5]

चत्वारः वेदाः जगति प्रसिद्धाः वर्तन्ते । ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः चतुर्षु वेदेष्वपि शिल्पविज्ञानस्य चर्चा बहूत्र श्रूयमाणो भवति । वेदेषु सर्वं निहितमस्ति इति दृश्यते । उक्तञ्च मनुना - **सर्वज्ञानमयो हि सः।**[6] अत्र सः पदेन वेदः गृह्यते । सर्वेषामपि ज्ञानानां मूलतत्वं वेद एवेति निश्चप्रचम् । **विष्णुमित्रः वेद विषये ज्ञापयति यत् - विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादिपुरुषार्था इति वेदाः।**[7] मनुनाऽपि एकस्मिन् स्थाने वाचयाम्बभूव -

सर्वेषां तु स नामानि कर्माणि च पृथक् पृथक् ।

वेदशब्देभ्य एवादौ पृथक् संस्थाश्च निर्ममे ।।[8]

पर्यावरणशब्दस्य विषये पश्यामः चेत् परित आवरम् इति । परि उपसर्गपूर्वस्य अयं शब्दो निष्पद्यते । अस्मान् परितः यानि वातावरणानि वर्तन्ते, तानि सर्वाण्यपि पर्यावरणसंज्ञकानि विद्यन्ते । मनुष्यगतक्रियाकलापेन उत्पन्नावशिष्ट उत्पादरुपपदार्थेन उर्जायाः विमोचनेन पर्यावरणीयक्षतिः जायते सैव प्रदूषणशब्देन उच्यते ।

पर्यावरणे वैदिकचिन्तनम्-

वेदेषु पर्यावरणसंरक्षणोपायाः बहुधा लभन्ते । अथर्ववेदे एकस्मिन् स्थानविशेषे पर्यावरणीयसंघटकतत्त्वानि विद्यन्ते।

त्रीणि छन्दांसि कवयो वि येतिरे पुरुरूपं दर्शतं विश्वचक्षणम् ।

आपो वाता ओषधयः तान्येकस्मिन् भुवन आर्पितानि ।।[9]

केचन वायुसंरक्षणोपायाः वेदेषु बहुत्र दृश्यन्ते । यथा ऋग्वेदस्य एकस्मिन् मन्त्रे वायुषु अमृतं भवति इति कथयति मन्त्रेऽस्मिन् ।

यददो वात ते गृहे अमृतस्य निधिर्हितः ।

तेन नो देहि जीवसे ।।[10]

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् । धियं घृताचीं साधन्ता ।।[11]

जलविशेषेण मनुष्यः गतिं शक्तिं च प्राप्नोति। अथर्ववेदे रसायनविज्ञानविषये कानिचन महत्वपूर्णानि सूत्राणि निबद्धानि सन्ति, तानि सर्वाणि मयाऽत्रोल्लिख्यते। जलस्योत्पत्तिविषये जलस्य गुणाः, जलस्य महत्त्वम्, इमे विषया उल्लिखिताः वर्तन्ते। जलस्योत्पत्तिविषये अथर्ववेदे उक्तं यत् जले

[1] तै.भा.भू.
[2] मनुस्मृति - 2.6
[3] मनुस्मृति - 2.7
[4] महा.आह्निक -1
[5] तै.स.भा.भू
[6] मनुस्मृति - 2.6
[7] विष्णुमित्रः ऋ.प्रा.व्या
[8] मनुस्मृतिः - 1.21
[9] अथर्ववेदः - 18.1.17
[10] ऋग्वेदः - 10.186.3
[11] ऋग्वेद - 1.2.7

अग्निसोमौ भवथः यथा - **अग्नीषोमौ बिभ्रति आप इत् ताः।[12] अप्सु-आसीन्-मातरिश्वा प्रविष्टः।[13]** जलस्य विविधानाम् गुणानाम् वर्णनम् वर्तते हिमालयात् निस्सरनापः नद्यां प्रविष्टो भवति तद् जलम् हृदयरोगे लाभप्रदं भवति। स्यन्दयन् जलं शुद्धं गुणकरं च भवति ।

मित्रावरुणौ त्वा वृष्ट्यावताम् ।[14]

मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह ।[15]

हे मित्रावरुणौ त्वत्तः एव वृष्टिः संजायते ।

जलस्य भेदाः – 1. धन्वन्यजलम् 2. अनूप्यजलम् 3. खनित्रमजलम् 4. वर्ष्यजलम् 5. हैमवत्जलम् 6. उत्स्यजलम् 7. सनिष्यदजलम् 8. सैन्धवजलम् 9. समुद्रियजलम्।[16] अथर्ववेदीय एकस्मिन् मन्त्रे जलस्य पञ्चगुणा उक्ताः - 1. तपस् 2. हरस् 3.अर्चिस् 4. शोचिस् 5. तेजस्

आपो यद् वो तपः हरःअर्चिः शोचिः तेजः[17]।

पञ्चमकाणडस्य एकस्मिन्मन्त्रे हरित, रजत्, अयस् इति धातुत्रयस्य तपनं विधाय यज्ञोपवीतनिर्माणविधिः दर्शितः ।

हरिते त्रीणि रजते त्रीणि अयसि त्रीणि तपसाविष्ठितानि ।[18]

केन प्रकारेण रसायनोत्पत्तिः जायते एकस्मिन् स्थले उक्तं यथा-**आपो दिव्या अचायिसं रसेन समपृक्षमहि ।[19]** वृष्ट्या सोमादिदेवाः सम्मिल्य रसाययननिर्माणं कुर्वन्ति । अनेन रसायनोदकेन मनुष्याः दीर्घायुः लभन्ते ।

पर्यावरणीय शोधकतत्त्वानि - अथर्ववेदे मुख्यतः पर्यावरणीयशोधकतत्त्वविषयकं केचन मन्त्राः लभन्ते । यथा - **ये पर्वता सोमपृष्ठा आपः ।**

वातः पर्जन्यः आदग्निस्ते क्रव्यादमशीशनम् ।।[20]

अस्मिन्नेववविषये ऋग्वेदेऽपि उक्तं विद्यते बहुषु मन्त्रेषु पर्यावरणीयशोधक तत्त्वानाम् उल्लेखः लभमानो भवति ।

दिवस्पृथिव्योरव आ वृणीमहे , सिन्धून् पर्वतानाम् सूर्यम् उषासम् ईमहे ।[21]

वेदे रसायनतत्वं प्रदर्श्य अवादि यास्केन निरुक्ते - **अथादित्यात् ऊदीचि प्रथमसमावृत्त आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयम् अस्पर्शयन् धारयति तत् पिरदीप्यते ।[22]** जले सर्वे देवाः निवसन्ति इति ऋग्वेदस्य दशमे मण्डले निर्दिष्टमस्ति –

यद्देवा अदः शलीले सुसंरब्धा अतिष्ठत् ।[23]

प्रविष्टा देवा सलिलानि आसन् ।।[24]

लोकस्थ **ओजोनपरत (Ozone layer)** उच्यते तस्यस्मिन् विषयेऽपि उक्तं यथा -

महत् तदुलम्बं स्थविरं तदासीद्

येनाविष्टितः प्रविवेशिथापः ।[25]

तस्योत जायमानस्य-उल्ब आसीत् हिरण्ययः ।[26]

अयं परत सूर्यात् निर्गच्छति तथा वृक्षगुल्मानां रक्षणमपि विदधाति तथा सर्वान्नपि वस्तुनः पालनाय बहूपयोगी भवति।

---

[12] अथर्ववेद - 3.13.5
[13] अथर्ववेद - 10.8.40
[14] शुक्ल.यजु. - 1.26
[15] शुक्ल.यजु. - 13.53
[16] अथर्ववेद. - 1.6.4.19
[17] अथर्ववेद - 2.23.2
[18] अथर्ववेद - 5.28.1
[19] अथर्ववेद - 7.89.1
[20] अथर्ववेद - 3.23.10
[21] ऋग्वेदः - 10.35.2
[22] निरुक्तम् - 7.23
[23] ऋग्वेद - 10.72.6
[24] अथर्ववेद - 10.8.40
[25] ऋग्वेदः - 10.51.1
[26] अथर्ववेदः - 4.2.8

भारतीयसंस्कृतौ पृथ्वी मातासदृशी विद्यते पश्यामः-अथर्ववेदस्थ एकस्मिन् मन्त्रे कथितमस्ति **माता भूमिः पुत्रोऽहं पृथिव्या पर्जन्यः पिता स उ नः पिपर्तु ।**[27]

यजुर्वेदस्य अनेकेषु मन्त्रेषु लोकानां हानिर्न विधेया इति कथयति ऋषिः अनेकेषु स्थलेषु यथा -

द्यां मा लेखीः, अन्तरिक्षं मा हिंसीः, पृथिव्या सम्भव ।[28]

उपसंहारः -

अनेन ज्ञायते यद् वेदे पर्यावरणीय तत्वं बहुत्र कथितमस्ति इति सर्वेष्वपि वेदेषु दृश्यमानो भवति ।

यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद।

यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो यमत्येष आत्मान्तर्याम्यमृतः।।[29]

इति

****

[27] अथर्ववेदः - 12.1.12
[28] शुक्ल.यजु. - 5.83
[29] बृहदारण्यकम् - 132

26. वेदेषु वृष्टिविज्ञानम् (Meteorology Sciences)

कृष्णकुमार पाण्डेयः
शोधच्छात्रः
केन्द्रीयसंस्कृतविश्वविद्यालयः
गङ्गानाथझापरिसरः, प्रयागराजः

प्रस्तावना-

अपौरुषेयं वाक्यं वेद[1] इति सर्वजनविदितमस्ति । वेदशब्दः विद्धातोः घञ्प्रत्ययम् कृत्वा निष्पद्यते सिद्धान्तकौमुद्याम् यथा - **सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।**

विन्दति विन्दते प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ।।[2]

आचार्यसायणः यथा - **इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः।**[3]

चत्वारः वेदाः जगति प्रसिद्धाः वर्तन्ते ।ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः चतुर्षु वेदेष्वपि शिल्पविज्ञानस्य चर्चा बहूत्र श्रूयमाणो भवति ।वेदेषु सर्वं निहितमस्ति इति दृश्यते ।

उक्तञ्च मनुना - **सर्वज्ञानमयो हि सः।**[4] अत्र सः पदेन वेदः गृह्यते । सर्वेषामपि ज्ञानानां मूलतत्वं वेद एवेति निश्चप्रचम् । विष्णुमित्रः वेद विषये ज्ञापयति यत्-

विद्यन्ते ज्ञायन्ते लभ्यन्ते एभिर्धर्मादि-पुरुषार्था इति वेदाः ।[5]

तिलक महोदयोऽपि वेदविषये वाचयामास –

प्रामाण्यवुद्धिर्वेदेषु साधनानामनेकता ।

उपास्यानामनियमः एतद् धर्मस्य लक्षणम् ।।[6]

विषयवस्तु-

वृष्टिविज्ञान विषये मनुना अवादि यत् –

अग्नौ प्रास्ताहुतिः सम्यग् आदित्यमुपतिष्ठते ।

आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ।।[7]

एतस्यार्थः-अग्नौ प्रक्षिप्तं हविः सुर्याय भवति । ततः वृष्टिः वृष्टे अन्नम् अन्नात् प्रजाः जायन्ते अत्र -विद्युत् माध्यमेन आदित्यमण्डलं हविः गच्छति ।

जले अग्नितत्त्वम् - चतुर्षु वेदेषु अनेकेषु च मन्त्रेषु जले अग्नितत्त्वमस्तीति निर्देषो विद्यते ।अयञ्चाग्निः चराचरेषु सर्वत्रैव विद्यमानमस्ति ।

अग्ने पित्तम् अपामसि.....।[8] **क इमं वो निण्यमा चिकेत.....गर्भो अपसाम् ।**[9]

गर्भो यो अपां, गर्भो वनानां, गर्भश्च स्थातां, गर्भश्चरथाम् ।[10]

मेघानां संरचना एवं वृष्टिः -

ऋग्वेदे यजुर्वेदे एवञ्च अथर्ववेदे केचन तादृशाः मन्त्राः सन्ति येषु केन प्रकारेण मेघानां संरचना भवति इति कथितमस्ति । मन्त्रेषु कथितं वर्तते केन प्रकारेण सूर्यःस्व रश्मया वाष्पमाध्यमेन आकर्षणं करोति तदा वृष्टिःसञ्जायते।

---

[1] मीमांसा
[2] सिद्धान्तकौमुदी
[3] तै.स.भा.भू
[4] मनुस्मृति 2.6
[5] विष्णुमित्रः ऋ. प्रा. व्या
[6] लोकमान्यतिलकः
[7] मनुस्मृतिः 3.76
[8] अथर्ववेदः18.3.5
[9] ऋग्वेदः 1.95.4
[10] ऋग्वेदः 1.70.2

उक्तञ्च ऋग्वेदे –

कृष्णं नियानं हरयः सुपर्णा आपो वसाना दिवमुत्पतन्ति ।[11]

समानमेतदुदकम् उच्चैत्यव चाहभिः।

भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः।।[12]

यजुर्वेदे.अथर्ववेदे च वर्णितमस्ति यत् सूर्यः मरुतां च सहाय्येन समुद्रे प्रविश्य वाश्पेन जलं स्वीकृत्य वृष्टिःकरोति ।

मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह ।[13]

उदीरयत मरुतः समुद्रतस्त्वेषो अर्को नभ उत् पातयाथ ।

वाश्रा आपः पृथिवीं तर्पयन्तु ।।[14]

मेघस्य संरचना विषये मरुतां महत्वपूर्ण योगदानं दृश्यते ऋग्वेदे एवञ्च अथर्ववेदे विस्तरेण वर्णनं मिलति ।समुद्रे स्थितं जलं मरुत देवता स्वीकृत्य आकाशे स्थापयति तेन वृष्टिः सञ्जायते।

उदीरयथा मरुतःसमुद्रतो यूयं वृष्टिं वर्षयथा परीषिणः।[15]

मरुद्भिः प्रच्युता मेघा वर्षन्तु पृथिवीमनु ।[16]

मेघस्य सहायक तत्त्वानि -

जलम् , मरुत्, अग्निः, अभ्र, विद्युत् इत्यादि तत्त्वानां उल्लेखःमिलति अथर्ववेदे। परं तैत्तिरीय संहितायां वृष्टेः कारणभूताः केचन देवाः स्मर्यन्ते ते मरुत्, अग्निः, सोम, सूर्य इत्यादयः देवाः वर्णिता ।

अपाम् अग्निः आपो विद्युत् अभ्रं वर्षः। मरुद्भिः प्रच्युता मेघा।*[17]*

मारुतमसि ।देवा वसव्या अग्ने सोम सूर्य । देवा शर्मण्या मित्रावरुणाऽर्यमन्।*[18]*

मित्रं हुवे पूतदक्षं वरुणं च रिशादसम् ।धियं घृताचीं साधन्ता।*[19]*

ब्राह्मणग्रन्थे उपनिषदां च अस्मिन् विषये वर्णनं मिलति यत् - पुरोवात्, अभ्र, विद्युत्, स्तनयित्नु ।

अग्नेर्वै धूमो जायते धूमादभ्रम् अभ्राद् वृष्टिः।*[20]*

देवाःपुरोवातं ससृजिरे अभ्राणि समप्लावयन् .....विद्युतम् .....स्तनयित्नुम् ....प्रावर्षयन्।*[21]*

अग्ने अष्ट रुपाणां वर्णनं शतपथ ब्राह्मणे मिलति । रुद्रः, सर्वः, पशुपतिः, उग्रः,अशनिः, भवः. महादेव, ईशानः।

एतानि अष्टौ अग्निरूपाणि । विद्युत् वा अशनिः।

पर्जन्यो वै भवः । पर्जन्यात् हीदं सर्वं भवति ।*[22]*

छान्दोग्ये अग्नेः स्वरुपत्रयस्य वर्णनं लभमानो भवतीति ज्ञायते । अत्रैव विविध स्वरुपमपि लभन्ते अग्नेः यथा - द्युलोके आदित्यरुपेण सूर्यः, अन्तरिक्षे पर्जन्यरुपेण मेघः विद्युतञ्च, पृथ्वीलोके - प्रत्येकस्य समिधा (Fuel), धूमः (Smoke),अर्चिष् (Radience, flame) आदि विषयाः अत्रोल्लिखिताः सन्ति।

पर्जन्यो वाव गौतमाग्निः, तस्य वायुरेव समिद्, अभ्रं धूमो ।

विद्युदर्चिः, अशानिरङ्गाराः ह्रादुनयो विस्फुलिङ्गा ।*[23]*

अप्सु-आसीन्-मातरिश्वा प्रविष्टः।*[24]*

---

[11] ऋग्वेदः 1,164,47
[12] ऋग्वेदः 1.164.51
[13] यजुर्वेदः 2.16
[14] अथर्ववेदः 4. 15. 5
[15] ऋग्वेदः 5.55.5
[16] अथर्ववेदः 4.15.7
[17] अथर्ववेदः 4.15
[18] तैत्तिरीय सं 2.4.7-8
[19] ऋग्वेदः 1.2,7
[20] शतपथ ब्रा.5.3.5.17
[21] शतपथ ब्रा.1.5.2.18
[22] शतपथ ब्रा,6.1.3.10.18
[23] छान्दोग्य 5.4.5,बृहदारण्यक 6.2.9

जलस्य विविधानि गुणानि वर्णयत् उक्तं वर्तते हिमालयात् निस्सरनापः नद्यां प्रविष्टो भवति तेन जलविशेषेण हृदयरोगे लाभप्रदं भवति। स्यन्दयत् जलं शुद्धं गुणकरं च भवति ।

मित्रावरुणौ त्वा वृष्ट्यावताम् ।[25]

मरुतां पृषतीर्गच्छ वशा पृश्निर्भूत्वा दिवं गच्छ ततो नो वृष्टिमावह ।[26]

हे मित्रावरुणौ त्वत्तः एव वृष्टिः संजायते ।

जलस्य भेदाः-1 धन्वन्यजलम् 2 अनूप्यजलम् 3 खनित्रम जलम् 4 वर्ष्य जलम् 5 हैमवत् जलम् 6 उत्स्य जलम् 7 सनिष्यद जलम् 8 सैन्धव जलम् 9 समुद्रिय जलम्।[27]

अथर्ववेदीय एकस्मिन् मन्त्रे जलस्य पञ्चगुणा उक्ताः-1तपस् 2हरस् 3अर्चिस् 4शोचिस् 5तेजस्

आपो यद् वो तपः हरःअर्चिः शोचिः तेजः[28]।

उपसंहारः-

अनेन व्याख्यानेन वयं ज्ञातुं शक्नुमः यत् वेदेषु वृष्टिविज्ञानस्य पक्षाः बहुत्र लभन्ते वेदेषु सर्वं निहितमस्ति इति एकेन श्लोकेन उक्तमाचार्यैः-

वेदेषु विविधा विद्या वेदेषु विविधा कला ।

वेदेषु ज्ञेयं विज्ञानं वेदेषु किं न विद्यते ।।

सन्दर्भग्रन्थाः

1. मीमांसा
2. सिद्धान्तकौमुदी
3. तैत्तिरीयसंहिताभाष्यभूमिका
4. मनुस्मृतिः
5. विष्णुमित्र ऋक्प्रातिशाख्यव्याख्या
6. अथर्ववेदः
7. ऋग्वेदः
8. यजुर्वेदः
9. तैत्तिरीयसंहिता
10. शतपथब्राह्मणम्
11. छान्दोग्योपनिषद्
12. बृहदारण्यकोपनिषद्

****

[24] अथर्ववेद 10.8.40
[25] शुक्ल.यजु.1.26
[26] शुक्ल.यजु .13.53
[27] अथर्ववेद 1.6.4.19
[28] अथर्ववेद 2.23.2

27. मोक्षतत्त्वत्वेन अतिथिसत्कारस्य विचारविमर्शो महाभारतदिशा

डॉ. श्याम बाबू

सहायकाचार्यः, साहित्यविभागः,

केन्द्रीयसंस्कृतविश्वविद्यालयः,

वेदव्यासपरिसरः, बलाहरः, हि. प्र.

मोक्षतत्त्वस्य प्रतिपादने अतिथिसत्कारस्य माहात्म्यं तु महत् अस्ति। मोक्षप्राप्तये अतिथिसत्कारस्य गुरुत्वत्त्वं कथमस्तीति महाभारतस्य शान्तिपर्वदिशा प्रतिपाद्यते। जीवजगति सदाचारस्य दृष्टान्तान् वयं प्राप्नुमः। जीवेन यः सदाचारः क्रियते, सोऽयं सदाचारो विशिष्टरूपेण जगदिदं प्रभावयति। अयं संस्काररूपेण सर्वान् मानवान् प्रेरयति। तथाहि वेदे उक्तमस्ति –

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति –सत्यंवद। धर्मंचर। स्वाध्यायान्माप्रमदः। आचार्यायप्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्नप्रमदितव्यम्। धर्मान्नप्रमदितव्यम्। कुशलान्नप्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् इति उपक्रम्य अतिथिदेवो भव॥[i] अर्थात् अतिथिदेवो भव इति वचनं समाजस्य पथप्रदर्शकरूपेण सद्भावनायाः प्रचारको वर्तते। तस्माद्धेतोः भारतसर्वकारेण अत्र पर्यटनविभागस्य ध्येयवाक्यरूपेण स्वीकृतमस्ति अतिथिदेवो भव इति।

मोक्षप्राप्त्युपायाः सर्वैरपि आचरितुं नैव शक्यते। ज्ञानं सर्वेषां प्राणिनाम् अन्तःकरणं प्रति नैव गच्छति। योगाचरणं तु महत् कठिनमस्ति। रुग्नजनः कर्म कर्तुमसमर्थो भवति। संरक्षणव्यवस्थादृष्ट्या आधुनिकसमाजे वर्णाश्रमधर्माधारितं चिन्तनं समाजे संस्थापयितुं नैव शक्यते। तपस्तु सर्वोत्कृष्टं वर्तते, आधुनिकसमाजे तपसः परिभाषां न जानन्ति जनाः, तदाचरणस्य का कथेति। अहिंसाचरणं तु सर्वैरपि ज्ञायते परन्तु अज्ञानवशाद् हिंसा भवति। समाजेऽस्मिन् अहिंसेति शब्दरूपेण एव वर्तते। तस्मात् मोक्षप्राप्त्युपायत्वेन अधुना सरलतमोपायः आलोच्यते। स च उपायो भवति अतिथिसत्कारः।

उपायोऽयं सदाचाररूपेण समाजस्य संस्कारको वर्तते। प्रत्येकेषु मानवेषु एषा भवेत्। अतिसत्कारः तादृशः संस्कारो वर्तते येन समाजे सद्भावनायाः जागरणं भवति। तस्मादेव वेदे उक्तमस्ति – अतिथिदेवो भव इति।

तथैव महाभारतेऽपि अतिथिसत्कारविषये महती आलोचना परिलक्ष्यते। तस्य दृष्टान्तरूपेण कर्णहरिश्चन्द्रयोः उपाख्यानमत्र स्वीक्रियते। देवभक्तातिथिभक्तयोः स्वरूपम् एतद् वर्तते यत् अतिथिभक्तो विना आतिथ्यं भोजनं न करोति स एव अतिथिभक्तः। देवभक्तस्तु विना देवं प्रसादं विनिवेद्य भोजनं करोति इति। पुनश्च अमृतभोजी स एव यः कुटुम्बजनानां मातृपितॄणां सेवकानां अतिथीनां भोजनात् परम्मेव भोजनं करोति। तथाहि महाभारते उच्यते –

भृत्यातिथिषु यो भुङ्क्ते भुक्तवस्तु सदा सदा।

अमृतं केवलं भुङ्क्ते इति विद्धि युधिष्ठिर॥[ii]

अपि च व्रताचरणे भोजनव्यवस्था महाभारतस्य कश्चन विलक्षणविषयो वर्तते। पारिवारिकाचरणेन उत्तमपरिवारस्य निर्माणाय संस्कारोऽयम् उपकारी भवति। गृहस्थजनेन कथं भोजनं करणीयं तत् अत्र दृष्टिपथमायाति। यः अतिथिप्रियमनुष्यः भृत्यप्रियमनुष्यः अतिथिभृत्यानां भोजनेन विना भोजनं न करोति, स स्वर्गलोकमाप्नोति। अपि च समाजे आदर्शरूपेण कार्यभारं सम्पादयति। तं जनं परिवारं वा दृष्ट्वा सामाजिकाः अनुप्राणिताः भवन्ति। अतिथिसत्कारः भरतस्य परिचयं विश्वे प्रतिष्ठापयति। तस्माद्धेतोः भारतसर्वकारस्य पर्यटनविभागे अतिथिदेवो भव इति एतत् वेदवचनं ध्येयवाक्यरूपेण स्थापितमस्ति। तथाहि महाभारते उच्यते –

अभुक्तवस्तु नाश्नानः सततं यस्तु वै द्विजः।

अभोजनेन तेनास्य जितः स्वर्गो भवत्युत॥[iii]

पुनश्च उच्यते देवतानां पितृपुरुषाणां पितॄणाम् अतिथिभृत्यानां भोजनात् परम् अवशिष्टभागं यो भुङ्क्ते स विघसाशी इति नाम्ना अभिधीयते। अर्थात् यज्ञशिष्ट अन्नस्य भोक्ता इत्यर्थः। विशिष्टजनोऽयं गृहस्थाश्रमस्य अन्तिमयज्ञस्य सुसम्पन्नं करोति। येन तस्य गृहस्थाश्रमस्य पञ्चयज्ञाचरणं सिध्यति। अतिथिसत्कारः एतादृशः संस्कारो वर्तते, येन नृयज्ञस्य सम्पादनं भवति। तथैव सर्वैरपि गृहस्थैः एतस्य आचरणं क्रियते स्म। तथाहि उच्यते –

देवताभ्यः पुतृभ्यश्च भृत्येभ्योऽतिथिभिः सह।

अवशिष्टं तु योऽश्नाति तमाहुर्विघसाशिनम्॥[iv]

एवमेव मोक्षप्राप्त्युपायेषु अतिथिसत्कारः किञ्चित् विलक्षणत्वं सम्पादयति। यत्तु सर्वैरपि आचरितुं शक्यते। तस्माद्धेतोः अस्माकं देशे गृहे गृहे अतिथिसत्कारात्मिका काचित् पूजा भवति। आबाल्यात् वृद्धं यावत् सर्वे अतिथिपूजां कुर्वन्तो भवन्ति। परन्तु अधुना समाजोऽयं कलुषितस्सन् एतादृशानां

सदाचाराणाम् आचरणे जनाः इच्छां नैव प्रकाशयन्ति। अस्माकं एतेन वैभवं समृद्धं भवति। भारतीयानां गर्वगौरवरूपेण राराजते संसारेऽस्मिन्। अतोऽस्माभिः सर्वैरपि अतिथिसत्काररूपो धर्मः पालनीयः इति।

महाभारतस्य त्रिपञ्चाशदधिकत्रिशततमेऽध्याये अतिथिसत्कारविषये काचित् चर्चा दृश्यते। तत्र महापद्मपुरः इति नामधेयमेकं नगरमासीत्। अत्र कश्चित् ब्राह्मणो निवसति स्म। स तु जितेन्द्रियः जितक्रोधः नित्यतृप्तः तपःस्वाध्यायनिरतः आसीत्। तथाहि भीष्मः भणति –

आसीत् किल नरश्रेष्ठ महापद्मे पुरोत्तमे।
गङ्गाया दक्षिणे तीरे कश्चिद् विप्रः समाहितः॥
सौम्यः सोमान्वये वेदे गताध्वा छिन्नसंशयः।
धर्मनित्यो जितक्रोधो नित्यतृप्तो जितेन्द्रियः॥
तपःस्वाध्यायनिरतः सत्यः सज्जनसम्मतः।
न्यायप्राप्तेन वित्तेन स्वेन शीलेन चान्वितः॥[v]

एषः ब्राह्मणः शास्त्रविहितानि सर्वाणि कर्माणि कृतवान्। तथाहि चिन्तयति केन प्रकारेण मे कल्याणं भविष्यतीति। तदा ब्राह्मणवेशेन कश्चन अतिथिसमागतः आसीत्। तस्य अतिथेः शास्त्रोक्तविधिना सत्कारं कृतवान्। अतिथिस्तु देवरूपो भवति। तस्मात् तस्य सत्क्रियाऽपि समीचीनरूपेण कर्तव्याऽस्ति, तथैव सर्वमाचरितम्। तेन वक्तुं शक्यते महाभारतेऽपि अतिथिसत्कारस्य माहात्म्यमधिकमासीत्। तथा च परिलक्ष्यते –

तस्यैवं खिद्यमानस्य धर्मं परममास्थितः।
कदाचिदतिथिः प्राप्तो ब्राह्मणः सुसमाहितः॥
स तस्मै सत्क्रियां चक्रे क्रियायुक्तेन हेतुना।
विश्रान्तं सुसमासीनमिदं वचनमब्रवीत्॥[vi]

ततः परं स च अतिथिः ब्राह्मणाय विविधान् मार्गान् उक्तवान्। महाभारतस्य शान्तिपर्वणि चतुःपञ्चाशदधिकत्रिशततमेऽध्याये अतिथिना स्वर्गप्राप्तये बहुविधाः मार्गाः उक्तास्सन्ति। तेषु केचन मार्गाः अत्र उपस्थाप्यन्ते। तद्यथा महाभारते अतिथिनोच्यते –

केचिन्मोक्षं प्रशंसन्ति केचिद् यज्ञफलं द्विजाः।
वानप्रस्थाश्रयाः केचिद् गृर्हस्थ्यं केचिदास्थिताः॥
राजधर्माश्रयं केचित् केचिदात्मफलाश्रयम्।
गुरुधर्माश्रयं केचित्केचिद् वाक्संयमाश्रयम्॥
मातरं पितरं केचिच्छुश्रूषन्तो दिवं गताः।
अहिंसया परे स्वर्गं सत्येन च तथा परे॥[vii]

अर्थात् केचन मोक्षस्य प्रशंसां कुर्वन्तो वर्तन्ते अपरे यज्ञफलस्य। केचित् वानप्रस्थाश्रमस्य अपरे गार्हस्थ्यधर्मस्य आश्रयं स्वीकुर्वन्ति। केचन राजधर्म-आत्मज्ञान-गुरुश्रुश्रूषा-मौनव्रतान् च आश्रित्य तिष्ठन्ति। अपरे पित्रोः सेवया स्वर्गं प्राप्नुवन्ति। केचन अहिंसया केचन च सत्येन स्वर्गं प्राप्नुवन्ति। केचित् वीरपुरुषाः युद्धं कुर्वन्तस्सन्तो हताः भवन्ति, तेन ते स्वर्गलोकं प्राप्नुवन्ति। केचिदुञ्छव्रतैः सिद्धाः स्वर्गमार्गं समाश्रिताः भवन्ति। अपरे च बुद्धिमन्तः संतुष्टचित्ताः जितेन्द्रियपुरुषाः वेदोक्तव्रतस्य पालनं कुर्वन्तस्स्वर्गं प्राप्नुवन्ति। केचित् स्वध्यायेन शुभसम्पन्नाः भूत्वा स्वर्गलोके स्थानं प्राप्तवन्तस्सन्ति। तथाहि महाभारते उच्यते –

आहवेऽभिमुखाः केचिन्निहतास्त्रिदिवं गताः।
केचिदुञ्छव्रतैः सिद्धाः स्वर्गमार्गं समाश्रिताः॥
केचिदध्ययने युक्ता वेदव्रतपराः शुभाः।
बुद्धिमन्तो गताः स्वर्गं तुष्टात्मनो जितेन्द्रियाः॥
आर्जवेनापरे युक्ता निहतानार्जवैर्जनैः।
ऋजवो नाकपृष्ठे वै शुद्धात्मनः प्रतिष्ठिताः॥[viii]

सन्दर्भग्रन्थसूची—

मूलग्रन्थः

- महाभारत (पञ्चम खण्ड), शान्तिपर्व (सचित्र, सरल हिन्दी-अनुवादसहित), कोड -३६, गीताप्रेस, गोरखपुर, सं – २०७५

सहायकग्रन्थसूची

- ईशादि नौ उपनिषत्. शाङ्करभाष्यसमेता. गोरखपुर : गीताप्रेस (प्रकाशक एवं मुद्रक), सं.- २०६८
- तैत्तिरीयोपनिषत् (बङ्गपुस्तकम्). शाङ्करभाष्यसमेता. सम्पादकःअनुवादकश्च - महामोहपाध्यायः दूर्गाचरणसांख्यवेदान्ततीर्थः. कलिकाता : देवसाहित्यकूटीरप्राइभेट लिमिटेड, २००८
- श्रीमद्भगवच्छङ्कराचार्यविरचितं श्रीमद्भगवद्गीताभाष्यम्. श्रीमदनुभूतिस्वरूपाचार्य- विरचितः श्रीमदानन्दगिरिस्वामिविरचितः श्रीबेल्लङ्कोण्ड-रामरायकविविरचितश्च प्रथमः द्वितीयश्च खण्डः.संशोधकः- मीमांसावेदान्ताचार्य-श्रीमणिद्राविडः-. वाराणसी श्रीदक्षिणामू र्तिमठप्रकाशनम्२०१५

तथ्यसूत्राणि

[i] तै.उ.- १.११.१
[ii] महा.भा.शा.प. २२१।१३ (पृष्ठाङ्कः- ६८४)
[iii] महा.भा.शा.प. २२१।१४ (पृष्ठाङ्कः- ६८४)
[iv] महा.भा.शा.प. २२१।१५ (पृष्ठाङ्कः- ६८४)
[v] महा.भा.शा.प. ३५३।१-३ (पृष्ठाङ्कः- ११५२)
[vi] महा.भा.शा.प. ३५३।८-९ (पृष्ठाङ्कः - ११५३)
[vii] महा.भा.शा.प. ३५४।१०-१२ (पृष्ठाङ्कः - ११५४)
[viii] महा.भा.शा.प. ३५४।१३-१५ (पृष्ठाङ्कः - ११५४)

****

28. शङ्करराचार्यकृतस्य वाक्यवृत्तिग्रन्थस्य समीक्षात्मकमध्यनम्

डॉ. सन्दीप चटर्जी

अनौपचारिकसंस्कृतशिक्षकः

केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

शङ्करराचार्यविरचितः उच्चतमः प्रकरणग्रन्थः वाक्यवृत्तिः। त्रिपञ्चाशच्छ्लोकैः समन्वितः अयं प्रकरणग्रन्थः।अद्वैतवेदान्तावगमने अस्य ग्रन्थश्य महत् प्रयोजनं विद्यते। तत्रस्थाः केचन विषयाः अत्र उपस्ताप्यन्ते -

१. मङ्गलाचरणम् - परमकृपानिधिः श्रीमच्छंकराचार्यभगवत्पादः तापत्रयार्कसन्तप्तानाम् अरिमितजननादिसंसाराध्व- श्रमपरिपीडितानाम् आत्मज्ञानशिशिरमधुरजलाकाङ्क्षिणां विदूरशारीरकमीमांसाजलाशयगमनासमर्थानां वाक्यवृत्तिसंज्ञकोपदेशप्रकरणप्रपापरिकल्पने- नान्तःशीतलतां विगतक्लेशतां संपादयन् तत्रादौ प्रकरणश्रवणे प्रवृत्तानामधिकारिणामविघ्नेन ब्रह्मप्रतिपत्तितादात्म्यसिद्धये प्रकरणपरिपाट्या अद्वितीयबोधस्मरणपूर्वकं तन्नमस्कारस्य आवश्यकर्तव्यतां द्योतयन्स्वयं नमस्कुरुते -

"सर्गस्थितिप्रलयहेतुमचिन्त्यशक्तिः

विश्वेश्वरं विदितविश्वमनन्तमूर्तिम्।

निर्मुक्तबन्धनमपारसुखाम्बुराशिं

श्रीवल्लभं विमलबोधघनं नमामि॥"[i] इति

विमलबोधघनस्य प्रणामः अत्र विधीयते। विगतो मलो यस्मादसौ विमलः। विमलश्चासौ बोधश्च विमलबोधः। स एव घनं मूर्तिःस्वरूपमिति यावत्। परमात्मनः अविद्यारहिततया तदविद्याकल्पितस्य घटादिदृश्यस्य अभावेन तदालम्बनरूपो मलो न विद्यतेऽतो विमलो निर्विषयो निर्विकल्पः अद्वितीयज्ञानमिति यावत्। विश्वेश्वरमित्युक्त्या अद्वितीयबोधस्य मनसोऽप्यविषयत्वस्य नमस्कारविषयता। अचिन्त्यशक्तिशब्देन अद्वितीयबोधस्य विश्वस्वामित्वसम्पादनम्। शक्तिशब्देनात्र माया अभिधीयते। सा च बोधात्मनो ब्रह्मणो भिन्नाभिन्नत्वादिरूपेण चिन्तितुं नार्हतीत्यचिन्त्या। अचिन्त्यत्वं मायायाः कथमिति चेदुच्यते। इयं तु स्वप्रबोधबाध्यत्वात् स्वप्नसदृशी भवति। युक्तिभिः हीनप्रकाशत्वादस्याः मायेति संज्ञा। इयमसती न भवति दृश्यमानत्वात्। न हि शशविषाणादिकमसद्दृश्यते। सती च न भवति कुतो बाध्यमानत्वात्। न हि सन्नात्मा कदाचिद् बाध्यते। आत्मनो न हि भिन्ना भवत्यधिका न सत्ताव्यतिरेकेण तस्याः मायायाः पृथक्सत्ताभावात्। न हि रज्ज्वामारोपितस्य सर्पस्य तद्भिन्नत्वं रज्ज्वाद्यभावे तददर्शनात्। न तदभिन्ना च भवति कुतो जडत्वात्। न हि जडाजडयोरेकरूपत्वं वस्तुनो द्वैरूप्यासंभवात्। तन्नोभयात्मिका विरुद्धत्वात्।

अद्वितीयबोधस्य अचिन्त्यशक्तिवशात् शरीरस्वीकरणे किं प्रयोजनमित्याकाङ्क्षायां सार्वभौमस्येव विश्वस्वामित्वेन लीलाप्रयोजनं सूचितमपि तु लक्ष्मीकान्तत्वेन क्रीडाप्रयोजनं ज्ञापयन् तस्य विष्णुरूपेण अवस्थानमाह। लोके तस्याः सकलसुन्दरीजनस्य दृष्टान्तभूतसौन्दर्यवत्याः इन्दिरायाः प्रसादादेव सुकृतिनां योगिनाम् आकाशगमनपरकायप्रवेशनबहुरूपस्वीकारादिक्रीडा संभवति। शरीरस्वीकरणे कीडेव प्रयोजनमिति श्रीवल्लभशब्देनावगम्यते। ततो विमलबोधस्य श्रीवल्लभरूपेणावस्थानादपि नमस्कारविषयत्वम् उपपद्यते।

विदितं विश्वं सर्वं येन सः तथोक्तः सर्ववित् इत्यर्थः। सर्वविदो जगन्निमित्तकारणत्वे श्रुतिः - "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपस्तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते"[ii] इति।अनुमानमपि, इदं विश्वं विशिष्टविज्ञानवत्पूर्वकं कुतो विचित्रकार्यत्वाच्चित्रादिवदिति। यथा लोके कुडचादिकार्यस्य मृदाद्युपादानात् उत्पत्तिस्तत्रैव स्थितिस्तत्रैव प्रलयश्च दृश्यते। तथा - "जन्माद्यस्य यतः"[iii] इति सूत्रे "यतो वा इमानि भूतानि जायन्ते"[iv] इति तद्विषयवाक्ये च ब्रह्मण एव सर्वभूतानामुत्पत्तिस्तत्रैव स्थितिस्तत्रैव लयश्च श्रूयते।

२. गुरुनमस्कारः - एवं सर्वैः वेदान्तैः ज्ञेयत्वेनोपास्यत्वेन च निर्दिष्टं गुरूपदिष्टं सोपाधिकं निरुपाधि च ब्रह्मरूपमभिधाय प्रतिपत्तिसिद्धये स्वगुरुनमस्कारं कुरुते -

"यस्य प्रसादादहमेव विष्णु-

र्मय्येव सर्वं परिकल्पितं च।

इत्थं विजानामि सदात्मरूपं

तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम्॥"[v] इति

आचार्यप्रसादात् अविद्यानिवृत्तौ तदविद्यापरिकल्पितदेहेन्द्रियाद्युपाध्यवच्छेदापगमात् उपाधिनिर्मुक्तघटाकाशवत्परिपूर्णतां प्रतिपद्य ज्ञात्वा स्वयमेव विष्णुतत्त्वं विज्ञातवान्। जीवो नाम कश्चित्परमार्थतो ब्रह्मव्यतिरेकेणास्त्यतो ब्रह्मैव स्वस्मिन्परिकल्पितमायया जीवरूपेण विवर्तते। इत्थं सदात्मरूपं विजानामि। न च जीवस्य ब्रह्मत्वे प्रत्यक्षविरोधः - 'अज्ञानेनामृतं ज्ञानं ..... प्रकाशयति तत्परम्"[vi] इति वचनात्।

अर्थात् यस्य गुरोः प्रसादात् अपरोक्षज्ञानं निःशेषदेहादिपरिच्छिन्नत्वाभिमाननिवर्तकज्ञानदार्ढ्यं च निरन्तरानुभवेन सिद्धं तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यमिति। स्वस्य विष्णुत्वकथनं स्वकीयग्रन्थस्यानायासेन ब्रह्मापरोक्षज्ञानजनकत्वप्रदर्शनार्थं गुरूत्कर्षार्थं च। अनेनैव अनुबन्धचतुष्टयमपि सूचितम्।

३. शिष्यलक्षणम् - "आचार्यवान्पुरुषो वेद"[vii] इत्यादिश्रुतिभ्यः आचार्यात् शिष्यस्य विद्यालाभदर्शनात् शिष्याचार्यप्रश्नोत्तररूपेणैव तत्त्वं निरूपयितुं शिष्यस्य लक्षणमाह शङ्कराचार्यः -

"तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानसः।

शमादिसाधनैर्युक्तः सद्गुरुं परिपृच्छति॥"[viii] इति

तापत्रयशब्देन आध्यात्मिकाधिभौतिकाधिदैविकस्तापः उच्यते। आत्मानं देहमधिकृत्य प्रवर्तते इत्यध्यात्मम्। अध्यात्मशब्देन श्रोत्रादिज्ञानेन्द्रियपञ्चकं वागादिकर्मेन्द्रियपञ्चकं प्राणादिवायुपञ्चकं मनआद्यन्तःकरणचतुष्टयं चोच्यते। तत्संबन्धी तापः आध्यात्मिको व्याध्यादिः कामादयश्च। भूतानि पृथिव्यादीन्यधिकृत्य भवतीत्यधिभूतमधिभूतशब्देनेन्द्रियगोचर उच्यते। प्राणिहिंसकाश्चोरव्याघ्रनक्रादयः अभिप्रेतास्तत्संबन्धी ताप उपप्लवः आधिभौतिकः। अधिदेवशब्देन-

"दिग्वातार्कप्रचेतोश्विवह्नीन्द्रोपेन्द्रमित्रकाः।

चन्द्रो विष्णुश्चतुर्वक्त्रः शंभुश्च करणाधिपाः॥" इति

इति निर्दिष्टा इन्द्रियाधिदेवता उच्यन्ते। तत्संबन्धी ताप उपप्लवः आधिदैविकोऽतिशीतोष्णवातवर्षादिः। अत्युग्रतापहेतुभूतग्रीष्ममध्यंदिनार्कवदसह्यत्वात्तापत्रयमेवार्कस्तेन संतप्तः। उद्विग्नमानसो व्याकुलितमना इहामुत्रार्थफलभोगाद्विरक्त इत्यर्थः। ननु विषयजनितसुखस्यैव सर्वैः प्रार्थ्यमानत्वात्कथं तत्त्यागो घटत इतिचेन्न कर्मसाध्यस्य कुट्यादेरिवानित्यत्वेन विषयसुखानामपि साधनपारतन्त्र्यक्षयिष्णुत्वदर्शनात् अल्पसुखापेक्षया बहुतरदुःखसंभवाच्च विषयसुखाभासेभ्यो युक्तिमतां विरक्तिरेव स्यात्। **"ब्रह्म वेद ब्रह्मैव भवति"[ix] इति, "तरति शोकमात्मवित्"[x] इति,"भिद्यते हृदयग्रन्थिः"[xi]** इत्याद्यनेकरूपश्रुत्या तदपरोक्षज्ञानाद्विधिना कल्पितस्य मिथ्याभूतस्य संसारस्य निवृत्तिसंभवात्साधनचतुष्टयसंपत्त्यनन्तरं वेदान्तवाक्यतः स्वात्मविचाराय गुरुमुपसृत्य तं परिपृच्छतीत्येतदुपपन्नमेव।

संसारिणां विषयलुब्धानां विषपार्जनरक्षणनाशेषु तापत्रयं संभवति। तेन तेन तापेन संतप्तानां तेषां मध्ये कश्चित् एतज्जन्मनि जन्मान्तरे वा काम्पनिषद्धवर्जनपुरःसरम् ईश्वरार्पणबुद्धयाअनुष्ठितनित्यनैमित्तिकप्रायश्चित्तसगुणोपासनादिकर्मभिः प्रक्षालितान्तःकरणो विषयाणां सुखाधिकतरदुःखहेतुत्वदर्शनादनित्यत्वाच्चोद्विग्नमानसः ततः शमादिसाधनेर्युक्तः स्वबन्धनिवृत्त्यर्थम् आत्मविचाराय गुरुं पृच्छतीति भावः। तापत्रयोद्वेगशमादीनां पूर्वपूर्वस्योत्तरोत्तरं प्रति हेतुहेतुमद्भावो द्रष्टव्यः। अनेन श्लोकेन अथातो ब्रह्मजिज्ञासा इति प्राथमिकाधिकरणन्यायो निरूपितः। तापत्रयार्कसंतप्तः कश्चिदुद्विग्नमानस इत्यनेन विरक्तिहेतु प्रतिपादकः अतः शब्दार्थो निर्णीतः। शमादिसाधनैर्युक्तः इत्यनेनाऽऽनन्तर्यार्थस्य अथशब्दस्यार्थो निर्णीतः। सद्गुरुं स्वरूपविचाराय परिपृच्छतीत्यनेन ब्रह्मज्ञानाय वेदान्तमहावाक्यार्थविचारकर्तव्यता दर्शिता अतः ब्रह्मजिज्ञासाशब्दार्थो निर्णीतः।

४. बन्धनिवृत्तिसाधनम् - सद्गुरुं परिपृच्छति इत्युक्तं, किं परिपृच्छति इत्याकाङ्क्षायां बन्धनिवृत्तिसाधनं परिपृच्छति इत्याह शङ्कराचार्यः -

"अनायासेन येनास्मान्मुच्येय भवबन्धनात्।

तन्मे संक्षिप्य भगवन्केवलं कृपया वद॥"[xii] इति

न विद्यते आयासो यस्मिन् तत्तथोक्तं येन मुक्तिसाधनेन। अस्मादितिपदेन भवबन्धनस्य प्रत्यक्षसिद्धं दुःखभूयस्त्वमुच्यते। भवबन्धनाद्भवः संसारः स एव बन्धनमिव बन्धनं तस्मान्मुच्येयं मुक्तः स्यां तन्मुक्तिसाधनं संक्षिप्यअविस्तीर्य इदमिदमिति वदेत्यर्थः।केवलं कृपया वदेत्यस्य गुरोः स्वरूपनिष्ठतया निरपेक्षत्वेन दृष्टप्रयोजनापेक्षाभावादुपदेशकारणं कृपैवेति मत्वा शिष्येणाऽऽचार्यकृपोत्पादकानि वचनानि वक्तव्यानीति ज्ञापयति।

"तत्त्वमस्यादिवाक्योत्थं यज्जीवपरमात्मनोः।

तादात्म्यविषयं ज्ञानं तदिदं मुक्तिसाधनम्॥"[xiii] इति

तत्त्वमस्यादिवाक्योत्थं वाक्यश्रवणजन्यं जीवब्रह्मतादात्म्यविषयम् उभयोरपि स एव आत्मा जीवस्य यः आत्मा स्वरूपं स एव परमात्मनः परमात्मनो य आत्मा स्वरूपं स एव जीवस्येति तदात्मा तस्य भावःतादात्म्यमेकत्वमित्यर्थः। तदेव विषयो यस्य ज्ञानस्य तत्तथोक्तम् तत्त्वमस्यादिवक्येन जीवब्रह्मतादात्म्ये प्रतिपादिते सति तत्प्रतिपादकवाक्यश्रवणजन्यं जीवब्रह्मतादात्म्यविषयं यज्ज्ञानमस्ति तदिदं मुक्तिसाधनमिति भावः। अनेन चत्वारः अनुबन्धाः सूचिताः।

अनुबन्धचतुष्टयम्

क. अधिकारी - तदिदमिति तस्यैव वाक्यज्ञानस्य एकत्वकरणजन्यत्वमुक्तम्। तत्त्वमस्यादिवाक्यस्यैव व्याख्यातत्वादस्य ग्रन्थस्य तयोरेकार्थत्वोपपत्तेः पूर्वमुक्तं भवबन्धनादित्यनेन बन्धनिवृत्तिकामोऽधिकारीसूचितः।

ख. विषयः - इदानीं प्रकरणस्य जीवपरमात्मतादात्म्यविषयः।

ग. सम्बन्धः - तादात्म्यप्रकरणयोः प्रतिपाद्यप्रतिपादकभावः संबन्धः।

घ. प्रयोजनम् - मुक्तिः प्रयोजनमिति।

५. जीवात्मपरमात्मनोः तादात्म्यानुपपत्तिः – आक्षेपः - जीवं परमात्मानं च न जानामि। अज्ञानतस्तयोस्तादात्म्यं कथं ज्ञायते परस्परविलक्षणयोः जीवेश्वरयोः कथमैक्यं घटते। तत्त्वमस्यादिवाक्यं वा तदज्ञातपदार्थतादात्म्यं कथं प्रतिपादयेत्। तस्मात् वदति -

"को जीवः कः परश्चात्मा तादात्म्यं वा कथं तयोः।
तत्त्वमस्यादिवाक्यं वा कथं तत्प्रतिपादयेत्॥"[xiv] इति

६. समाधानम्

"अत्र ब्रूमः समाधानं कोऽन्यो जीवस्त्वमेव हि।
यस्त्वं पृच्छसि कोऽहं मां ब्रह्मैवासि न संशयः॥"[xv] इति

अत्र त्रिषु आक्षेपेषु प्राथमिकस्य उत्तरत्वेन चैतन्यस्य जीवत्वं मत्वाह - अन्यो जीवः क इति चेत् चेतनादन्यो जीवो नास्तीत्यर्थः। ननु तथाऽपि चेतनस्य ज्ञेयस्य अभावात् अज्ञातत्वं तथैवावतिष्ठते इत्यत आह-त्वमेवेति। चेतनस्य जीवत्वाभावेऽपि स्वव्यतिरिक्तान्तःकरणादिसाक्षित्वेन स्वस्यैवानुभवसिद्धत्वात् ज्ञातत्वमस्तीति भावः। हिशब्दो हेत्वर्थे। वाच्ययोस्तादात्म्यं न संभवतीति यतस्ततः कारणात् लक्ष्ययोः तादात्म्यं सम्भवति इति कृत्वा नानुपपत्तिरित्यर्थः। तृतीयाक्षेपसमाधानेन चतुर्थाक्षेपस्यापि समाधानं जातमिति दृष्टव्यम्। चेतनो जीव इत्युक्तं चेतनस्य जीवत्वोपपत्तिमाह- यस्त्वं पृच्छसीति। अचेतनस्य पृष्टत्वानुपपत्तेर्जीवस्य चेतनत्वमुपपन्नमित्यर्थः। देहेन्द्रियादीनामपि चेतनसांनिध्याश्चेतनवदवभासमानत्वम् एव नतु चेतनत्वमपि तु तत्साक्षिणः।

"तत्वमसि"[xvi]इति,"अहं ब्रह्मास्मि"[xvii] इति,"अयमात्मा ब्रह्म"[xviii] इत्यादिश्रुतिभ्यो ब्रह्मत्वाभ्युपगमाच्चेतनत्वं सिद्धमित्येतदर्थं हृदि निधायाऽऽचार्य आह - ब्रह्मैवासीति। प्रथमप्रश्ने जीवपरयोर्लैक्षणस्प पृष्टत्वात्समाधानावसरे जीवस्यैव लक्षणमुक्तं न परस्येति न शङ्कनीयं ब्रह्मैवासीत्यनेन देहेन्द्रियादिसाक्षिणश्चेतनस्य जीवस्य ब्रह्मत्वाभिधानात्सर्वसाक्षी चेतनः परमात्मेत्युक्तमेव।

७. निःसंशयज्ञानोपायोपदेशः

"सत्यानन्दस्वरूपं धीसाक्षिणं ज्ञानविग्रहम्।
चिन्तयात्मतया नित्यं त्यक्त्वा देहादिगां धियम्॥"[xix] इति

विज्ञानरूपस्यैवाऽऽत्मनः सत्यत्वमानन्दत्वं साक्षित्वं चेत्येतत्प्रदर्शनार्थं पूर्वोक्तश्लोकोक्तान्येव पदान्यनयाऽपि रीत्या पुनरुच्यन्ते विशेषणविशेष्यरूपेणैव।

"यः साक्षिलक्षणो बोधस्त्वंपदार्थः स उच्यते।
साक्षित्वमपि बोद्धव्यमविकारितयाऽऽत्मनः॥" इति

ज्ञानस्यैव त्वंपदार्थत्वं वक्ष्यते। एवं भूतमात्मानमात्मतया चिन्तयाहमिति चिन्तयेत्यर्थः। नित्यं चिरम्।'नित्यं चिदनुसंधिनः शोको न बाध्यते'इति वशिष्ठवचनाच्चिन्तनीयमिति मावः। त्यक्त्वा देहादिगांधियमिति। देहादावात्मबुद्धिं त्यक्त्वेत्यर्थः। धीसाक्षिणमित्यत्र धीशब्देन "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिर्विधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव"[xx] इति श्रुतेः कामादि सर्वमपि गृह्यते।आत्मचिन्तनस्य देहाद्यात्मबुद्धित्यागपूर्वकत्वमुक्तं देहादावात्मबुद्धेश्चिरं निरूढत्वात्तत्त्यागो न घटते इति शिष्यस्याशयमाशङ्क्य देहादेरनात्मत्वदर्शनेन तदात्मत्वबुद्धित्यागो घटते इति मत्वा तत्त्यागाय देहादेरनात्मत्वं शिष्यस्य दर्शयति -

"रूपादिमान्यतः पिण्डस्ततो नात्मा घटादिवत्।
वियदादिमहाभूतविकारत्वाच्च कुम्भवत्॥"[xxi] इति

पिण्डो देहः अनात्मा रूपरसादिमत्त्वात्। रूपादिमत्त्वं सर्वेषां वस्तूनां प्रत्यक्षसिद्धमिति घटादिदृष्टान्तः। महाभूतविकारत्वं कुम्भस्यैव प्रत्यक्षसिद्धमिति कुम्मदृष्टान्त:।

केवलपिण्डस्यानात्मत्वदर्शनमात्रेण आत्मचिन्तनं न घटते किं त्वात्मनः स्फुटपरिज्ञानेनापि भवितव्यमिति मत्वा आत्मानं स्फुटं परिज्ञातुं तत्स्वरूपं वदेत्यचार्यमाह –

"अनात्मा यदि पिण्डोऽयमुक्तहेतुबलान्मतः।

करामलकवत्साक्षादात्मानं प्रतिपादय॥"[xxii] इति

अयमिति इदंशब्देन पिण्डस्य दृश्यत्वेनाप्यनात्मत्वमुच्यते। अयं देहः पूर्वोक्तहेतुना अनात्मेति संमतश्चेद्भवतु नाम अनात्मत्वं देहस्य नैतावता आत्मचिन्ता सिध्येत्। अतः करस्थामलकस्तु यथा प्रत्यक्षदृष्टः एवं साक्षादव्यवधानेनैवंभूतस्वरूपोऽहमित्यपरोक्षतया ज्ञातुमात्मानं प्रतिपादयेत्यर्थः।

८. मनसः अचेतनत्वम्

"अगमन्मे मनोऽन्यत्र सांप्रतं च स्थिरीकृतम्।

एवं यो वेद धीवृत्तिं सोऽहमित्यवधारय॥"[xxiii]इति

एतावन्तं कालं मे मनोऽन्यत्र गङ्गादौ गतं तत्स्मरणं त्यक्तम्। इदानीं स्थिरीकृतम्। संनिहितवस्तु विषयीकरोतीति गमनागमनादिधर्मिणो मनसो दृष्टत्वस्यानुभवसिद्धत्वान्मनसोऽचेतनत्वं सिद्धमित्यर्थः।

९. जगन्निमित्तकारणम् - तत्र उपादानात्सर्वज्ञस्य विचित्रकार्यजगन्निमित्तकारणत्वानुपपत्तेः सर्वज्ञत्वादिलक्षणकथनेन तस्यैव जगन्निमित्तकारणत्वमर्थाज्ज्ञापयति -

"सर्वज्ञत्वं परेशत्वं तथा संपूर्णशक्तिता ।

वेदैः समर्थ्यते यस्य तद्ब्रह्मेत्यवधारय॥"[xxiv] इति

"यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते"[xxv] इत्यादिभिः **"पराऽस्य शक्तिर्विविधव श्रूयते"[xxvi]** इत्यादिभिर्वेदैश्च यस्य सर्वज्ञत्वं परेशत्वं पूर्णशक्तित्वं च समर्थ्यते तद्ब्रह्मेत्यवधारयेत्।

ब्रह्मणो निमित्तकारणत्वम् उपादानकारणत्वं किमित्यपेक्षायां सर्वकार्यानुगतस्यैवोपादानत्वमिति दर्शयितुमात्मविज्ञानात्सर्वविज्ञानप्रतिपादनेन आत्मनः सर्वकार्यानुगममर्थादाह -

"यज्ज्ञानात्सर्वविज्ञानं श्रुतिषु प्रतिपादितम्।

मृदाद्यनेकदृष्टान्तैस्तद्ब्रह्मेत्यवधारय॥"[xxvii] इति

"उत तमादेशमप्राक्ष्यों येनाश्रुतं श्रुतं मवस्यमतं मतमि ज्ञातं विज्ञातमिति"[xxviii] इत्येकविज्ञानेन सर्वविज्ञाने प्रतिज्ञाते **"कथं नु भगवः स आदेशो भवति"[xxix]** इत्याक्षेपमवतार्य **"यथा सोम्येकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"[xxx] इति"मैत्रेय्यात्मनि खल्वरे द्वष्टे श्रुते मते विज्ञाते इदं सर्वं विदितम्"[xxxi]** इत्यादिश्रुतौ। यद्विज्ञानात्सर्वविज्ञानं मृदाद्यनेकदृष्टान्तैः प्रतिपादितं तद्ब्रह्मेत्यवधारयेत्यन्वयः। श्रुत्युक्तमात्मज्ञानात्सर्वविज्ञानमात्मनःसर्वानुस्यूतत्वभावेन संभवति। अतः सर्वविज्ञानान्यथानुपपत्त्याऽऽत्मनः सर्वानुस्यूतत्वं सिद्धम्। तच्चानुस्यूतत्वमुपादानत्वमन्तरेण न संभवतीत्युपादानत्वं ब्रह्मणआक्षिपतीति। तथा सत्येवं प्रयोगो विमतं कार्यं स्वानुगतोपादानजन्यं भवितुमर्हति। कुतः कार्य-त्वाद्घटवदित्यनुमानेन प्रपञ्चस्य ब्रह्मोपादानत्वमुक्तं भवति। **"यतो वा इमानि भूतानि जायन्ते"[xxxii]** इत्यादिश्रुतिरपि प्रपञ्चस्य ब्रह्मोपादानत्वे प्रमाणम्।

इदानीं प्रपञ्चाधिष्ठानब्रह्मविचारासमर्थान्मुमुक्षूनुद्दिश्य प्रपञ्चोपादानस्य ब्रह्मणो विचार्यत्वं श्रुतिमूलं दर्शयति -

"विजिज्ञास्यतया यत्र वेदान्तेषु मुमुक्षुभिः।

समर्थ्यतेऽतियत्नेन तद्ब्रह्मेत्यवधारय॥"[xxxiii] इति

"यतो वा इमानि भूतानि जायन्ते"[xxxiv] इत्यादिवेदान्तवाक्येषु मुमुक्षुभिरतियत्नेन विचार्यत्वेन समर्थ्यते ब्रह्म विचारयितव्यमिति तद्ब्रह्मेत्यवधारयेत्यन्वयः। अथ जगत्कारणं ब्रह्म तद्विचारयितव्यमिति तटस्थलक्षणकथनार्थत्वेनापि कार्यकारणत्वोक्तेः प्रयोजनमुक्तमिति द्रष्टव्यम्।

१०. मुक्तिः - इदानीं निरस्ताशेषसंसारनिदानत्वे सति किं स्यात् इत्याकाङ्क्षायां तस्य विदेहमुक्तिरित्युच्यते। विदेहमुक्तिस्वरूपं तावत् उच्यते आचार्यैः वाक्यवृत्तौ -

"विशीर्णकार्यकरणो भूतसूक्ष्मैरनावृतः।

विमुक्तकर्मनिगलः सद्य एव विमुच्यते॥"[xxxv] इति

विशीर्णकार्यकरणः कार्यं शरीरं करणानीन्द्रियाणि विशीर्णानि शिथिलीमूतानि कार्यकरणानि यस्य स तथोक्तः। ननु देहेन्द्रियादौ विद्यमाने तस्य विशीर्णत्वं कथमितिचेत्तस्यापरिच्छिन्नब्रह्माकारमभावनया देहेन्द्रियादिपरिच्छिन्नत्वाभावान्मुक्तदृष्ट्या विशीर्णत्वमत एवं भूतसूक्ष्मैरनावृतः शब्दादिभिरनावृत्त इन्द्रियाविशीर्णत्वाद्विषयसंनिधावप्यविकृतचित्त इत्यर्थः। अत एव विमुक्तकर्मनिगड इति विशेषणम्।संचितप्रारब्यागामिरूपं निगढं यस्य स तथोक्तः। अतः

सद्य एव विमुच्यते तदेव निरस्ताशेषसंसारनिदानत्वसमय एव विदेहमुक्तो भवतीत्यर्थः। कथं देहे स्थिते विदेहमुक्तिः स्यादिति न शङ्कनीयं लोकदृष्ट्या देहे सत्यपि निरस्ताशेषाज्ञानस्याज्ञानपरिकल्पितदेहाभावाद्विमुक्तिरेव भवति। अत्र श्रुतिः - "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः"[xxxvi] इति। नन्वेवं सति प्रवर्तकाभावाच्छरीरं कथं प्रवर्तत इति चेद्यत्र क्वापि चिन्तायुक्तस्य हस्तादिकं स्वतो यथा स्वकार्ये प्रवर्तते तथा वासनाधीनं चक्षुरादीन्द्रियंस्वतः प्रवर्तते एवं पथिगततृणादौ चक्षुरादिर्न रागतः पतति। मुक्तदेहश्चापि पूर्ववद्भोजनादौ प्रवर्तते। यथाऽध्वगेन पथा प्राप्तगिरिनदीविपिनादिकं विलोक्यते तद्वन्मुक्तदेहेनापि भोजनादिकमनुभूयतेऽतः पूर्वसंस्कारवशात्कुलालचक्रन्यायेन ऋषभजडभरतादिदेहवत्पुरावत्प्रवर्तते एवेति वेदितव्यम्। तस्य लोकदृष्ट्यैव शरीरपतनं तत्समये श्रुतिः - **"तद्यथाऽहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव"**[xxxvii]इति। एवं ब्रह्मापरोक्षज्ञानदार्ढ्यान्निरस्ताशेषाज्ञानस्य पुरुषस्य वासनालेशेन सहाज्ञानतत्कार्यसर्वकर्मक्षये विदेहमुक्तिरुक्ता। एवंभूतस्यापि लोकदृष्ट्या देहावस्थानमात्रेण जीवन्मुक्तत्वाङ्गीकारे ब्रह्मादीनामप्यन्यदृष्ट्या देहसंभवाज्जीवन्मुक्तत्वमेव स्यात्। तच्चानिष्टं तेषामप्यपरिच्छिन्नब्रह्मस्वरूपत्वेन प्रसिद्धत्वात्।एवं विदेहमुक्तिनिष्ठामुक्त्वेदानीं ब्रह्मापरोक्षज्ञानमात्रात्पुरुषस्य निरस्ताशेषाज्ञानत्वासंभवात् संचितकर्मण एवं क्षये जीवन्मुक्तिमाह -

"प्रारब्धकर्मवेगेण जीवन्मुक्तो यदा भवेत्।

किञ्चित्कालमनारब्धकर्मबन्धस्य संक्षये॥"[xxxviii] इति

पुरुषो यदाऽनारब्धकर्मबन्धस्य संक्षये जीवन्मुक्तो भवेत्तदाप्रभृति प्रारब्धकर्मवेगेण सह प्रारब्धकर्मफलहेतु-भोगहेतुभूतरोगादिसंसारवासनालेशेन सह कंचित्कालमवतिष्ठत इत्यन्वयः। एतदुक्तं भवति ब्रह्मापरोक्षज्ञानादनारब्धकर्मबन्धस्य संचितकर्मणः क्षये सति जीवन्मुक्तस्य पुनः शमादिसाधनानुष्ठानेन सह वेदान्तश्रवणमननिदिध्यासनाभ्यासस्य पौनःपुन्येन कृतत्वाद्बोधदार्ढ्ये सति निरस्ताशेषाज्ञानत्वात् प्रारब्धकर्मवासनालेशानुवृत्तेरपि क्षये देहाद्यभिमानाभावात्स तु विदेहमुक्तो भवति। यस्य त्वज्ञानमात्रमेव स्यात्तस्यापरोक्षज्ञानमात्रादनारब्धस्य संक्षये सति बोधदार्ढ्यहेतुभूतश्रवणाद्यभ्यासाकरणाद्बोधदार्ढ्याभावे प्रारब्धकर्मवासनालेशानुवृत्त्या सह कंचित्कालं स तु जीवन्मुक्तरूपेणावतिष्ठते। तस्यापि कालान्तरे शमाद्यनुष्ठानेन सह श्रवणाद्यभ्यासकारणज्ञानदार्ढ्यं संभवति चेत्प्रारब्धकर्मवासनानिवृत्तिद्वारा देहाद्यभिमानाभावाद्विदेहमुक्तिः संभवति। यदि ज्ञानदार्ढ्यं न स्यात्तर्हि प्रारब्धकर्मवासनाभ्यास-निवृत्त्यभावाद्देहपातपर्यन्तं जीवन्मुक्तरूपेणावतिष्ठते प्रारब्धं नामेदानीं प्रतीयमान देहोत्पत्तिनाशादिहेतुभूतं कर्म। अनारब्धं नाम विष्वग्देहान्तरोत्पादकं संचितं कर्म। ज्ञानोत्पत्यनन्तरं देहावसानसमये कर्तृत्वभोक्तृत्वाद्यभिमानमन्तरेण क्रियमाणमागामि कर्म। तत्रप्रारब्धं त्रिविधम् ऐच्छिकम् अनैच्छिकं परेच्छिकं चेति। तत्रानैच्छिकपरैच्छिकयोः स्वकीयप्रयत्नो नास्ति। ऐच्छिके स्वप्रयत्नं कृत्वा स्वाभीष्टाननुभुङ्क्ते।

ग्रन्थसूची

- शङ्कराचार्यः। 1915। वाक्यवृत्तिः (विश्वेश्वरविरचितटीकासमेता, आनन्दाश्रमसंस्कृतग्रन्थावलिः ग्रन्थाङ्कः 80)। हरि नारायण आपटे (प्रकाशकः)। आनन्दाश्रममुद्रणालयः।
- आचार्यः, बादरायणः। 2018। ब्रह्मसूत्रशाङ्करभाष्यम्। श्रीगोविन्दानन्दः (भाष्यरत्नप्रभाटीका), श्रीवाचस्पतिमिश्रः(भामतीटीका), आनन्दगिरिः (न्यायनिर्णयः)। आचार्यजगदीशशास्त्री (सम्पादकः)। कोलकाता: मोतीलाल बनारसीदासः। ISBN:- 978-81-208-0526-2॥
- ईशादि नौ उपनिषत्. शाङ्करभाष्यसमेता. गोरखपुर : गीताप्रेस (प्रकाशक एवं मुद्रक), सं.- २०६८।
- उपनिषद्भाष्यम्. प्रथमखण्डः, श्रीमदानन्दगिर्याचार्यकृतटीकया कठतैत्तिरीयभाष्याणां माण्डूक्यप्रसि-द्धाचार्यान्तरटीकाभिः सटीकतैत्तिरीयवार्तिकेन च समलङ्कृतम्. सम्पादकः- संएस. सुब्रह्मण्यशास्त्री .. वाराणसी श्रीदक्षिणामूर्तिमठ-प्रकाशन-, २०००।
- छान्दोग्योपनिषत् (बङ्गपुस्तकम्). शाङ्करभाष्यसमेता. सम्पादकःअनुवादकश्च- महामोहपाध्यायः दूर्गाचरणसांख्यवेदान्ततीर्थः. कलिकाता : देवसाहित्यकूटीरप्राइभेट लिमिटेड, २००२।
- तैत्तिरीयोपनिषत् (बङ्गपुस्तकम्). शाङ्करभाष्यसमेता. सम्पादकःअनुवादकश्च - महामोहपाध्यायः दूर्गाचरणसांख्यवेदान्ततीर्थः. कलिकाता : देवसाहित्यकूटीरप्राइभेट लिमिटेड, २००८।
- मुण्डकोपनिषद्. सम्पादकः- ब्रह्मचारिमेधाचैतन्यः. दण्डिस्वामीदामोदर-आश्रमः-, २००८।
- श्रीमद्भगवद्गीता (बङ्गपुस्तकम्). अनुवादकः व्याख्याकारश्च- स्वामी भूतेशानन्दः. कलिकाता : उद्बोधन-कार्यालयः. २००९।
- श्वेताश्वतरोपनिषद् व्याख्याकारः अनुवादकश्च-स्वामी विश्वरूपानन्दसरस्वती. मुम्बई सत्साहित्यप्रकाशन-ट्रस्ट-२००८ (द्वितीयसंस्करणम्, जानुयारिमासः)

तथ्यसूत्राणि

[i]वाक्यवृत्तिः १
[ii]मुण्डकोपनित् १/१/९
[iii]ब्रह्मसूत्रम् १/१/२
[iv]तैत्तिरीयोपनिषत् ३/१/१
[v]वाक्यवृत्तिः २
[vi]गीता ५/१५-१६
[vii]छान्दोग्योपनिषत् ६/१४/२
[viii]वाक्यवृत्तिः ३
[ix]मुण्डकोपनिषत् ३/२/९
[x]छान्दोग्योपनिषत् ७/१/३
[xi]मुण्डकोपनिषत् २/२/८
[xii]वाक्यवृत्तिः ४
[xiii]वाक्यवृत्तिः६
[xiv]वाक्यवृत्तिः ७
[xv]वाक्यवृत्तिः ४८
[xvi]छान्दोग्योपनिषत्६/८/७
[xvii]बृहदारण्यकोपनिषत्१/४/१०
[xviii]माण्डूक्योपनिषत्११
[xix]वाक्यवृत्तिः १२
[xx]बृहदारण्यकोपनिषत् १/५/३
[xxi]वाक्यवृत्तिः १३
[xxii]वाक्यवृत्तिः१४
[xxiii]वाक्यवृत्तिः२१
[xxiv]वाक्यवृत्तिः ३१
[xxv]मुण्डकोपनिषत् १/१/९
[xxvi]श्वेताश्वतरोपनिषत् ६/८
[xxvii]वाक्यवृत्तिः३२
[xxviii]छान्दोग्योपनिषत् ६/१/३
[xxix]छान्दोग्योपनिषत् ६/१/३
[xxx]छान्दोग्योपनिषत् ६/१/४
[xxxi]बृहदारण्यकोपनिषत् ४/५/६
[xxxii]तैत्तिरीयोपनिषत् ३/१/१
[xxxiii]वाक्यवृत्तिः ३४
[xxxiv]तैत्तिरीयोपनिषत् ३/१/१
[xxxv]वाक्यवृत्तिः ५१
[xxxvi]छान्दोग्योपनिषत् ८/१२/१
[xxxvii]बृहदारण्यकोपनिषत् ४/४/७
[xxxviii]वाक्यवृत्तिः ५२

****

29. श्रीपतिभटविरचितज्योतिषरत्नमालाया: समीक्षणम्

आनन्दप्रकाशपाठक:
सहायकाचार्य: (अतिथि:)
ज्योतिषशास्त्रविद्याशाखा
लखनऊपरिसर:, के.सं.वि.वि.

अखिलब्रह्माण्डनायकस्य निःश्वासभूत एवं समस्तज्ञानविज्ञानराशे: आकरोऽस्ति वेद:। एवं भूतस्य वेदस्य शिक्षा-व्याकरण-ज्योतिष-निरुक्त-कल्प-छन्दांसीति षडङ्गानि वर्तन्ते। ननु ज्योतिषशास्त्रस्य वेदाङ्गत्वं कथमित्याह भास्करेण स्वीये सिद्धान्तशिरोमणौ-

वेदास्तावद्यज्ञकर्मप्रवृता यज्ञा: प्रोक्तास्ते तु कालाश्रयेण।

शास्त्रादस्मात् कालबोधो यत: स्याद्वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात्।।[1]

वेदस्य षडङ्गेषु नेत्रस्थानीयमिदं ज्योतिषशास्त्रम्। शास्त्रोऽयं पूर्वजन्मकृतं शुभाशुभं सर्वं कर्मं द्योतयति। तद्यथा-

यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मण: पङ्क्तिम्।

व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।[2]

वैदिककालात् प्रवर्धितमिदं शास्त्रं सिद्धान्त-संहिता-होरास्कन्धत्रयेषु विभक्तमस्ति। यस्मिन् स्कन्धे त्रुट्यादित: प्रलयान्तकालकलनादिमानप्रभेदा:, पलभातुरीयप्रभृतीनां यन्त्राणां विवेचनं, चन्द्रार्कग्रहणे उदयास्तमयौ, शृङ्गोन्नतीत्यादय: विषया: वर्णिता: सन्ति, तादृश: स्कन्ध: सिद्धान्तस्कन्ध: उच्यते। यथोपदिष्टं भास्कराचार्येण-

त्रुट्यादिप्रलयान्तकालकलना मानप्रभेद: क्रमात्

चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तरा: ।

भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते

सिद्धान्त: स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधै: ।।[3]

ज्योतिषशास्त्रस्यापराङ्गत्वेनाभिधीयते होरास्कन्ध:। अहश्च रात्रिश्चाहोरात्रशब्दे पूर्वो वर्णो अकारो अपरवर्णश्च त्रकारस्तयोः लोपात् होराशब्दः सिद्ध्यति। पूर्वजन्मनि कृत शुभाशुभकर्मण: फलादेश: होरास्कन्धेन क्रियते। तद्यथा बृहज्जातके-

होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्।

कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति।।[4]

स्कन्धेऽस्मिन् राशि-होरा-द्रेष्काणादि-बलाबलनिर्धारणं, जातकस्य जन्मकालिकग्रहस्थित्यनुसारं शुभाशुभफलनिर्धारणं, जन्मकुण्डल्यनुसारं राजयोगारिष्टयोगादीनां विवेचनं, ग्रहाणां दिक्-कालचेष्टादिभि: बलनिर्धारणमित्यादीनां विषयाणां प्रतिपादनं कृतमस्ति। यथोपदिष्टं नारदपुराणे-

जातके राशिभेदाश्च ग्रहयोनिश्च योनिजम्।

निषेकजन्मारिष्टानि ह्यायुर्दायो दशाक्रम: ।।[5]

सम्यक् हितं प्रतिपाद्यं यत्र अर्थात् जातकस्य कृत्स्नं शुभाशुभफलं यस्मिन् स्कन्धे वर्णित: तस्य नाम संहितास्कन्ध:। अत्र ग्रहाणां स्वभावा:, विभिन्नोत्पातविषया:, वृष्टियोगा:, मुहूर्तविषयादयोऽनेके विषया: प्रतिपादिता: सन्ति। यथोक्तं महर्षिनारदेन-

संहिताशास्त्ररूपं च ग्रहचारोऽब्दलक्षणम्।

तिथिवासरनक्षत्रयोगतिथ्यर्धसंज्ञका:।।

[1] सि.शि.मध्य.काल./श्लो.९
[2] लघुजातक.राशिप्रभेद./श्लो.३
[3] सि.शि.मध्य.काल.श्लो.६
[4] बृहज्जातक.राशिप्रभेदाध्याय.श्लो.३
[5] ना.पु.२/५४/३

आधानपुंससीमन्तजातनामान्नभुक्तय: ।

चौलं कर्णच्छिदा मौञ्जी क्षुरिकाबन्धनं तथा।।

समावर्तनवैवाहप्रतिष्ठासद्मलक्षणम्।

यात्रा प्रवेशनं सद्यो वृष्टि: कर्मविलक्षणम्।।[6]

संहिताग्रन्थेषु राष्ट्रविषयकशुभाशुभात्वविधि: वर्णित: भवति न तु व्यक्तिविषयक:। प्राचीन काले ज्योतिषस्य समेषां स्कन्धानां युक्तग्रन्थ: संहिता इति संज्ञका भवति स्म। किञ्चित् कालानन्तरं वराहमिहिराचार्यस्य कालखण्डे गणित-होराभ्याम् अतिरिच्य ज्योतिषसम्बन्धित-विषयाणां संज्ञा संहिता जाता। तत्र सूर्य-चन्द्रादिग्रहाणां चारसम्बन्धितविषया:, चारवशात् शुभाशुभत्वविवेचनमिति बहव: विषया: वर्णिता: सन्ति।

मुहूर्तग्रन्थेषु ज्योतिषरत्नमाला इति ग्रन्थ: कश्चन विशेषोऽस्ति। **"सर्वस्यैव हि शास्त्रस्य कर्मणो वाऽपि कस्यचित्। यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते।।"** इति वचनानुसारमस्य ग्रन्थस्यापि किमपि विशिष्टं प्रयोजनमस्त्येव। ग्रन्थोऽयं मुहूर्तविषयकोऽस्ति। श्रीश्रीपतिभटविरचितोऽयं ग्रन्थ: विद्वज्जनेष्वति प्रसिद्धोऽस्ति। अस्य ग्रन्थस्य श्लोका: अनुष्टुप्-मालिनी-स्रग्धरा-मन्दाक्रान्ता-आर्या-शार्दूलविक्रीडित-वसन्ततिलका-इन्द्रवज्रा-उपेन्द्रवज्रोपजातीत्यादिषु वृतिषु निर्मलभाषया निर्मिता: सन्ति। तद्यथा श्रीपतिना ग्रन्थोपसंहारे-

अतिललितसुवृत्तां निर्मलां रत्नमालामुदहरदधिकार्यां सद्गुणां रत्नकोशात्।

निजगुरुपदभक्त: श्रीपति: सासुदीर्घं चतुरगणककण्ठे राजतामुज्ज्वलश्री: ।।[7]

यद्यपि ग्रन्थकारेण स्वजीवनवृतस्य विषये कुत्रापि नोक्तं, तथापि अस्य ज्योतिषरत्नमालाया: महादेवकृत-टीकायां(११८५ तमे शकाब्दे) प्रथमे प्रकरणे तस्य परिचय: संक्षिप्तरूपेण प्राप्यते। तद्यथा-

"कश्यपवंशपुण्डरीकखण्डमार्तण्ड: केशवस्य पौत्र: नागदेवसूनु: श्रीपति: संहितार्थमभिधातुमिच्छुराह।" इति।

अनेन ज्ञायते यत् श्रीपति: कश्यपवंशीय: ब्राह्मणकुलोत्पन्न: आसीत्। तस्य पितु: नाम नागदेवाचार्य: तथा पितामह: केशवाचार्य: आसीत्। श्रीपति: न केवलं संहिताशास्त्रस्य अपितु सिद्धान्त-जातकयोरपि मर्मज्ञविद्वान् आसीत्। तेन सिद्धान्तस्कन्धे **'सिद्धान्तशेखर:''धीकोटीदकरणञ्च'** इति सिद्धान्तपक्षीया: ग्रन्था:, जातके **'जातकपद्धति:', 'रमलपद्धति:'** तथा संहितायां **'ज्योतिषरत्नमाला'** इत्यादयो: ग्रन्था: रचिता:। आचार्यमहादेवेन स्पष्टीकृतं वर्तते यत् श्रीपतिना नानाविधग्रन्थानामवलोकनं कृत्वैव एते ग्रन्था: रचिताः। तद्यथा ज्योतिषरत्नमालाया: महादेवकृतटीकायाम्-

"गर्गवशिष्ठपाराशरादिसंहितां विलोक्य न केवलं गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च वाराहीसंहितारत्नकोशं च दृष्ट्वा। ननु यदि गर्गादिमुनिप्रणीतशास्त्रमवलोकितं तत् कथं? सत्यम्। मुनीनां बाहुल्यात्। बहुमत्पाद्यत्किल वराहमिहिरादिभि: बहुमतान्यवलोक्य स्वधिया क्रमोपनिबद्धा: तमपि विलोक्य।"इति।। विषयेऽस्मिन् श्रीपतिनापि उक्तम्-

विलोक्य गर्गादिमुनिप्रणीतं वराहलल्लादिकृतं च शास्त्रम्।

दैवज्ञकण्ठाभरणार्थमेषा विरच्यते ज्योतिषरत्नमाला।।[8]

एवं भूतस्य ज्योतिषशास्त्रमर्मज्ञस्य गणना वराहभास्करब्रह्मगुप्तप्रभृतीनामाचार्याणां श्रेण्यां भवति। बृहद्दैवज्ञरञ्जनकार: स्वीये ग्रन्थस्यारम्भे एतेषामाचार्याणां स्मरणं करोति। तद्यथा-

वराहमिहिराचार्य: श्रीपति: सत्यभास्करौ।

लल्लसुरीब्रह्मगुप्तौ वैद्यनाथश्च रेणुक: ।।

येषां शास्त्राणि संवीक्ष्य सारमादाय यत्नत:।

तदुक्तवचनै: कुर्वे फलग्रन्थमनोरमम्।।[9]

ज्योतिषरत्नमाला इति ग्रन्थ: श्रीपतिना विरचित: संहिताग्रन्थेषु सर्वोत्कृष्टरूपेण रराजते। **"अतिललितसुवृतां निर्मलां रत्नमालामुदहरदधि कार्यां सद्गुणां रत्नकोशात्"** इति पङ्क्त्या लल्लाचार्यकृत **'रत्नकोश:'** इति ग्रन्थस्य महान् प्रभाव: ग्रन्थेऽस्मिन् वर्तते इति ज्ञायते। ग्रन्थोऽयं संवत्सर-तिथि-वार-नक्षत्र-योग-करण-मुहूर्त-उपग्रह-संक्रान्ति-गोचर-चन्द्रताराबल-लग्न-सीमन्तादिपरिग्रह-राज्याभिषेक-यात्रा-विवाह-गृहारम्भ-गृहप्रवेश-वस्त्राधारण-सुरप्रतिष्ठेति विंशतिप्रकरणेषु विभक्तोऽस्ति। तद्यथा श्रीपतिना ग्रन्थोपसंहारे-

[6] ना.पु.५४/८,१०,११
[7] ज्योतिषरत्नमाला.२०/१२
[8] ज्योतिषरत्नमाला.१/२
[9] बृहद्दैवज्ञरञ्जन.१/६-७

संवत्सरादितिथिवारगुणास्ततश्च योगाभिधप्रकरणं करणप्रसंशा।

भानां फलानि तदनुक्षणजा गुणाश्च पश्चादुपग्रहफलं रविसङ्क्रमोऽथ ।।

स्याद्गोचरः शशिबलं च विलग्नचिन्ता संस्कारचाग्निरभिषेचनमेव कर्म।

यात्राविवाहविधिरालयसन्निवेशो वेश्मप्रवेशनववस्त्रसुरप्रतिष्ठाः ।।[10]

अत्र प्रथमं प्रकरणं संवत्सरनामकं वर्तते। प्रकरणेऽस्मिन् "**प्रभवविरतिमध्यज्ञानवध्यानितान्त**"मिति मङ्गलाचरणे कालस्य वन्दना कृता वर्तते। वस्तुतस्तु नमस्कारात्मक-आशीर्वादात्मक-वस्तुनिर्देशात्मकेषु त्रिविधेषु मङ्गलेषु ग्रन्थेऽस्मिन् नमस्कारात्मकं मङ्गलाचरणं मालिनिवृत्ते सुविनिर्मितमस्ति। अस्मिन् वृत्ते आचार्यः कालरूपमीशं प्रणमति। किम्भूतं कालमीशम्? यः विश्वस्य प्रभव(उत्पत्ति)-मध्य(स्थिति)-विरति(विनाश) कारकः वर्तते। अर्थात् यः जगतः उत्पत्ति-स्थिति-संहाररूपः वर्तते तं कालम् अहं वन्दे। पुनः किम्भूतं कालमीशम्? यत् तत्त्वमवगन्तुं विदितपरमतत्त्वा योगिनोऽपि नितान्तं ज्ञानवन्ध्या अर्थात् ज्ञानहीनाः सन्ति, तं कालमीशं परमेश्वरं वन्दे। पुनः किम्भूतं कालमीशं वन्दे? यः भग्रहैः अर्थात् नक्षत्रग्रहैः अनुमितम् अनुमेयं वर्तते। अपि च यः विश्वजन्मात्ययानां निमित्तरूपं वर्तते। अत्र विश्वजन्मात्ययानामिति पदेन जगतः जन्म-मरणयोः भावः(अर्थः) अवगन्तव्यः। तमुपर्युक्तं गुणविशिष्टं कालमीशमहं (श्रीपतिभटदैवज्ञः) इह ग्रन्थारम्भप्रसङ्गे निर्विघ्नपरिसमाप्त्यर्थम् अभिवन्दे ।

अस्मिन् मङ्गलाचरणे कालस्य द्वैविध्यं प्रदर्शितं वर्तते। अत्र **विश्वजन्मात्ययानामिति** पदेन लोकानामन्तकृतकालस्य तथा **भग्रहैः अनुमितमिति** पदेन कलनात्मकस्य कालस्यावबोधः जायते। भग्रहैः कथमनुमितमिति चेत् "अदृश्यरूपाः कालस्य मूर्तयो भगणाः स्मृताः"[11] इति। अर्थात् सृष्ट्यारम्भादेव ग्रहगतिवशात् वर्ष-युग-कल्पादिव्यवस्था जाता। पुनः तेषां ग्रहनक्षत्राणां संहारे तमोमयस्य कल्पप्रमाणस्य ब्रह्मणः अहः (दिनम्) संपूर्णतां याति। "इत्थं युगसहस्रेण भूतसंहारकारकः कल्प"[12] इति। अनेन प्रकारेण भग्रहैरेव कालस्यानुमानं जायते।

"प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" इति धिया आचार्यः द्वितीये श्लोके स्वस्य ग्रन्थस्य प्रयोजनं प्रतिपादयति। अत्र ग्रन्थकारो वक्तिः यत् मया (आचार्येण) एषा ज्योतिषरत्नमाला दैवज्ञकण्ठाभरणार्थं विरच्यते। किं कृत्वा? गर्गादिमुनिप्रणीतान् ग्रन्थान् समवलोक्य। अर्थात् गर्ग-वराह-लल्लादि-दैवज्ञरचितानि शास्त्राणि अधीत्य दैवज्ञकण्ठाभरणार्थमेषा ज्योतिषरत्नमाला विरच्यते।

अत्र उपमाऽलङ्कारस्य प्रयोगः कृतो विद्यते। यथा कस्यामपि मालायां विविधप्रकारकाणि पुष्पाणि रत्नानि वा भवन्ति। तथैव अयं ग्रन्थः नानाप्रकारकैः मधुरवृत्तैस्तथा ज्योतिषशास्त्रस्य विविधविषयैश्च सुसज्जितः वर्तते। अतः अनया ग्रन्थरूप-मालया दैवज्ञानां ग्रीवालङ्करणं भवेत् इति कृत्वा अस्य ग्रन्थस्य रचना कृता विद्यते। अयं श्लोकः उपजातिच्छन्दसि निर्मितोऽस्ति।

तदनन्तरं संवत्सरानयनप्रकारः, प्रभवादिसंवत्सरनामानि, ऋतुविचारः, मासज्ञानमित्यादिविषयाः द्वाविंशतिश्लोकेषु वर्णिताः सन्ति। द्वितीयप्रकरणे तिथिपतयः, नन्दादितिथिसंज्ञाः, शुभाशुभतिथीनां विचारः तथा तिथिसम्बन्धिविचाराः वर्णिताः सन्ति। तृतीयप्रकरणं वारनाम्ना वर्तते। प्रकरणेऽस्मिन् वारकृत्यं, वारप्रवृत्तिः, वारे विद्यारम्भमुहूर्तप्रभृतयो विषयाः चतुर्विंशतिश्लोकेषु प्रतिपादितास्सन्ति। चतुर्थप्रकरणे नक्षत्रविषये चर्चा कृताऽस्ति। तत्र नक्षत्रदेवानां विचारः, नक्षत्रैः देवमनुष्य-राक्षसगणानां विचारः, नक्षत्रमाधारीकृत्य विद्यारम्भमुहूर्तस्तथा तत्सम्बन्धिनः अन्येऽपि विषयास्सन्ति। पञ्चमप्रकरणं योगमाधारीकृत्य रचितमस्ति। षष्ठप्रकरणे स्थिरचरकरणानां नामानि, करणानां देवताः, विष्टिस्वरूपमित्यादिविषयाः सन्ति। सप्तमप्रकरणे विविधमुहूर्तानां विचाराः कृतास्सन्ति।

अष्टमप्रकरणे नन्दाद्यष्टाविंशतियोगानां नामानि, अमृतसिद्धियोगाः, संवर्तयोगाः तथा अन्येऽपि तत् सम्बन्धिविषयाः वर्णितास्सन्ति। नवमप्रकरणे सङ्क्रान्तिविचारो वर्तते। दशमप्रकरणे ग्रहाणां शुभाशुभभावानां विचारः, ग्रहाणां समिधाविचारः, ग्रहकृतारिष्टनिवारणोपायः तथा तत्सम्बन्धिनः अन्येऽपि विषयाः ऊनविंशतिश्लोकेषु वर्णिताः वर्तन्ते। एकादशे ताराबलं तथा द्वादशे लग्नमधिकृत्य प्रकरणं रचितमस्ति। त्रयोदशप्रकरणे सीमन्तोन्नयनमुहूर्तः, जातकर्ममुहूर्तः, कर्णवेधमुहूर्तः, अन्नप्राशनादीनां मुहूर्तानां विचाराः कृतास्सन्ति। चतुर्दशप्रकरणं राज्याभिषेकविषयकमस्ति। पञ्चदशप्रकरणे यात्राविषयः एकसप्ततिषु श्लोकेषु वर्णितोऽस्ति। षोडशप्रकरणे विवाहफलं, विवाहे त्याज्यमासाः, गुरुशुक्रोदयास्तविचारः, क्रूरग्रहोद्भवयोगाः, षडष्टकविचारः, ग्रहाणां भावफलमित्यादयो विषयाः वर्णितास्सन्ति। सप्तदशप्रकरणे गृहारम्भविचारः, अष्टादशे गृहप्रवेशविचारस्तथा एकोनविंशे वस्त्रधारणविचारः कृतोऽस्ति। विंशतिप्रकरणं सुरप्रतिष्ठानामकमस्ति। प्रकरणेऽस्मिन् देवप्रतिष्ठाविचारः, नक्षत्रशुद्धिविचारः एवमन्येऽपि तत्सम्बन्धिविषयास्सन्ति।

****

[10] ज्योतिषरत्नमाला.२०/१०-११
[11] सू.सि. स्पष्टाधिकारः श्लोसं.- १
[12] सू.सि. मध्य. श्लोसं.- २०

1. वर्तमान भारतीय शिक्षा पद्धति में नई शिक्षा नीति की प्रासंगिकताः आत्मनिर्भर भारत के संदर्भ में

डॉ0 नीशू कुमार
असिस्टेंट प्रोफेसर
राजनीति विज्ञान विभाग
चमन लाल पीजी महाविद्यालय लंढौरा उत्तराखंड।

सारांश

मानवीय समाज के विकसित होने की प्रक्रिया सतत रूप से पाषाण कालीन परिस्थितियों से चली आ रही है। जिसमें शिक्षा के आयाम एवं उसके मूल्य लगातार सुधार और बदलाव की परिस्थिति में रहते हैं। भारत में शिक्षा के संदर्भ में लगातार मानवीय आधारों पर बदलाव हुई, क्योंकि हड़प्पा संस्कृति के बाद भारत में वैदिक संस्कृति एवं उत्तर वैदिक संस्कृति ने हजारों वर्षों तक मानवीय समाज को दिशा व दशा दी। जिसके उपरांत भारतीय राजनीतिक सत्ता में विदेशी संस्कृति का आगमन हुआ। जिसके आधार पर इस्लामिक और पश्चिम संस्कृति की शिक्षाओं ने भारतीय शिक्षा में अपनी जगह बनाई। किंतु भारतीय शिक्षा के संदर्भ में यह निश्चित किया जाता है कि मानवीय विकास के लिए किसी भी संस्कृति की गुणवत्ता को स्वीकार कर लिया जाता है। इसी के आधार पर बीसवीं शताब्दी में जब भारत को आजादी मिली तो संवैधानिक एवं लोकतंत्र के पश्चिमी सिद्धांत को स्वीकार करते हुए, भारत ने आधुनिकता की नीव रखी एवं शिक्षा में पश्चिमी एवं मानव के विकास के लिए आवश्यक बदलावों को भारतीय शिक्षा में रेखांकित किया। जिसके परिणाम स्वरूप भारत में विज्ञान, चिकित्सा, सामाजिक विज्ञान एवं मानव के बुनियादी विकास को सरल व सुनिश्चित करने के लिए बदलावों को स्वीकार किया। वर्तमान 21वी शताब्दी के सूचना प्रौद्योगिकी तकनीकी दौर में भारत के जनांकिकी लाभांश को आत्मनिर्भर भारत की संकल्पना में बदलने के लिए नई शिक्षा नीति 2020 को लागू किया है। अतः वर्तमान परिस्थितियों में लागू की गई शिक्षा नीति भारत में रोजगार एवं आर्थिक परिस्थितियों की उन्नति के लिए अत्यंत महत्वपूर्ण है।

मुख्य शब्द- शिक्षा की प्रासंगिकता, पाषाण कालीन व वैदिक शैक्षिक संस्कृति, पश्चिमी और मुस्लिम शैक्षणिक संस्कृति, सूचना प्रौद्योगिकी एवं तकनीकी।

प्रस्तावना

शिक्षा ने मानवीय समाज में अनेक रूपों में अपनी सभ्यता के विकसित रूप को स्थापित किया है। मनुष्य के द्वारा आग की उत्पत्ति से लेकर सेटेलाइट लॉन्चिंग के रॉकेट बनाने तक की प्रक्रिया में शिक्षा के माध्यम से अनेक क्रांतिकारी परिवर्तन किए हैं। जिसमें महत्वपूर्ण पहलू है कि शिक्षा मनुष्य को उसके भविष्य के अविष्कारों के संदर्भ में तार्किक एवं मानवीय संरक्षण के लिए प्रेरित करती है। शिक्षा किसी भी समाज, जाति, वर्ग, धर्म, नस्ल का आधुनिक सूचना एवं प्रौद्योगिकी युग में उन्नति का पैमाना है। जिससे सुनिश्चित होता है कि उस समाज में मानवीय नैतिकता के आधार पर परस्पर सहयोग व सम्मान पिछड़े समुदायों के प्रति आदर भाव व संवेदनशील समुदाय जैसे महिलाओं बच्चों के प्रति सम्मान उनकी उन्नति के लिए प्रयास किस स्तर तक किए जा रहे हैं? पृथ्वी पर मनुष्य जाति की विशेषता विशिष्टता को तार्किक व प्रमाणिक ढंग से स्थापित करने के लिए शिक्षा प्रकृति के पर्यावरण में अन्य जीवों से विशिष्ट बनाने का एक मूल माध्यम है। इसी शिक्षा के माध्यम से मनुष्य ने ना केवल अपने जीवन को आसान व सरल बनाया है, बल्कि मनुष्य ने प्रकृति व प्रकृति में उपस्थित वृक्ष एवं जीव जंतुओं पर अपनी विजय प्राप्त की है। जिसके संदर्भ में कार्ल मार्क्स जैसे प्रसिद्ध वैज्ञानिकों ने कहा है कि प्रकृति की प्रत्येक वस्तु पर मनुष्य का अधिकार है, अर्थात मनुष्य अपनी उन्नति एवं जीवन की समृद्धता के लिए सभी प्राकृतिक संसाधनों का उपयोग कर सकता है। शिक्षा ही मनुष्य को मानवीय नैतिकता के आयामों की समय-परिवर्तन के साथ परिभाषा एवं भविष्य के आने वाले समाज में मानवीय मूल्यों को स्थापित करने के लिए प्रेरणा का एक स्रोत है। साथ ही शिक्षा किसी भी समाज की वर्तमान परिस्थितियों में संपूर्ण व सतत विकास में भागीदारी करने एवं सामाजिक, राजनीतिक, आर्थिक, सांस्कृतिक चुनौतियों से लड़ने का एक प्रमुख व मूल साधन है। जिससे विकास रूपी समाज का साधन प्राप्त किया जा सकता है।

